अनन्तशयनसंस्कृतग्रन्थावलिः— ग्रन्थाङ्कः २२१

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः

केरलविश्वविद्यालयः

ऐतरेयारण्यकं

श्रीषड्गुरुशिष्यविरचितमोक्षप्रदाख्यवृत्तिसहितम् ।

प्रसाधकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयाध्यक्षः ।

१९६८/११४३

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।]

[मूल्यं द्वादश रूप्यकाणि

INTRODUCTION

We are glad to publish the *Aitareyāraṇyaka* with the commentary *Mokṣapradā* as No. 221 in the Trivandrum Sanskrit Series. There have been several publications of the *Aitareyāraṇyaka*; but this is the first time that its Kerala version with the *Mokṣapradā* is published. This commentary differs from Sāyaṇa's in several respects. While the *Mokṣapradā* passage –

[1]व्याख्याति पर्वत्रिकेण चतुर्थारण्यकेन तु ।
महाव्रतब्राह्मणं यस्तं नमाम्याश्वलायनम् ॥

states that the *sūtra* portion in the *Aitareyāraṇyaka* is the fourth *Āraṇyaka* and is composed by *Ās'valāyana*, a passage in the Sāyaṇa's commentary namely ताश्च पञ्चमे शौनकेन 'इमा नुकम्' इत्यादिनोदाहृता:[2] denotes that this portion is the 5th *Āraṇyaka* and that it is the composition of S'aunaka. It seems it is logical to ascribe the authorship of this *sūtra* portion to Ās'valāyana who is the author of the *S'rautasūtra* also. There is also difference of opinion between these commentators in splitting certain words in the *Brāhmaṇa* portion. In the *Brāhmaṇa* passage namely अथातो ग्रीवास्ता आचक्षते यथाच्छन्दसमुष्णिह इति[3] the word is splitted in the *Mokṣaprada*[4] as अयथाच्छन्दस. But according to Sāyaṇa[5] the word is यथाच्छन्दस.

---

1. *See page — 385*
2. *Aitareyāraṇyaka P. 64 Ānandās'rama Edition.*
3. *See – P. 115.*
4. *cf. p. 116* अयथाच्छन्दसम् ।........। उष्णिहो वेदितव्यास्ता वर्णैर्यद्यपि नोष्णिहः ।
   छन्दश्शास्त्रविरोधेऽपि वचनादुष्णिहस्त्विमाः ॥
5. *cf.* ताश्च तिस्र ऋचो यथाछन्दसमध्यापकप्रसिद्धवेदपाठमनतिक्रम्यगक्षरगणनया
   तिस्र उष्णिहः सम्पद्यन्ते ।

So also in the sentence प्राणेन मनसेस्यमानो वाचा नानुभवति,[6] the words according to Sāyaṇa are मनसे अस्यमानः; but *Mokṣapradā* reads the passage as मनसे यस्यमानः. These different views contained in the *Mokṣaprada* can be of great help to students.

Divisions and contents of the Aitareyārāṇyaka –

According to the *Mokṣaprada* the *Aitareyāraṇyaka* is divided into four *Āraṇyakas*. In the *Mokṣaprada*, the portion between the third and fourth *Āraṇyakas* which contains the nine *ṛks* called *mahānāmnīs* and the nine *pādas* called *purīṣa-padas*, is separately considered and named *Sakṛduktikhan-dāddhyāya*. But in Sāyaṇa's commentary this portion is considered as the fourth *Āraṇyaka*. So according to Sāyaṇa *Aitareyāraṇyaka* is divided into five *Āraṇyakas*. The fifth portion which constitutes the *sūtras* is considered as *pauruṣeya* or human and the others are *apauruṣeyas* or divines. According to the *Mokṣaprada*, the portion beginning with वाङ्मे मनसि etc. is the first *addhyāya* of the third *Āraṇyaka;* but it is the seventh *addhyāya* of the second *Āraṇyaka* according to Sāyaṇa's commentary. Due to these differences, there are seven *addhyāyas* in the second *Āraṇyaka* and two *adhyāyas* in the third *Āraṇyaka* in accordance with sāyaṇa's commentary. In the *Mokṣaprada*, there are six *adhyāyas* in the second *Ārayaṇka* and three *adhyāyas* in the third. But there is no difference in the number of *Khaṇḍas* between the two commentaries. A table showing the above details is given below.

---

6. *See P. 246.*

DIVISIONS

According to Mokṣaprada			According to Sāyanás commentary.		
Āraṇyaka	Adhyāya	Khaṇḍa	Āraṇyaka	Adhyāya	Khaṇḍa
I	1	4	I	1	4
,,	2	4	,,	2	4
,,	3	8	,,	3	8
,,	4	3	,,	4	3
,,	5	3	,,	5	3
II	1	8	II	1	8
,,	2	4	,,	2	4
,,	3	8	,,	3	8
,,	4	3	,,	4	3
,,	5	1	,,	5	1
,,	6	1	,,	6	1
III	1	1	,,	7	1
,,	2	6	III	1	6
,,	3	6	,,	2	6
Sakṛduktikhaṇḍādhyāya	1	1	IV	1	1

IV Sūtra portion 3 *addhyāyas*–V Sūtra portion 3 *addhyāyas*

The most useful one among the materials used in this publication is codex No. 19040 and even from this manuscript we could transcribe the *Mokṣaprada* only upto a portion of the first *khanda* in the first *addhyāya* of the *sūtra* portion. Therefore, we are unable to understand whether there is difference in the number of *khandas* in the *sūtra* portion between Sāyaṇa's commentary and *Mokṣaprada*. But the numbers of *addhyāyas* in that portion according to both the commentators is alike.

The first *Āraṇyaka* of the *Aitareyāraṇyaka* deals with the *karmas* or ritual performances. In the *Ās'valāyanas'rautasūtra* there is mention of a principal sacrifice called '*gavāmayana*' which should be performed for a period of one year. This sacrifice is complete with 360 *ahas* or days in which the following 25 *ahas* are performed repeatedly and otherwise. These are *prāyaṇīya, caturvims'a*, the six *pṛṣṭyas*, the six *abhiplavas, abhijit*, three svaras, *viṣuvān, vis'vajit*, three *chandomas, das'ama* and *mahāvṛata*.[7] The portion from the *prāyaṇīya* up to *das'ama* of these *ahas* in the *gavāmayana* sacrifice has been dealt with in the *Aitareyāraṇyaka*. Thus the first *Āraṇyaka* of the *Āitareyāraṇyaka* deals with the ritual performances of the *mahāvrāta* sacrifice. In those days when sacrificial performances were very common, only

---

7. cf. तदेषामभियज्ञगाथा गीयते ।

अतिरात्रश्चतुर्विंशं षडहावभिजित्स्वरा : ।
विषुवन्विश्वजिच्चव छन्दोमा दशमव्रतम् ॥
प्रायणीयश्चतुर्विंशं पृष्ठ्योऽभिप्लव एव च ।
अभिजित्स्वरसामान्यो विषुवान् विश्वजित्तथा ॥
छन्दोमा दशमं चाह उत्तमं तु महाव्रतम् ।
अहीनैकाहसत्राणां प्रकृतिः समुदाह्रियते ॥

Ās'valāyana—13-32.

certain intricate methods of the sacrifices had to be explained in detail; and so only certain methods of the *mahāvrata* sacrifice were dealt with in this *Āraṇyaka*.

In the first *Āraṇyaka* are mentioned the six *s'astras*[8] namely *ājya, pra-uga, marutvatīya· niṣkevalya, vais'vadeva,* and *āgnimāruta* which should be repeated in couples in the *prātaḥsavana, māddhyandinasavana* and *tṛtīyasavana* in the *mahāvrata* sacrifice. In the first *addhyāya* of this *Āraṇyaka, ājyas'astra* and *pra-uga s'astra* are explained. The first two *khaṇḍas* of the second *adhyāya* deal with the *marutvatīyas'astra* and the third and the fourth *khaṇḍas* explain the creation and the method of using of a sacrificial seat called *preṅkha* on which the *hotā* or the priest who utters the *niṣkevalyas'astra* has to sit. From the third chapter upto the second *khaṇḍa* of the fifth *addhyāya,* the *niṣkevalyas'astra* is mentioned. The *niṣkevalyas'astra* is conceived as having the form of a *garuḍa*. The third *khaṇḍa* in the fifth *addhyāya* deals with the *vais'vaḍevas'astra* and āgnimaruta S'astra.

The whole portion of the *Aitareyabrāhmaṇa* and the first *Āraṇyaka* of the *Aitareyāraṇyaka* are considered to be the *karmakāṇḍa* section. The remaining portion of the *Aitareyāraṇyaka* is the *jñānakāṇḍa* section and therefore it is called *Upaniṣad*. The second *Āraṇyaka* is called *ātmopaniṣad* and the third is named *saṃhitopaniṣad*.[9] The first *khaṇḍa* of the first *addhyāya* in the second *Āraṇyaka* was composed in praise of the ritual performances already

8. *Sastra* is a hymn or a *mantra* which is repeated (without singing) in order to convey the attributes of the applauded.

9 उपासनं तूपनिषदितिगुह्यं तदुच्यते ॥ P. 303

described in the previous portion. From the second *khaṇḍa* upto the end of the third *addhyāya* is dealt with the *aṅgabaddhopāsanā* for the *ṛtvik* or the priest at a sacrifice who is fit for *jñāna* or wisdom through the purification of mind by ritual performances. We are able to attain *Brahman* only with a concentrated mind and this *upāsanā* is meant for attaining that concentration of mind. This *upāsanā* is divided into two namely *brahmopāsanā* and *pratīkopāsanā*. *Brahmopāsanā* is that meditation in which certain qualifications (guṇas) are attributed to *Brahman*. *Pratīkopāsanā* is that in which the images are worshiped with the contemplation of *Brahman*. *Pratīkopāsanā* is also of two kinds; *Yajñāṅga* or a part in the sacrifice and *yajñabahirbhūta* or separated from the sacrifice. The expert priests in the sacrifice are able to meditate directly on the several devatās, since they can immediately comprehend the respective mantras of those devatās. This kind of meditation is called aṅgabaddhopāsanā.

The meditation of *ādhidaivikadevatās* such as *pṛthivi* or earth etc. and *āddhyātmikadevatās* such as *vāk* or speech etc. is also explained in the *niṣkevalyas'astra* of the *mahāvrata* sacrifice. According to *nairuktas*, there are only three *devatas* ie. *agni*, *vāyu* and the *sun* and this whole world is the *vibhūti-vistāra* or expansion of these *devatas*. In accordance with this theory, the meditation of these three *devatas* in both *ādhidaivata* and *āddhyātmika* forms is dealt with in this portion. Says Ṣaḍguruś'iṣya—

नैरुक्तानामग्निवायुसूर्या देवास्ततोऽपरे ।
तद्विभूतय एवेति मतमत्र खलूच्यते ॥

अथ महदुक्ते बृहतीसहस्रे प्रकृतदेवतात्रयस्याध्यात्माधिदैवतभेदेनोपासनमाह । [10]

---

(10) See p. 158

Here is given an explanation of the *prāṇabrahmopāsana* and *s'arīrapuruṣopāsana*. Having mentioned prāṇa as the whole soul and establishing the identity of *prāṇa* with the Sun, the upāsana तद्योऽहं सोऽसौ योऽसौ सोऽहम्[11] is enjoined here.

The portion of the *Aitareyāraṇyaka* beginning with the fourth *addhyāya* of the *second Āraṇyaka* upto the end of that *Āraṇyaka* is the well known *Aitareyopaniṣad.* In this *upaniṣad* are explained the meditation of *Brahman* and the matters connected with that meditation.

In the first *addhyāya* of the third *Āraṇyaka*, the text of the hymn वाङ् मे मनसि etc. is given. This *mantra* is said to be capable of removing the obstacles which affect the *samhitopāsana*. From the second *addhyāya* in this *Āraṇyaka* are mainly explained the *Samhitopāsana*[12] and the fruits attained through it. The last syllable 'm' in अग्निम् in the vedic portion अग्निमीळे is the former member of the *saṁhitā* and the syllable '*ī*' in the ईळे is the latter member of the same *samhita*. The immediate utterance of these two syllables is called *samhita* (combination). In the *samhita* the meditation of *bhūloka* or this world should be done in the first sylluble and that of the *dyuloka* or the heaven should be done in the second syllable and the meditation of *vāyu* should be done in the combination (*saṁhita*) according to the sage Māṇḍūkeya. Several *samhitopāsanas* of this kind and their *fruits* form the contents of this *samhitopaniṣad*. Incidentally are also dealt with here certain unlucky omens which

(11) See p. 222.

(12) पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेयः P. 303

indicate death and also are mentioned certain *japas* or repeating of *prayers* as remedy for these. Also is mentioned here the *vīṇopāsāna* or worship of the body as a divine flute and its *fruits.* Also is dealt with the repeating of a *mantra* which results in fluency of speech and cleverness in *Vedāddhyayana* or vedic study. In this portion, the identity of *Ātman* with the sun is established. It is also stated on the authority of the vedic passages that the Sun is *Brahman* and that his '*vibhūti* or expansion is the whole world.

The contents of the *Sakṛduktikhaṇḍāddhyāya* are the *mahānāmnī ṛks* and *purīṣapadas.* Though the proper place of mentioning the *mahānāmnīs* is the *samhita,* the text of these is given among the *Āraṇyakas,* since the sage wished the *mahānāmnīs* to have the characteristic features of an *Āraṇyaka.* These are that they are learned in the day time and in tranquil conditions in the forest ; and these *mahānāmnīs* are to be taught to the same pupil as learn this *Āraṇyaka.*[13]

We have already noted that according to Ṣaḍgurus'iṣya, the author of the *sūtra* portion is Ās'valāyana and according to Sāyaṇa it is S'aunaka. But no reason for their conclusions is given by these commentators. Nārāyaṇa the author of the vṛtti on the *Ās'valāyanas'rautasūtra* says महाव्रतं चान्यत्र वक्ष्यते (mahāvṛata would be said elsewhere) under the As'valāyana's S'rautasūtra एतावत्सात्रं होतृकमन्यत्र महाव्रतात्[14] Therefore Nārāyaṇa also must be deemed to be of opinion that the *mahavratāraṇyıka* in the form of *sūtra* was composed

---

13 see *Mokṣaprada* महाव्रतब्राह्मणं तु त्रिपर्वारिण्यकं गतम् । etc. P. 376.

14. *Ās'valāyanas'rautasūtra 8-13-31*

by Ās'valāyana himself. According to Ṣaḍguruś'iṣya, Ās'valāyana composed the Mahāvrata in the form of *sūtra* and included in this *Āraṇyaka* possessing the characteristics of *Āraṇyakas* earlier stated. Says Ṣaḍguruś'iṣya –

व्याख्याति पर्वत्रिकेण चतुर्थारण्यकेन तु ।
महाव्रतब्राह्मणं यस्तं नमाम्याश्वलायनम् ॥
विशेषधर्मान्वयार्था सूत्रादस्य पृथक्क्रिया ।
एतावत्सात्र सूत्रात्प्रागेतत्संगतमर्थतः ॥
सर्व (श्श ? श्शा) न्तिर्वनमहरेकशिष्यकतादि च ॥ P. 385

In this *sūtra* portion are explained with detail the ritual performances to be done by the priest in the *Mahāvrata* sacrifice.

The meaning of the word Aitareyāraṇyaka.

The *Āraṇyaka* is that Vedic portion which should be taught only in the forest. Says Sāyaṇa in the beginning of his *Bhāṣya* on the *Āitareyāraṇyaka* – अरण्य एव पठ्यं स्यादारण्यकमितीर्यताम्. The word *Aitareya* is devived from the word 'Itarā' meaning another. Yajñavalka the great sage had two wives. The elder was called by him प्रिया (beloved) due to his intense love for her and the other woman was called Itarā. Since this *Āraṇyaka* had been revealed and taught by this sage, it is called *Aitareyāraṇyaka*. According to Macdonell, the age of the *Brāhmaṇas* and *Āraṇyakas* is between the 9th and 6th centuries B. C.[15]

The commentary Mokṣaprada.

Ṣaḍguruś'iṣya's *Mokṣaprada* is as difficult to understand as the *Āraṇyaka* itself. In this respect the commentary retains the profundity of the text. Ṣaḍguruś'iṣya is

---

15. See Macdonell's History of Sanskrit Literature – p. 47

able to condense a great deal of meaning in his sentences. The commentary, therefore, is clear only to good students of Sanskrit grammar. For example See- ॥ अन्नं वा इषः ॥ कर्मणि क्विपि सोर्जस्[16] Here we have to understand that the passage कर्मणि क्विपि सोर्जस् is the explanation of the word इषः . We have also to understand that since the statement is सोर्जस्,, the word इषः is in the place of इट् . *Mokṣaprada* is silent in these matters. So also the *Mokṣaprada* passage beginning with हनेर्लटो झेर्झश्शब्लुगुपधालोपतः कुघः । is the explanation of the word अपघ्नते in the text मुखतः पाप्मानमपघ्नते [17]. Due to this difficulty in the grammatical remarks and obscurities arising from the brevity of the *sūtra* style employed in the *Mokṣaprada* there are several scribal errors in the manuscripts of the commentary employed in this publication. *Mokṣaprada* contains several stanzas in which are summed up the ideas explained in the prose passages. On the whole, this commentary is written in the '*nālikerapāka*'.

Ṣaḍguruśiṣya, the commentator–

The commentator's real name is not known and the name Ṣaḍguruśiṣya is a title meaning a pupil of six preceptors. The following statement occurs in the *sukhapradāvṛtti* on the *Aitareyabrāhmaṇa* by Ṣaḍguruśiṣya —

विनायकः शूलपाणिर्मुकुन्दः सूर्यो व्यासः शिवयोगीति ये षट् ।
तेभ्यो नमः सप्तविद्यामृतस्य प्रदातृभ्यः स्वाश्रितवत्सलेभ्यः ॥
आद्या सर्वानुक्रमणी द्वितीया महाव्रतं चोपनिषद्द्वयं च ।
माहाव्रतं सूत्रमासां तृतीया चात्वारिंशं ब्राह्मणं वै चतुर्थी ॥
सूत्रं पञ्चम्यत्र षष्ठी तु गृह्यं शाकल्यस्य संहिता सप्तमीति ।
इत्येतद्वै सप्तविद्यामृताख्यं दत्तं स्वयं गुरुभिः षड्भिरेतैः ॥ 18

16. See – p. 28
17. See – p. 9.
18. Aitareyabrāhmaṇa Part I T S S No. 149 – p. 1.

From this statement we understand that the six preceptors are Vināyaka, S'ūlapāṇi, Mukunda, Sūrya, Vyāsa and S'ivayogin. The texts taught to Ṣaḍguruś'iṣya by these teachers are (1) the Ṛksarvānukramaṇī (2) the first āraṇyaka ie. mahāvrata (3) *Ātmopaniṣad* and Sambitopaniṣad in the *Aitareyāraṇyaka* (4) *Aitareyabrāhmaṇa* otherwise called by him *Cātvāriṃs'abrāhmaṇa* (5) *Ās'valāyanas'rautasūtra* (6) *Ās'valāyanagṛhyasūtra* and (7) *S'ākalyasamhita* or *Ṛksamhita.* The *Vedārthadīpika* a *vṛtti* on the *Sarvānukramaṇī* by Ṣaḍguruś'iṣya has been edited by A. A. Macdonell from Oxford. At the end of the *Vedarthadīpika* we get the following statement –

> खगोत्यान्मे ? गेत्यात्मेषुमायेति कल्यहर्गणने सति ।
> सर्वानुक्रमणीवृत्तिर्जाता वेदार्थदीपिका ॥
> लक्षाणि पञ्चदश वै पञ्चषष्टिसहस्रकम् ।
> सद्वात्रिंशाच्छतं चेति दिनवाक्यार्थ ईरित: ॥

Here the statement खगोत्यान्मेषुपायेति is a *Kalivākya* (meaning 1565132 Kalidays = 1178 A. D.) denoting the date of the composition of the *Vedārthadīpikā.* Therefore we understand that Ṣaḍguruś'iṣya flourished in the latter half of the twelth century A. D.[19] Macdonell says in his introduction to the *Vedārthadīpika* that "Ṣaḍguruś'iṣya always refers to the fifth *Āraṇyaka* as the fourth apparently looking upon the fourth and fifth *Āraṇyakas* in the *Aitareyāarṇyaka* as one book". Unlike his statement, really Ṣaḍguruś'iṣya has not considered these two *Āraṇyakas* as one book ; the portion which deals with the *mahānāmnīs*' according to Ṣaḍguruś'iṣya is not an *Āraṇyaka.* Among the other texts taught to Ṣaḍguruś'iṣya by his six preceptors, the *Cātvāriṃs'abrāhmaṇa* or the

---

19. See – A. A. Macdonell – Introduction to the *Sarvānukramaṇi* of Kātyāyana – p. XIX.

Aitareyabrāhmaṇa has been commented upon by him in his *Sukhapradā vṛtti* and 32 *adhyayas* of this has been published from this Institute, in the Trivandrum Sanskrit Series. The *Mahāvrata, Upaniṣaddvaya* ie. *Ātmopaniṣad* and *Samhitopaniṣad* and *Mahāvratasūtra* are commented on the *Mokṣapradā vṛtti* and this we are publishing now. He has written a commentary on the *Ās'valāyanas'rauta sūtra* also called *Abhyudayaprada.*[20] It is not known whether Ṣaḍgurus'iṣya has written commentaries on *gṛhyasūtra* etc. or not. Ṣaḍgurus'iṣya mentions in his works only very ancient texts such as *Brāhmaṇas, Upaniṣads, Mahābhārata, Sūtras* of Panini, *Mahābhāṣya, Kātyāyana's vārtika* and *Sarvānukramaṇi* etc.

There is avilable direct evidence to settle the birth place of Ṣaḍgurus'iṣya. These are the following. 1) Kalivākyas are usually stated in the works produced in Kerala and 2) certain Malayalam words are found in the Sukhaprada vṛtti on the Aitareyabrāhmaṇa by Ṣaḍgurus'iṣya.[21] On the basis of this it is safe to conclude that Ṣaḍgurus'iṣya was a son of Kerala.

Foot-note

A foot-note is given in this edition and we have quoted in several places of it the *Bhāṣyas* of Sāyaṇa to show the difference between the explanations of the same text as given in Sāyaṇa's and Ṣaḍgurus'iṣya's commentaries. This

---

20. Mentioned by K. K. Raja – Bhāṣāgaveṣaṇam – p. 297
21. See at the end of the 'navarātrakratu'

(end of 24th Khanda)

नवरात्र इति क्तो दुर्ज्ञानो दुर्वचस्तथा ।
रूपशब्दबहुत्वेन रूपवानिति नामवान् ॥
नामोरुवेत्यपभ्रंश: + + वाळिति वै यथा

may be taken only as specimen and not all the difference in the Sāyaṇa's commentary are noticed. This will help researchers in their comparative studies on these works.

Critical Apparatus

Apart from the Ānandāśrama edition of *Aitareyāraṇyaka* with Sāyana's commentary, we have used the following materials in this critical edition.

1. क - C. O. No. 680. Palm—leaf manuscript. Malayalam script. Good condition except the last leaf. It contains the text of *Aitareyāraṇyaka* with the *Mokṣaprada* commentary from the beginning up to a part of II-6-i.
2. क. 1 - No. T. 662. A. This is a copy of C. O. No. 680.
3. ख - T. 662. B. Paper Transcript based on a palmleaf Ms. numbered L. 480, not available here now. The portion of the Āraṇyaka II left out in the कपाठ and the 3rd *Āraṇyaka* are contained in the Transcript No. 662 B.
4. ग - No. 11090. Palm - leaf manuscript. Malayalam script. This is moth-eaten and carries the text up to a portion of I-5-1. The leaves are in disorder. Since several leaves are lost there is no continuity of the subject matter. This also contains the *Mokṣaprada*.
5. घ - No. 19040. Palm - leaf manuscript. Malayalam script. The leaves are damaged. Up to a portion of IV-3-1.

---

21. Contd. संहिता शङ्किता गृह्यं किरियं दक्षिणा तथा ।
तकणा तवणा मूलं मुतल् मुन्पुं पुनस्तु पिन् ॥

Aitareyabrāhmaṇa - T. S. S. No. 167; p. 265.

See also these stanzas quoted by Dr. K. Kunjunni Raja- Bhāṣāgaveṣaṇam. (Mal. book) Mangalodayam edition - 1962, p. 296—298.

(The underlined words are Malayalam words)

of Aitareyāraṇyaka with Mokṣaprada is available in it and only a portion of the same khaṇḍa could be used, since the leaves are too damaged.

6. ङ. – No. 17772. Palm – leaf manuscript. Malayalam script. Damaged. The leaves containing the first and second Āraṇyakas are in disorder. Though the colophon in the beginning and at the end of the chapter II in Āraṅyaka I and at the end of Addhyāya 3 in the Āraṇyaka II states that it is Mokṣaprada, the manuscript contains only the first two stanzas in the *Mokṣaprada* and the remaining portion is only the *Aitareyāraṇyaka*.

7. च – No. 9321 Paper manuscript. Devanagari script. Date of manuscript – Samvat 1747 = AD.1825. The remark रामस्येदं स्तुकम् is seen at the end. It contains the full text of Aitareyāraṇyaka without Mokṣaprada. The colophon "इति पञ्चमारण्यकम्" indicates that the 5th Addhyāya is considered in it as the sūtra portion. This is not a Kerala version. The mantra वाङ्मे मनसि etc. is not included in it. Only the total number of the *khaṇḍas* in the *addhyāyas* of each Āraṇyaka is given and not the separate ones for each Addhyāya. After the portion of *mahānāmnīs* and the *purīṣapadas* a colophon इति चतुर्थारण्यकं समाप्तम् can be seen. The manuscript is in good condition in spite of certain worm – eaten parts.

8. छ - No. 13534.0. Palm—leaf manuscript. Malayalam script. Good condition. Only the texts of the six addhyāyas of the 2nd *Āraṅyaka* are available in it. A portion of the mantra वाङ्मे मनसि etc. is also given.

9. ज – No. 10509.0. Palm - leaf manuscript. Malayalam script.

Good condition. It contains the text of Aitareyāraṇyaka from *Ātmopanisad* up to a portion of fifth *Khaṇḍa* of the second addhyāya in the Samhitopaniṣad. The mantra वाङ्मे मनसि etc. is added to the fifth addbyāya in the Ātmopanisad.

10. झ – T. 223. P. Paper manuscript. Devanagari script. Good condition. The first two *Āraṇyakas* are complete in it without Mokṣaprada. In this manuscript also the *mantra* वाङ् मे मनसि etc. is included in II. 5.

11. ञ – No. L. 136. Palm - leaf munuscript. Malayalam script. The first and second *Āraṇyakas* are completely given in it. The portion of the *mantra* वाङ्मे मनसि etc. is added at the end of the 5th *addhyāya* of the second *Āraṇyaka*.

12. ट – No. 13752. H. Palm - leaf manuscript Malayalam script. Slightly worm-eaten. It contains the second and third *Āraṇyakas* without Mokṣaprada. The portion of the *mantra* वाङ्मे मानसि etc. is included in the second *Āraṇyaka*.

13. ठ – No. 1217. B. Palm – leaf manuscript. Malayalam script. Good condition. It contains the complete 2nd *Āraṇyaka*. The *mantra* वाङ् मे मनसि etc. is attached to the beginning and at the end. The *addhyāyas* in the *Āraṇyaka* are numbered 6 to 10. The last colophon is इत्यैतरेयोपनिषदि दशमोऽध्यायः । At the beginning, after the *mantra* वाङ्मे मनसि etc., there is also a passage भूमिमुपस्पृशेत् अग्नीका नाम इला । भद्रन्नो अपिव्रातय मनः । ओं शान्तिः ॥

14. ड – No. 913. Palm – leaf manuscript. Malayalam script. Good condition. It contains the third *Āraṇyaka* and the *sūtra* portion. The portion of *Mahānāmnīs* and *Puriṣapadas* is not included in it. The *mantra* वाङ्मे मनसि etc. is not attached to the third *Āraṇyaka*

The date of the manuscript is written as 28th Ciññam 915. M. E.

15. ड – 19041. C. Palm – leaf manuscript. Malayalam script. The leaves are slightly damaged. It contains the first *Āraṇyaka* in full.

16. ण – No. 15784. Palm – leaf manuscript. Malayalam script. Good condition. The full text of first and second *Āraṇyakas* is given in this. The numbering of the two Āraṇyakas is continuous. The *mantra* वाङ् मे मनसि etc. is attached at the end of the second *Āraṇyaka*.

17. त – No. 21960. Palm – leaf manuscript. Malayalam script. It contains the 2nd *Āraṇyaka* only. The *mantra* वाङ् मे मनसि etc. is given in the second *Āraṇyaka*.

It seems that Ṣaḍguruśiṣya's basis on dividing the texts of Aitareyāraṇyaka as stated in the verse —

संहितोपनिषत्संज्ञं तृतीयं पर्व यत् परम् ।
तद्विघ्नशान्तये वाङ्म इत्यादिर्मन्त्र उच्यते ॥
अतस्तृतीयशेषोऽयं नतु द्वैतीयशेषकः ।

has not been understood by those who wrote these manuscripts. None of these manuscripts has included the *mantra* वाङ् मे मनसि etc. in the 3rd *Āraṇyaka*; all have included it in the 2nd Āraṇyaka.

Sri. V. G Namboodiri, Research Officer has prepared the Press-copy of the work under my supervision. In publishing this work, I have been assisted by Sri. A. Ramachandra Sastri, Research Officer, Sri. M. Madhavan Unni, Assistant Research Officer and Sri. E. Easwaran Namboodiri, Assistant Research Officer of this Department.

Oriental Research Institute
and Mss. Library
University of Kerala
Trivandrum 6—4—1968.

K. RAGHAVAN PILLAI
Director.

विषयानुक्रमणिका ।

प्रथमारण्यके द्वितीयोऽध्यायः—

प्रथमारण्यके पञ्चमोऽध्यायः—

द्वितीयारण्यके द्वितीयोऽध्यायः-

द्वितीयारण्यके चतुर्थोऽध्यायः—

तृतीयारण्यके द्वितीयोऽध्यायः-

टिप्पणीस्थसाङ्केतिकसूची

आ० श्रौ०	=	आश्वलायनश्रौतसूत्रम्
आ० श्रौ० सू०	=	,,
उणा० सू०	=	उणादिसूत्रम्
ऋक्सं०	=	ऋक्संहिता
ऋक्सर्वा०	=	ऋक्सर्वानुक्रमणी
ऐ० आ०	=	ऐतरेयारण्यकम्
ऐ० ब्रा	=	ऐतरेयब्राह्मणम्
तै० आ०	=	तैत्तिरीयारण्यकम्
तै० उ०	=	तैत्तिरीयोपनिषत्
पा० सू०	=	पाणिनिसूत्रम्
पा० सू० भा०	=	पाणिनिसूत्रभाष्यम्
पा० सू० वा०	=	पाणिनिसूत्रवार्त्तिकम्
बृहदार० उ०	=	बृहदारण्यकोपनिषत्
श्वेता० उ०	=	श्वेताश्वतरोपनिषत्
वा०	=	पाणिनिसूत्रवार्त्तिकम्

॥ श्री ॥

। ॐ ।

ऐतरेयारण्यकं

श्रीषड्गुरुशिष्यविरचितमोक्षप्रदाख्यवृत्तिसहितम् ।

वर्ण्यतेऽथ प्रसादेन षड्गुरूणां महाव्रतम् ।
महिदासैतरेयर्षिदृष्टं सोपनिषद्द्वयम् ॥

*ब्राह्मणादौ कथा प्रोक्ता मा[1]हिदा[2]सैतरेयिकी ।
तत एवावधार्येति नात्र सा खलु वर्ण्यते ॥

॥ ॐ अथ महाव्रतम् ॥

---

१. 'महि' ग. २. 'दासे' ग.

---

* ऐ० ब्रा० सुखप्रदा १. १. T. S. S. No. CXLIX

*अथेत्यानन्तर्ये । प्रायणीयचतुर्विंशपृष्ठ्यषडहाभिप्लवषडहाभिजित्स्वरसामत्र्यहविषुवद्विश्वजिच्छन्दोमत्र्यहदशमरूपाणामह्नां चतुर्विंशतिः सप्रासङ्गिका ब्राह्मणेनोक्ताः । अथेदानीं महाव्रताख्यमहरुच्यत इत्यर्थः ।

अथ महाव्रतशब्दं निराह—

॥ इन्द्रो वै वृत्रं हत्वा महानभवद्यन्महानभवत्तन्महाव्रतमभवत्तन्महाव्रतस्य महाव्रतत्वम् ॥

वैशब्दः प्रसिद्धौ । पुरावृत्तद्योतनार्थः । †यत् टालुक् । येन । दुष्करो महत्त्वदायी वृत्रवधो येन कर्मणेन्द्रस्याभूत् तत् किमिति विमृश्यमानं महाव्रतमभूत् । तत् तस्मात् महाव्रतम् इन्द्रस्य व्रतं कर्म इति कृत्वा छन्दस्त्वादात्वेन महाव्रतशब्दस्य प्रवृत्तिनिमित्तं विद्यादित्यर्थः ।

अस्याग्निष्टोमसंस्थस्य होतुः शस्त्राणि यानि षट् ।
तेषामाद्यमाज्यशस्त्रं विशेष(त?)स्तत्र वर्ण्यते ॥

॥ द्वे एतस्याह्न आज्ये कुर्यादिति हैक आहुः ॥

---

* 'अथशब्द आरम्भवाची । महाव्रताख्यं कर्म प्रारब्धमित्यर्थः । अथवायमानन्तर्यार्थोऽथशब्दः । प्रकृतिज्ञानानन्तरं विकृतिरूपं महाव्रताख्यं कर्माभिधीयत इति शेषः । प्रकृतिज्ञाने हि सति तत्सकाशाद्विकृतावतिदिष्टा धर्माः साकल्येनावबोद्धुं शक्यन्ते । विश्वजिच्चतुर्विंशादीनि कर्माणि महाव्रतस्य प्रकृतयः । आज्यप्रउगनामके द्वे शस्त्रे विश्वजिदाख्यात्कर्मणो महाव्रतेऽतिदिश्येते । होत्रकाणां शस्त्राणि तु चतुर्विंशाख्यात्कर्मणोऽतिदिश्यन्ते । तथा च पञ्चमारण्यके पठ्यते—"आज्यप्रउगे विश्वजितो होत्राश्चतुर्विंशात्" इति ।' इति सायणः ।

† 'यद्यदायमिन्द्रो महानभवत्तदानीमिन्द्रार्थं क्रियमाणं सोमपानविशेषात्मकं कर्म महाव्रतमभवत्' इति सायणः ।

अत्र हेत्युपदेशस्य पारम्पर्यादिसूचकः ।
इति वाक्यसमाप्त्यर्थं एक इत्यन्यवाचकः ॥
अन्य आहुराज्यशस्त्रे द्वे सूक्ते भवतामिति ।

॥ एकमिति त्वेव स्थितम् ॥

आज्ये कुर्यादित्येव ।

आज्यशस्त्रे सूक्तमेकं न तु द्वे इति निर्णयः ।

तत्र—

॥ *प्र वो देवायाग्नय इति राद्धिकामः ॥

आज्य एकं कुर्यादित्येव । £'तस्य राद्धिमनु राद्धिः सर्वेषाम्' इति यथा । सप्तर्चमेतत्सूक्तम् । गुणफलाधिकारोऽयम् ।

॥ †विशो विशो वो अतिथिमिति पुष्टिकामः ॥

पुष्टिः सम्पूर्णानुभवः । पञ्चदशर्चम् आज्ये कुर्यादित्येव ।

आभिरूप्यमाह—

॥ पुष्टिर्वै विशः ॥

---

१. 'भिसु' घ.   २. 'अर्चं आ' ग.

---

* ऋक्सं० ३. १३. १.   £ आ० श्रौ० १२. १०. ४.

† ऋक्सं० ८. ७४. १.

वैश्यजात्यवच्छिन्नाः पुष्टिमन्तः प्रायेण कृषिगोरक्षवाणिज्ययोगाद्भवन्ति। पुष्टिः, मतुपो लुक्। तत्तद्वतोरभेदोपचारो वा।

तस्मात्—

॥ पुष्टिमान्भवतीति ॥

इति एवं विशोविशीयमाज्ये कुर्वन् पुष्टिमान्भवतीति।

अत्र केचित्—

॥ अतिथिमिति पदं भवति नैतत्कुर्यादित्याहुरीश्वरोऽतिथिरेव चरितोः ॥

अत्र सूक्ते अतिथिमिति पदमस्ति। तच्च दुःश्रुतिः। कथमधिकारी अन्नाभावादलब्धभोजनो भूत्वा चरितुं समर्थः स्यात्। अतो नैतदाज्ये कुर्यादिति केचिदाहुरित्यर्थः। *'ईश्वरे तोसुन्कसुनौ'।

अन्यो ब्रह्मवादी—

॥ तदु ह स्माह कुर्यादेव ॥

तद् अतिथिमिति पदम्। उ यदि। ह अपि अस्ति। तथापि कुर्यादेवेति कश्चिदाह स्म।

उक्तो दोषः कथं नेत्याह—

---

* पा० सू० ३. ४. १३.

॥ यो वै भवति यः श्रेष्ठतामश्नुते स वा अतिथिर्भवति न वा असन्तमातिथ्यायाद्रियन्ते ॥

भवति प्रकाशते विद्यातपःपुण्यैः । [1]व्याचष्टे श्रेष्ठतामिति । असन्तं विद्यादिगुणरहितम् । आतिथ्याय अतिथिसम्माननाय । *'अतिथेर्ञ्यः' । आद्रियन्ते पूजयितारः श्रद्दधते ।

†

इङ्‌आदरे तुदादिश्शरिङ्‌श्यग्लिङ्‌क्षिर्वेयङ्‌तङः ।

॥ तस्मादु काममेवैतत्कुर्यात् ॥

तस्माद् अतिथिपदात् । उ प्रत्युत । न केवलं दोषाभाव एव किन्तु पूज्यत्वमेव । काममेव यथेष्टम् । एतत् सूक्तं विशोविशीयम् । कुर्यात् ।

अत्र विशेषमाह—

॥ स यद्येतत्कुर्याद् ¶आगन्म वृत्रहन्तममित्येतं तृचं प्रथमं कुर्यात् ॥

सः होता । एतद् विशोविशीयम् । आगन्मेति तृचं सूक्तस्य द्वितीयं सन्तं प्रथमं कुर्यात् ।

आगन्मेत्यस्याभिरूप्यमाह—

---

१. 'कुक्षिवति य' क. ग.

---

* पा० सू० ५. ४. २६.   † पा० सू० ७. ४. २८

¶ ऋक्सं० ८. ७४. ४.

॥ एतद्वा अहरीप्सन्तः संवत्सरमासते त आगच्छन्ति ॥

ये संवत्सरसत्रं गवामयनमासते अनुतिष्ठन्ति एतन्महाव्रताख्यमहरीप्सन्तः प्राप्तुमिच्छन्तः ते इदानीमागन्मेत्युक्त्वावागच्छन्तीति गम्यते ।

अथ विशोविशीयं छन्दः स्तौति—

॥ त एतेऽनुष्टुप्शीर्षाणस्त्रयस्तृचा भवन्ति ॥

"विशो विशो वः पञ्चोनाग्नेयं त्वनुष्टुम्मुखास्तृचाश्चत्वारोऽन्त्यास्तिस्रोऽनुष्टुभः" । "अनुष्टुब्गायत्र्यौ चानुष्टुभोऽनुष्टुम्मुखास्तृचा इत्युक्ते" इति च *सर्वानुक्रमण्याम् ।

प्रथमा च चतुर्थी च सप्तमी दशमी तथा ।
अन्त्यास्तिस्रोऽनुष्टुभः स्युरन्या गायत्र्य एव तु ॥

इति स्थिते आदावागन्मवृत्रतृचे गते अवशिष्टा आदितस्त्रयस्तृचा अनुष्टुप्छिरस्काः अन्या गायत्रीका भवन्ति । शीर्षन् छन्दसि शिरःपर्यायः ।

तत्र—

॥ ब्रह्म वै गायत्री ॥

‡ब्रह्म ब्राह्मणजातिः ।

---

* ऋक्सर्वानुक्रमणी (८. ७४. २.) ऋक्सर्वानुक्रमणीपरिभाषा (११. ६.) च.

‡ 'गायत्री ब्रह्मैव, "तत्सवितुर्वरेण्यम्" [ऋक्सं० ३. ६२. १०.] इत्यनया गायत्र्या परब्रह्मणः प्रतिपाद्यत्वात्' इति सायणः ।

*'ब्रह्मा रुद्रेन्द्रभृग्वादिविप्रर्त्विग्यज्ञधातृषु ।
अर्केऽग्नौ क्ली तु वेदेऽन्ने स्वाध्यात्मात्मतपस्सु च' ॥

इति निखण्डोः पुंस्त्वेऽपि लिङ्गव्यत्ययः ।

देवेन मुखतः सृष्टा गायत्री विप्रजातिवत् ।
[1]विप्रः छन्दश्च गायत्रीत्यभेदः कथ्यते तयोः ॥

॥ †वागनुष्टुप् ॥

अनुष्टुबिति वाङ्नामसु पाठादभेदो वाचोऽनुष्टुभश्च ।

एवञ्च—

॥ §ब्रह्मणैव तद्वाचं सन्दधाति ॥

तत् टालुक् । तेन विशोविशीयेन विप्रजातया वाचं संश्लेषयति । वाग्मी विप्रः प्रवचनमार्त्विज्यं चरेदिति ।

॥ $अबोध्यग्निः समिधा जनानामिति कीर्तिकामः ॥

---

1. 'विप्रञ्छ' Mss.

---

* वैजयन्त्यां द्व्यक्षरकाण्डे नानालिङ्गाध्याये श्लो० ५३.

† 'येऽयं तृचगतानुष्टुप् सा वाग्रूपा चतुष्पात्त्वसाम्यात् । "चत्वारि वाक्परिमिता पदानि" [ऋक्सं० १. १६४. ४५.] इति वाचः पादचतुष्टयमाम्नातम् । परा पश्यन्ती मध्यमा वैखरीत्युक्तं तत्पादचतुष्टयमन्यैर्व्याख्यातम् । अनुष्टुभस्तु चतुष्पात्त्वं प्रसिद्धम् ।' इति सायणः ।

§ 'एवं सत्यस्मिन् सूक्ते गायत्र्यनुष्टुभोर्मेलने सति तन्त्रेण सूक्तपाठेन ब्रह्मणैव वाचं संयोजयति' इति सायणः ।

$ ऋक्सं० ५. १. १.

कीर्तिर्यशः । द्वादशर्चमिदम् । आज्ये कुर्यादित्येव ।

॥ *होताजनिष्ट चेतन इति प्रजापशुकामः ॥

आज्ये कुर्यादित्येव । अष्टर्चमिदम् ।

अभ्यर्हिता प्रजा पूर्वनिपातं पशुतोऽभजत् ।
सूक्तग्रहोऽत्र सर्वत्र परागेकादिलिङ्गतः ॥

प्रथमः खण्डः ।

॥ §अग्निं नरो दीधितिभिररण्योरित्यन्नाद्यकामः ॥

आज्ये कुर्यादित्येव ।

आद्यं भक्ष्यं प्रधानत्वादन्नस्यात्र पृथग्ग्रहः ।
कामाः सर्वत्र यष्टॄणां पञ्चविंशत्यृचं त्विदम् ॥

आभिरूप्यमाह—

॥ अग्निर्वा अन्नादः ॥

---

१. 'कः' क. ग.

---

* ऋक्सं० २. ५. १. § ऋक्सं० ७. १. १.

अत्ति ह्यग्निर्हुतं हव्यं जाठरोऽन्नं पचत्यपि ।

अस्य सूक्तस्यान्येभ्यो विशेषमाह—

॥ चिरतरमिव वा इतरेष्वाज्येष्वग्निमागच्छन्त्यथेह मुखत एवाग्निमागच्छन्ति ॥

अग्निन्नरीयादन्येषु प्र वो देवादिकेषु तु ।
अधीत्य कानिचित् पश्चादग्निशब्दमधीयते ॥
इह त्वादित एवाग्निमागमेनोपयान्ति हि ।

त्वर्थेऽथेति ।

ततश्च—

॥ मुखतोऽन्नाद्यमश्नुते ॥

सत्रिगणः ।

॥ मुखतः पाप्मानमपघ्नते ॥

आदावग्नेः पावकस्य श्रुतेः पापस्य बाधनम् ।
हनेर्लटो झेर्झश्शब्लुगुपधालोपतः कुघः ॥

किञ्च,

॥ *हस्तच्युती जनयन्तेति जातवत् ॥

---

१. 'बु' क. ग. घ.　　　२. 'झर्झेश्श' क. ग. घ.

---

* ऋक्सं० ७. १. १.

जनिधातुमत् सूक्तम् ।

॥ एतस्माद्वा अह्नो यजमानो जायते तस्माज्जातवत् ॥

वै यस्माद् जायते प्रकाशते तस्माज्जातवत् समृद्धम् ।

सूक्तं सप्तत्रिष्टुबन्तं विराळष्टादशादिकम् ।
बृहत्यनुष्टुप्सम्पत्त्या चतुश्छन्दस्कमुच्यते ॥

अवयुत्यानुवादेन त्रिद्विच्छन्दस्कमेव च ।
*"ता अभी"त्युत्तरत्रैतद्वक्ष्यतेऽत्र तदाश्रयात् ॥

संख्याविशेषानाश्रित्य गुणानाह प्ररोचयन् ।

॥ तानि चत्वारि छन्दांसि भवन्ति ॥

यानि वक्ष्यन्ते ¶तानि विराट्त्रिष्टुब्बृहत्यनुष्टुभः ।

॥ चतुष्पादा वै पशवः ॥

अन्त्यालोपः छान्दसश्चतुष्पादा इति ।

ततश्च सचतुस्संख्यायोगः—

॥ पशूनामवरुद्ध्यै ॥

भवेदिति शेषः । अवरोधः प्राप्तिः ।

---

* "ता अभिसम्पद्यन्ते" इत्यस्मिन्नेव खण्डे वक्ष्यते ।

¶ 'एकादशाक्षरा त्रिष्टुप्' इति श्रुत्यन्तरादेकैकस्मिन्पाद एकैकं त्रिष्टुबाख्यं छन्दोऽस्ति । ततश्चतुर्षु पादेषु चत्वारि त्रिष्टुप्छन्दांसि सम्पद्यन्ते । ' इति सायणः ।

तथावयुत्य—

॥ *तानि त्रीणि छन्दांसि भवन्ति ॥

विराड्बृहतीत्रिष्टुभः विराडनुष्टुप्त्रिष्टुभो वा ।

॥ त्रयो वा इमे त्रिवृतो लोकाः ॥

भूद्युखाख्यास्त्रयो लोकास्त्रिवृतास्त्रिषु ते त्रयः ।
उपकारकरूपेण वर्तन्ते वर्षणादिभिः ॥

अतः सत्रित्वयोगः—

॥ एषामेव लोकानामभिजित्यै ॥

भवेत् । अभिजितिः प्राप्तिः ।

॥ ते द्वे छन्दसी भवतः ॥

स्वतस्सिद्धे विराट्त्रिष्टुभौ ।

एतच्च,

॥ प्रतिष्ठाया एव ॥

स्यात् ।

---

* 'यथा "चतुष्पदा त्रिष्टुप्" "एकादशाक्षरा त्रिष्टुप्" इति श्रुत्योः पादसंख्याक्षरसंख्या च श्रुता तथा "त्रिपदा विराट्" "दशाक्षरा विराट्" इति श्रुत्योः संख्याद्वयं श्रुतम् । ततस्त्रिष्वपि पादेषु दशाक्षरसंख्याकानि त्रीणि विराट्छन्दांसि सम्पद्यन्ते' इति सायणः ।

कथम्,

॥ द्विप्रतिष्ठो वै पुरुषः ॥

*'घञर्थे कविधानं' §'स्थास्नापे'ति करणेऽत्र के ।
पादौ प्रतिष्ठौ द्वौ यस्य स द्विपाद् द्विप्रतिष्ठकः ॥

ततः किम्,

॥ चतुष्पादाः पशवः ॥

ततश्च,

॥ यजमानमेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ॥

तद् द्विच्छन्दस्त्वं[1] कर्तृ ।

॥ ताः परागवचनेन पञ्चविंशतिर्भवन्ति ॥

अग्निवरीयात्यसूक्ते ता ऋचः पञ्चविंशतिः ।
भवन्तीह[2] पराक्छन्दोऽप्यनभ्यासस्य वाचकः ॥

॥ पञ्चविंशोऽयं पुरुषः[3] ॥

1. 'न्दस्कं' ख.   2. 'न्ति ह' क. ग.

3. 'षो दशहस्त्या अङ्गुलयो दश पाद्याः । पञ्चविंशतेः पूरणोऽयं पुरुषाधिकारी । विंशत्यादिभ्यस्तमडन्यतरस्यामिति तमडभावे डटि तिर्विंशतेर्डितीति । हस्तयोर्भवाः । शरीरावयवाच्चेति यत् । अङ्गुलय इत्येव । पादयोर्भवाः । कथम् । द्वा' कपाठः । 'षः । पञ्चविंशतेः पूरणोऽयं पुरुषाधिकारी । विंशत्यादिभ्यस्तमडन्यतरस्यामिति तमडभावे डटि तिर्विंशतेर्डितीति । कथम् । दशहस्त्या अङ्गुलयो दश पाद्याः । हस्तयोर्भवाः । शरीरावयवाच्चेति यत् । अङ्गुलय इत्येव । पादयोर्भवाः द्वा' गपाठः ।

* पा० सू० वा० ३. ३. ५८.   § पा० सू० भा० ३. ३. ५८.

पञ्चविंशतेः पूरणोऽयं पुरुषोऽधिकारी । *'विंशत्यादिभ्यस्त-मडन्यतरस्याम्'इति तमडभावे डटि§'ति विंशतेर्डिति' ।

कथम्,

॥ दश हस्त्या अङ्गुलयः ॥

हस्त्याः हस्तयोर्भवाः ¶'शरीरावयवाच्च' इति यत् ।

॥ दश पाद्याः ॥

अङ्गुलय इत्येव । पाद्याः पादयोर्भवाः ।

॥ द्वा ऊरू द्वौ बाहू ॥

इति चतुर्विंशतिः ।

॥ आत्मैव पञ्चविंशः ॥

आत्मा मध्यमः कायः । एव पुनः ।

†'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि ।
यत्नेऽर्केऽग्नौ मतौ वातेऽपी'ति नैघण्टुका विदुः ॥

* पा० सू० ५. २. ५६.

§ पा० सू० ६. ४. १४२.

¶ पा० सू० ४. ३. ५५.

† वैजयन्त्यां ग्रक्षरकाण्डे पुंलिङ्गाध्याये श्लो० ६, ७.

॥ तमिममात्मानं पञ्चविंशं संस्कुरुते ॥

महत्त्वप्राप्तियोग्यत्वं पञ्चविंशतिसंख्यया ।

सम्पादयतीत्यर्थः ।

॥ अथो पञ्चविंशं वा एतदहः ॥

अथो अपि च । एतद् महाव्रतम् । *यज्ञगाथापाठे पञ्चविंश-मन्त्यत्वात् ।

किञ्च,

॥ पञ्चविंश एतस्याह्नः स्तोमः ॥

स्तोमेऽथ विधिः पञ्चविंशाद्यर्थमिति डः ।

॥ तत् समेन समं $प्रतिपद्यते ॥

तत् तत्र । अह्नः सूक्तस्य च पञ्चविंशतिसंख्यया समत्वम् । प्रतिपत्तिरारम्भः ।

॥ तस्माद् द्वे एव पञ्चविंशतिर्भवन्ति ॥

यस्मात् समे इति शेषः । यस्मादृचः पञ्चविंशतिर्भवन्ति तस्माद् द्वे

---

* आ० श्रौ० सूत्रे (८. २३. १२.) यज्ञगाथा दृश्यते ।

$ 'प्राप्नोति' इति सायणः ।

सूक्तमहश्च समे भवत इत्यर्थः ।

॥ तास्त्रिः प्रथमया त्रिरुत्तमयै*कयानत्रिंशत् ॥

विनार्थे नञ् ।

विनैकया त्रिंशदच आद्यान्त्यात्रित्वयोगतः ।

ततश्च,

॥ न्यूनाक्षरा विराट् ॥

लुप्तोपमम् । दशकास्त्रयो विराट् इति त्रिंशदक्षरा विराडस्ति । न्यूनाक्षरयेयम् । त्रिंशत्संख्यैकोनेत्यर्थः । विराट्साम्योक्तिश्च §'विराजान्नाद्यकाम' इत्यादिविराडन्वयिफला[1]न्वयार्था ।

ऊनतां स्तौति—

॥ न्यूने वै रेतस्सिच्यते ॥

न्यूने सङ्कुचिते स्थाने योनौ रेतो निषिच्यते ।

किञ्च,

॥ न्यूने प्राणाः ॥

प्राणादयः सूक्ष्मदेशे वर्तन्ते खलु सर्वदा ।

---

१. 'लार्था' ख.

---

* 'एकयर्चा न सम्पूर्णा त्रिंशदित्येकयानत्रिंशत' इति सायणः ।

§ ऐ० ब्रा० १. १. ५.

॥ न्यूनेऽन्नाद्यं प्रतिष्ठितम् ॥

गर्ताकारे हि जठरे भुक्तमन्नादि तिष्ठति ।

अतस्तन्न्यूनत्वम्,

॥ एतेषां कामानामवरुद्ध्यै ॥

स्यात् । कामः । कर्मणि घञ् । काम्यानां पूर्वोक्तैरेतःप्राणान्ना-द्यानाम् ।

॥ एतान्कामानवरुन्धे य एवं वेद ॥

यो वेत्ति सोऽप्यवरुन्धे, प्राप्नुयात् ।

रुधेर्लिङो लटस्तः *श्नसोरल्लोपो §झषस्तथोः ।

अत्र सूक्ते या ऋचः,

॥ ता अभिसम्पद्यन्ते बृहतीञ्च विराजं च
छन्दो यैतस्याह्नस्सम्पत्ताम् ॥

अभिसम्पद्यन्ते प्राप्नुवन्ति । विराट्त्रिष्टुम्मेलनेन तां बृहतीञ्च ।

---

१. 'स्पत् । अभि' क. ख.   २. 'लने तां' ग.

---

* पा० सू० ६. ४. १११.

§ पा० सू० ८. २. ४०.

या बृहती सा। *एतस्याह्नः। टार्थे ङस्[1]द्वयम्। एतेनाह्ना। सम्पत्। कर्मणि क्विप्। &‘बृहतीसहस्रं सम्पन्नम्’ इति सम्पत्त्या प्राप्यते। विराजं च छन्दः स्वत एव। चकारात् त्रिष्टुभश्च स्वत एव।

सप्तत्रिष्टुब्वर्णसंख्या साष्टकं तु शतत्रयम्।
अष्टादश विराजश्च षड्नं षट्छतं त्विति॥
विराट्त्रिष्टुम्मेलनाद् द्विबृहत्यः पञ्चविंशतिः।

॥ अथो[2] अनुष्टुभम्॥

अभिसम्पद्यन्त इत्येव।

सम्पदानुष्टुभश्चात्र नवविंशतिरेव च।

अनुष्टुप्सम्पत्तेराभिरूप्यमाह—

॥ अनुष्टुबायतनानि ह्याज्यानि॥

प्रायेण ह्याज्यशस्त्राणि स्थानमाहुरनुष्टुभः।
इत्थमग्निं नरीयन्तु सूक्तमाज्ये व्यवस्थितम्॥
सूत्रकारोऽप्येतमर्थं चतुर्थे सूत्रयिष्यति।

§‘आज्यप्रउगे विश्वजितः’। ‡‘विश्वजितोऽग्निं नर इत्याज्यम्’

---

१. ‘ङू’ Mss. २. ‘तामथो’ क. ग. झ. म.

---

* ‘एवं सत्येतस्य महाव्रतस्याह्नोऽपेक्षिता या सम्पत्ता प्राप्ता भवन्ति’ इति सायणः। & ऐ० आ० २. २. ४.

§ ऐ० आ० ४. १. १. ‡ आ० श्रौ० सू० ८. ७. १.

3

इति च ।

द्वितीयः खण्डः ।

सूक्तात् प्राक् तु निविन्नित्या ह्यग्निर्देवेद्ध* आदिका ।
इत्याज्यमुक्त्वा प्रउगं द्वितीयं प्रब्रवीत्यथ ॥

॥ गायत्रं प्रउगं कुर्यादित्याहुः ॥

ब्रह्मवादिनः ।

गायत्र्येव हि गायत्रं स्वार्थे 'तस्येद'$मण् तु वा ।
ऋषिच्छन्दोऽभिधानं तु तृचापेक्षमिति स्थितिः ॥
पुरोरुचः सदा सप्ततृचेभ्यः प्राक् स्युरेव हि ।

॥ तेजो वै ब्रह्मवर्चसं गायत्री ॥

साध्यसाधनयोरभेदोक्तिः आयुर्घृतमितिवत् ।

तेजो दीप्तिर्वृत्तवेदसम्पत्तिर्ब्रह्मवर्चसम् ।

॥ तेजस्वी ब्रह्मवर्चसी भवतीति ॥

इति हेतुं वेदन्त[1] आहुः ।

---

१. 'वेदन्तु' क., 'वेदन्त' ग.

---

* आ० श्रौ० सू० ५. ९. १२. $ पा० सू० ४. ३. १२०.

*वायवा याहि सूक्ते द्वे &वायो ये ते सहस्रिणः ।

इति वा ।

ब्राह्मणोक्तमिदन्त्वेवमुत्तरत्रापि वक्ष्यते ॥

॥ औष्णिहं प्रउगं कुर्यादित्याहुः ॥

उष्णिह उत्सादित्वादत् ।

उक्तं हि—

अनुष्टुबुष्णिक्त्रिष्टुप् च जगती पङ्क्तिरेव च ।
उत्सादित्वादजेभ्यः स्याद्दीव्यता प्रागणन्यतः ॥

इति । † वायो याहि शिवा दिव इत्यादि ।

॥ आयुर्वा उष्णिक् ॥

ऊर्ध्वं स्नेहयुक्तमित्यायुष उष्णिक्त्वम् ।

॥ आयुष्मान्भवतीति । आनुष्टुभं प्रउगं कुर्यादित्याहुः ॥

§वायो शुक्रो अयामि ते इत्यादि ।

॥ क्षत्रं वा अनुष्टुप् क्षत्रस्याप्त्या इति ॥

---

* ऋक्सं० ५. ५१. ५.   & ऋक्सं० २. ४१. १.

† ऋक्सं० ८. २६. २१.   § ऋक्सं० ४. ४७. १.

क्षत्रं बलं नृपर्द्धिर्वा धनं वाप्तिस्तु सङ्गमः ।

॥ बार्हतं प्रउगं कुर्यादित्याहुः ॥

*आ नो यज्ञं दिविस्पृशम् इत्यादि ।

॥ श्रीर्वै बृहती ॥

श्रीः सम्पत् ।

॥ श्रीमान् भवतीति । पाङ्क्तं प्रउगं कुर्यादित्याहुः ॥

तिः पञ्चनोऽन्त्यलोपे चः को नो ङः पङ्क्तिरुच्यते ।

पाङ्क्तं मृग्यम् ।

॥ अन्नं वै पङ्क्तिः ॥

पञ्चधान्नं खाद्यपेयचोष्यलेह्यानुरूपतः ।

॥ अन्नवान् भवतीति । त्रैष्टुभं प्रउगं कुर्यादित्याहुः ॥

§ आ वायो ¶कुविदङ्ग प्रैतत्त्रैष्टुभप्रउगत्रयम् ।

॥ वीर्यं वै त्रिष्टुप् ॥

---

* ऋक्सं० ८. १०१. ९.

§ ऋक्सं० ७. ९२. १. ¶ ऋक्सं० १०. ६४. १३.

सृष्टौ वीर्यवत्क्षत्रिययोगात्त्रिष्टुभो वीर्यत्वम् ।

॥ वीर्यवान् भवतीति । जागतं प्रउगं कुर्यादित्याहुः ॥

जागतं प्रउगं नोक्तं मृग्यं तत् पाङ्क्तवद्भवेत् ।

॥ जागता वै पशवः ॥

पशूनां जगत्याहृतत्वात् । ब्राह्मणेऽभ्यध्यगीष्महि §'जगती हि तानाहरत्' इति ।

॥ पशुमान् भवतीति ॥

इति हेतुं वदन्त आहुः ।

सिद्धान्तयति—

॥ तदु गायत्रमेव कुर्यात् ॥

प्रउगमित्येव । विधारणे सुपो लुक् । तेषु छन्दस्सु मध्ये । उ साधु ।

॥ ब्रह्म वै गायत्री ॥

विप्रजात्या सह सृष्टेः ।

---

१. 'ह्यध्य' ख.

---

§ ऐ० ब्रा० १३. १.

॥ ब्रह्मैतदहः ॥

ब्रह्मोपलब्धिहेतुत्वात् ।

॥ ब्रह्मणैव तद् ब्रह्म प्रतिपद्यते ॥

तत् तत्र । प्रतिपद्यते प्राप्नोति ।

अन्यत्त्यक्त्वा गायत्रं कुर्वन्—

॥ तदु माधुच्छन्दसम् ॥

कुर्यादित्येव । यन्माधुच्छन्दसं तदु तदेव ।

*वायवा या तृचास्सप्त माधुच्छन्दसमुच्यते ।
वैश्वामित्रो मधुच्छन्दा ददर्श प्रउगन्त्विदम् ॥

मधुच्छन्दश्शब्दं निराह—

॥ मधु ह स्म वा ऋषिभ्यो §मधुच्छन्दाश्छन्दति
तन्मधुच्छन्दसो मधुच्छन्दस्त्वम् ॥

मधु स्वादु । सरसमित्यर्थः । ऋषिभ्यः स्वशिष्यभूतेभ्यः । छन्दति ह स्म उपादिदेश व्याचक्षाणः ।

॥ अथो ¶अन्नं वै मधु ॥

---

* ऋक्सं० १. २. १. § ‘ मधु छन्दति मधुरं भोग्यं सम्पादयितुमिच्छति ’ इति सायणः ।

¶ ‘ माक्षिकवाची मधुशब्दस्तद्विशिष्टं प्रियत्वं लक्षयति । अन्नस्य प्रियत्वं प्रसिद्धम् । तद्वदन्नादेः सर्वस्यापि भोग्यस्य प्रियत्वं प्रसिद्धम् । ’ इति सायणः ।

अथो अपि च। अन्नं सर्वेभ्यः स्वादुतमम्।

॥ सर्वं वै मधु ॥

यन्मधु तत् सर्वं प्राप्यम्। सर्तेः कर्मणि वन्।

तथा,

॥ सर्वे वै कामा मधु ॥

गायत्र्यादिजगत्यन्तच्छन्दस्सप्तकवर्तिनः।
तेज आद्यास्तु पश्वन्ता मधु स्वादुरसं मताः॥

॥ तद्यन्माधुच्छन्दसं शंसति सर्वेषां कामानामवरुद्ध्यै ॥

शंसतीति यत् तत् सर्वकामावाप्तये स्यात्।

किञ्च,

॥ सर्वान्कामानवरुन्धे य एवं वेद ॥

उक्तार्थम्।

पुनः स्तौति—

॥ *तद्धैकाह्निकम ॥

उ खलु। एकाहे प्रकृतौ भवम्। §'क्रतुयज्ञेभ्यश्च' इति ठञ्। मय उञो वः।

---

* 'तदु तदपि' इति सायणः। § पा० सू० ४. ३. ६८.

॥ रूपसमृद्धम् ॥

क्रियमाणकर्माभिवदनसमृद्धं च ।

यथैकाहिकं[1] ततः किम्,

॥ बहु वा एतस्मिन्नहनि किञ्च किञ्च वारणं
क्रियते शान्त्या एव ॥

बहु विपुलम् । किञ्च किञ्च किञ्चित्किञ्चित् । *वारणं निरोधः । औपदेशिकैरातिदेशिकनिवृत्तिः । अत्र क्रियते । तत्रैतत् शान्त्यै स्यात् ।

कथम्,

॥ शान्तिर्वै प्रतिष्ठैकाहः ॥

शान्तिरभ्यस्तरूपे पाटवात् । प्रतिष्ठात्वं सर्वोत्पत्तिस्थानत्वात् ।

॥ शान्त्यामेव तत्प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति ॥

तत् टालुक् । तेनैकाहिकेन । अन्ततः औपदेशिकानां समीपे । प्रतितिष्ठन्ति । सत्रिणः ।

---

१. 'यदेका' क. ग.

---

* 'वारणं शिष्टैर्निवारणीयं वर्जनीयं किमपि बहुविधं दासीवृत्तबटुमैथुन-ब्रह्मचारिपुंश्चलीसंप्रवादादिकं क्रियतेऽतस्तस्य शान्त्यर्थमेव सरूपसमृद्धस्यैकाहिकस्य प्रउगशंसनम् ।' इति सायणः ।

॥ प्रतितिष्ठति य एवं वेद ॥

सोऽपि।

॥ येषां चैवं विद्वानेतद्धोता शंसति ॥

तेऽपि सत्रिणो विद्वांसोऽपि प्रतितिष्ठन्ति।

तृतीयः खण्डः।

अथ सूक्तद्वयस्थांस्तु तृचान् सप्त स्वरूपतः।
उपादाय स्तौति वायव्याद्यान् सारस्वतान्तकान् ॥

॥ *वायवा याहि दर्शत ॥

इति वायव्यं तृचं शंसतीति शेषः।

अत्र,

॥ इमे सोमा अरंकृता इति ॥

पर्याप्त्यर्थमरमिति पदमस्ति।

॥ एतद्वा अहरहं यजमानाय देवेभ्यश्च ॥

---

* ऋक्सं० १. २. १.

यजमानायेति गणापेक्षं गृहपत्यपेक्षं वैकत्वम् ।

॥ अरं हास्मा एतदहर्भवति य एवं वेद ॥

अस्मै वेदित्रे । अरम् अलम् ।

॥ येषां चैवं विद्वानेतद्धोता शंसति ॥

तेभ्यः सत्रिभ्यश्चाहरलम् ।

॥ *इन्द्रवायू इमे सुताः ॥

इति तृचमैन्द्रवायवं शंसति ।

अत्र,

॥ आ यातमुपनिष्कृतमिति ॥

निष्कृतमित्यस्ति ।

निरिति समोऽर्थ इत्याह—

॥ यद्वै निष्कृतं तत्संस्कृतम् ॥

ततश्च,

॥ आ हास्येन्द्रवायू संस्कृतं गच्छतो य एवं वेद ॥

---

* ऋक्सं० १. २. ४.

*'उभयत्र वायोः प्रतिषेधो वक्तव्य' इति नानङ्। आगच्छतो ह संस्कृतं हविरत्तुम्। हशब्दोऽविलम्बनार्थः। अस्य सत्रिगणस्य।

॥ येषां चैवं विद्वानेतद्धोता शंसति ॥

तेषाञ्च।

॥ †मित्रं हुवे पूतदक्षम् ॥

इति मैत्रावरुणं तृचं शंसति।

अत्र,

॥ धियं घृताचीं साधन्तेति ॥

[1]धीघृताचीशब्दौ भवतः।

॥ वाग्वै धीर्घृताची ॥

घृतं जलं तदञ्चति। धीः व्यापारयुक्ता स्तनयित्नुरूपा सा वाक्।

॥ वाचमेवास्मिंस्तद्दधाति य एवं वेद ॥

अस्मिन् वेदितरि। तत् तस्मात्।

---

१. 'धीर्घृ' क. ख. घ.

---

* पा० सू० वा० ६. ३. २६.   † ऋक्सं० १. २. ७.

॥ येषां चैवं विद्वानेतद्धोता शंसति । *अश्विना यज्वरीः ॥

इत्याश्विनं तृचं शंसति ।

अत्र,

॥ इष इति ॥

पदमस्ति ।

॥ अन्नं वा इषः ॥

कर्मणि क्विपि सोऽर्जस् ।

तत् पदम्,

॥ अन्नाद्यस्यावरुद्ध्यै ॥

स्यात् ।

॥ आ यातं रुद्रवर्तनी इति ॥

चास्ति ।

॥ आ हास्याश्विनौ यज्ञं गच्छतो य एवं वेद ॥

आगच्छतो ह ।

---

* ऋक्सं० १. ३. १.

॥ येषां चैवं विद्वानेतद्धोता शंसति । *इन्द्रा याहि चित्रभान-
§विन्द्रा याहि धियेषित ‡इन्द्रा याहि तूतुजान इति ॥

ऐन्द्रीस्तिस्रः शंसन्,

॥ आयाह्यायाहीति शंसति ॥

होता ।

॥ आ हास्येन्द्रो यज्ञं गच्छति य एवं वेद ॥

आगच्छति ह ।

॥ येषां चैवं विद्वानेतद्धोता शंसति ।
¶ ओमासश्चर्षणीधृतः ॥

इति वैश्वदेवं तृचं शंसति ।

अत्र,

॥ विश्वे देवास आ गतेति आ हास्य विश्वे देवा हवं
गच्छन्ति य एवं वेद ॥

---

१. 'ओमासश्चर्षणीधृतो विश्वेदेवास आगतेति ॥ इति वैश्वदेवं तृचं शंसति । अत्र, ॥ आ हास्य विश्वे देवा हवं गच्छन्ति य एवं वेद ॥ ॥ येषाञ्चैवं ' क. ग.

---

* ऋक्सं० १. ३. ४.
‡ ऋक्सं० १. ३. ६.
§ ऋक्सं० १. ३. ५.
¶ ऋक्सं० १. ३. ७.

हवं यज्ञम् । आगच्छन्ति ह ।

॥ येषां चैवं विद्वानेतद्धोता शंसति ॥[1]

अत्र,

॥ दाश्वांसो दाशुषः सुतमिति यदाह ददुषो ददुषः सुतमित्येव तदाह ॥

दाशुष इति पदं ददुष इत्यनेन व्याख्यातम् ।

ददुषः—

दाञः क्वसुर्ङसाल्लोपः षो *'वसोस्सम्प्रसारणम्' ।

दत्तवतः ।

॥ ददति ह्यस्मै तं कामं देवा यत्काम एतच्छंसति ॥

ददति—

दाञो झि शप्छ (वस्त ? पः श्लुर) भ्यस्ताल्लोपः '†आभ्यस्तयो'रिति ।

प्रयच्छन्ति ह य एतच्छंसति अस्मै तं कामं देवाः । यत्कामः यं कामयते । §'शीलिकामि' इति णः ।

---

१. 'ति ॥ दाश्वांसो' क. ग.

---

* पा० सू० ६. ४. १३१.　　† पा० सू० ६. ४. ११२

§ पा सू० वा० ३. २. १.

॥ य एवं वेद ॥

अस्मै ददतीत्येव।

॥ येषां चैवं विद्वानेतद्धोता शंसति। *पावका नः सरस्वती ॥

इति सारस्वतं तृचं शंसति।

अत्र,

॥ यज्ञं वष्टु धियावसुरिति ॥

अस्ति।

॥ वाग्वै धियावसुः ॥

धिया बुद्ध्या कर्मणा वा वाग्धयाच्छादनकारिणी।
वाक्प्रेरिता ह्यनिष्टानि छादयन्ति सुतादवः ॥
[1]वसेराच्छादनार्थाद्[2]दुर्धियष्टेय(ङ्ीङ)लुक् तथा।

॥ वाचमेवास्मिंस्तद्दधाति य एवं वेद ॥

अस्मिन् वेदितरि। तत् धियावसुपदम्। दधाति स्थापयति।

---

१. 'वसोरा' क. ग. २. 'दु धियतष्टयङ्लुक्' क. " दुर्धियष्टे-यङ्लुक्' ख. 'दु धियस्तष्टयङ्लुक्' ग. 'दु ढियष्टेऽयङ्लुक्' घ.

---

* ऋक्सं० १. ३. १०.

॥ येषां चैवं विद्वानेतद्धोता शंसति ॥

अत्र,

॥ यज्ञं वष्ट्विति यदाह यज्ञं वहत्वित्येव तदाह ॥

वश कान्तौ लोट् तिबेरुश्छशां षे स्तोः ष्टुना ष्टु च ।
वहत्वित्यर्थतो व्याख्या छन्दस्त्वाद्वा वहेर्भवेत् ॥

एवं विविच्य स्तुत्वा पुनः मिलित्वा स्तौति—

॥ ताः पराग्वचनेनैकविंशतिर्भवन्ति ॥

ताः सप्ततृचस्था ऋचः ।

तथा,

॥ एकविंशोऽयं पुरुषः ॥

डटि *'ति विंशतेर्डितिः' ।

कथम्,

॥ दश हस्त्या अङ्गुलयो दश पाद्याः आत्मैकविंशः ॥

मध्यमः कायः ।

॥ तमिममात्मानमेकविंशं संस्कुरुते ॥

---

* पा० सू० ६. ४. १४२.

एकविंशतिसंख्यया[1] ।

एवमनभ्यासेन स्तुत्वा अथाभ्यासेन स्तौति—

॥ तास्त्रिः प्रथमया त्रिरुत्तमया पञ्चविंशतिर्भवन्ति ॥

तथा,

॥ पञ्चविंश आत्मा पञ्चविंशः प्रजापतिः ॥

एतत्[2] च प्रजापतेरपि पुरुषाकारत्वात् ।

कथम्,

॥ दश हस्त्या अङ्गुलयो दश पाद्याः द्वा ऊरू द्वौ बाहू आत्मैव पञ्चविंशः। तमिममात्मानं पञ्चविंशं संस्कुरुते। अथो पञ्चविंशं वा एतदहः पञ्चविंश एतस्याह्नः स्तोमः तत्समेन समं प्रतिपद्यते। तस्माद्द्वे एव पञ्चविंशतिर्भवन्ति भवन्ति ॥

उक्तार्थानि । द्विरुक्तिरध्यायपरिसमाप्तिसूचनार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां महाव्रते
प्रथमोऽध्यायः ।

---

१. 'संख्यायाः ए' क. ख. ग.　२. 'एतत् प्र' क. ख. ग.

आज्यप्रउगशस्त्रे द्वे प्रातस्सवन ईरिते ।
अतो मरुत्वतीयाख्यम्माध्यन्दिन इहोच्यते ॥

॥ *आ त्वा रथं यथोतय $^{\$}$इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ ॥

स्याताम् । तृचाः प्रतिपदनुचरा इति तृचौ ।

तौ च,

॥ ऐकाहिकौ रूपसमृद्धौ बहु वा एतास्मिन्नहनि किञ्च किञ्च वारणं क्रियते शान्त्या एव । शान्तिर्वै प्रतिष्ठैकाहः । शान्त्यामेव तत्प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति । प्रतितिष्ठति य एवं वेद । येषांचैवं विद्वानेतद्धोता शंसति[1] ॥

प्रकृतौ । एतदिति नपुंसकैकत्वं सामान्यापेक्षम् ।

प्रगाथमाह—

॥ §इन्द्र नेदीय एदिहि ॥

इति शंसतीति शेषः ।

वालखिल्यासु पठितो द्वृचोऽयं प्रग्रथने तृचः ।

---

१. 'ति ॥ एतदिति' ख. ग. घ.

---

* ऋक्सं० ८. ६८. १. $ ऋक्सं० ८. २. १.

§ ऋक्सं० ८. ५३. ५.

एवमुत्तरत्रापि द्व्यृचतृचत्वम्।

आद्ययोर्द्व्यृचतृचत्वादि "*तास्सप्तनवति' श्रुतेः।

सन्द्रष्टव्यं ब्राह्मणादपि।

अत्र,

॥ प्रसूतिरा शचीभिर्ये त उक्थिन इति ॥

अस्ति।

तत्र,

॥ उक्थं वा एतदहः ॥

उक्थिन् इति पदे प्रकृतिर्यदुक्थं तन्महाव्रतम्। उक्थमिति बृहतीसहस्रम्।

॥ उक्थवद्रूपसमृद्धम् ॥

यदुक्थवदस्य रूपेण वपुषा समृद्धिः स्यात् ततश्चेदम्—

॥ एतस्याह्नो रूपम् ॥

महाव्रतस्यात इदं रूपमनुरूपं योग्यम्।

इन्द्रनिह्वहादनन्तरं,

---

१. 'तिस्त्वेन य' ख. २. 'रूपं योग्यम्' क. ग.

---

* ऐ० आ० १. २ २.

॥ *प्रैतु ब्रह्मणस्पतिः ॥

ब्राह्मणस्पत्यं प्रगाथं दूवृचतृचं शंसति।

अत्र,

॥ अच्छा वीरमिति ॥

वीरपदमस्ति।

॥ वीरवद्रूपसमृद्धमेतस्याह्नो रूपम् ॥

सत्रिणा पुत्रसमृद्धिप्रतिपादनेन।

॥ §उत्तिष्ठ ब्रह्मणस्पते ॥

इति द्वितीयं ब्राह्मणस्पत्यं दूवृचतृचं शंसेत्।

अत्र,

॥ सुवीर्यमिति ॥

वीर्यपदमस्ति।

॥ वीर्यवद्रूपसमृद्धमेतस्याह्नो रूपम् ॥

---

१. 'तत्र' ख.

---

* ऋक्सं० १. ४०. ३. § ऋक्सं० १. ४०. १.

वीर्यवत्कर्तृसम्बन्धात् ।

॥ *प्र नूनं ब्रह्मणस्पतिः ॥

इति तृतीयं ब्राह्मणस्पत्यं दृचतृचं शंसेत् ।

अत्र,

॥ मन्त्रं वदत्युक्थ्यमिति ॥

उक्थ्यप्रकृतिरुक्थमित्यस्ति ।

॥ उक्थं वा एतदहः उक्थवद्रूपसमृद्धमेतस्याह्नो रूपम् ॥

अथ धाय्या आह—

॥ §अग्निर्नेता ॥

इति धाय्यामेकां शंसेत् ।

अत्र,

॥ स वृत्रहेति ॥

अस्ति ।

एतच्च,

---

१. 'ता स वृत्रहेति ॥ इति धाय्यामेकां शंसेत् । अत्र, ॥ स वृत्रहेति ॥ एतच्च, क. ख. ग.

---

* ऋक्सं० १. ४०. ५. § ऋक्सं० ३. २०. ४.

॥ वार्त्रघ्नम् ॥[1]

वृत्रस्य हन्तुर्वाचकम् । वृत्रं हतवान् । क्विप् । अण् । *'षपूर्वहन्' इत्यल्लोपः । §'हो हन्तेः' इति कुत्वम् । आदिवृद्धिः ।

एतच्च,[2]

॥ इन्द्ररूपम् ॥

इन्द्रार्हम् । इन्द्रो हि वृत्रहा ।

॥ ऐन्द्रमेतदहः एतस्याह्नो रूपम् ॥

‡इन्द्रप्रीतिकरत्वादिन्द्रप्राप्त्यर्थत्वाच्च ।[3]

। †त्वं सोम क्रतुभिः सुक्रतुर्भूः ॥

इति द्वितीयां धाय्यां शंसेत् ।

अत्र,

॥ त्वं वृषा वृषत्वेभिर्महित्वेति ॥

वृषेत्यस्ति ।

॥ वृषण्वद्वा इन्द्रस्य रूपम् ॥

---

१. '॥ वार्त्रघ्नमिन्द्ररूपम् ॥ वृत्रस्य' क. ख. ग.
२. 'एष इन्द्रार्हं' क. 'एष इन्द्रो हि' ग. ३. 'न्द्रप्रतीति' क. ग.

---

* पा० सू० ६. ४. १३५. § पा० सू० ७. ३. ५४.
‡ 'इन्द्रदेवताकं चैतदहः' इति सायणः । † ऋक्सं० १. ९१. २.

मतुपि कृते *'अनो नुट्'। तस्यासिद्धत्वाद्धत्वम्। अपदान्तत्वाच्च णत्वम्।

॥ ऐन्द्रमेतदहः एतस्याह्नो रूपम्। §पिन्वन्त्यपः॥

इति तृतीयां धाय्यां शंसेत्।

अत्र,

॥ अत्यं न मिहे विनयन्ति वाजिनमिति॥

वाजिनमित्यस्ति।

॥ वाजिमद्वा इन्द्रस्य रूपम्॥

[1]वाजिनमन्नं हवीरूपम्। तद्वानिन्द्रः। अधीमहे हि 'ऐन्द्रो वै यज्ञ' इति।

॥ ऐन्द्रमेतदहः एतस्याह्नो रूपम्॥

अस्यामेवर्चि,

॥ अथो उत्सं दुहन्ति स्तनयन्तमक्षितमिति॥

अथो अपि च। स्तनयत्पदमस्ति।

॥ स्तनयद्वा इन्द्रस्य रूपम्॥

---

१. 'वाजमन्नम्' ख.

---

* पा० सू० ८. २. १६. § ऋक्सं० १. ६४. ६.

गर्जन्ति मेघा हीन्द्रेण प्रेरिता वर्षकारिणः ।

॥ ऐन्द्रमेतदहः एतस्याह्नो रूपम् ॥

मरुत्वतीयप्रगाथानाह—

॥ *प्रव इन्द्राय ॥

इति मरुत्वतीयं तृचं शंसेत् ।

॥ बृहत इति ॥

बृहत इति पदमस्ति ।

॥ यद्वै बृहत्तन्महत् ॥

तुल्यार्थत्वात् ।

॥ महद्वत् ॥

महच्छब्दवत् ।

॥ रूपसमृद्धम् ॥

महत्त्वप्राप्तिहेतुर्हीदमहः ।

॥ एतस्याह्नो रूपम् । †बृहदिन्द्राय गायतेति ॥

---

१. 'प्रेष्टता' क. ग. २. 'बृहत्पदमस्ति' ख.

---

* ऋक्सं० ८. ८९. ३. † ऋक्सं० ८. ८९. १.

द्वितीयं मरुत्वतीयं तृचं शंसेत्।

अत्र चादितः,

॥ यद्वै बृहत्तन्महत् महद्रूपसमृद्धमेतस्याह्नो रूपम्
*नकिःसुदासो रथम् ॥

इति तृतीयं तृचं शंसेत्।

अत्र,

॥ पर्यास न रीरमादिति ॥

अस्ति।

॥ पर्यस्तवत् ॥

परिपूर्वास्यतिधातुमत्।

॥ रान्तिमत् ॥

रमिधातुमत्।

रमेः क्तिनि मलोपो न छन्दस्त्वाद्दीर्घ एव हि।

॥ रूपसमृद्धमेतस्याह्नो रूपम् ॥

पर्यासरतियोगोऽह्नो विस्तारसुखसंश्रयात्।

एवम्—

---

* ऋक्सं० ७. ३२. १०.

॥ सर्वान्प्रगाथाञ्छंसति ॥

प्राकृतान् वैकृतांश्च ।

॥ सर्वेषामह्नामाप्त्यै ॥

प्राप्तये ।

॥ सर्वेषामुक्थानाम् ॥

आप्त्या इत्येव । वचेः कर्मणि क्थन् । वक्तव्यानाम् ।

॥ सर्वेषां पृष्ठानाम् ॥

रथन्तरादीनाम् । आप्त्यै ।

॥ सर्वेषां शस्त्राणाम् ॥

आप्त्यै ।

॥ सर्वेषां प्रउगाणाम् ॥

पूर्वोक्तगायत्रादिजागतान्तानाम् । आप्त्यै ।

॥ सर्वेषां सवनानाम् ॥

प्राकृतवैकृतसर्वसवनत्रयाणाम् । आप्त्यै ।

उक्थत्वेऽपि च सर्वेषामादरात्तु पृथग्ग्रहः ।
ब्राह्मणा आगतास्सर्वे वसिष्ठोऽप्यागतो यथा ॥
प्रउगस्यापि शस्त्रत्वे पूर्ववत्तु पृथग्ग्रहः ।

प्रथमः खण्डः ।

प्रतिपदनुचरेन्द्राग्निहवप्रगाथब्राह्मणस्पत्यप्रगाथत्रयधाय्यात्रयमरुत्व-
तीयप्रगाथत्रयाख्याः षट् शस्त्रावयवा उक्ताः ।

अथ सप्तमं सूक्ताख्यावयवमाह—

॥ *असत्सु मे जरितः साभिवेगः ॥

इति सूक्तं चतुर्विंशत्यृचं शंसेत् ।

एतदादिप्रतीकैस्तु सूक्तानां युज्यते ग्रहः ।
'तदु वासुक्रम्' §'एतद्वै संज्ञानमि'ति लिङ्गतः ॥

अत्र शंसेत् ।

होता,

॥ सत्यध्वृतमिति शंसति ॥

सत्यशब्दोऽस्ति ।

॥ सत्यं वा एतदहः ॥

सत्यरूपप्राणप्राप्तिहेतुत्वात् ।

॥ सत्यवद्रूपसमृद्धमेतस्याह्नो रूपम ॥

स्तौति—

॥ तदु वासुक्रम ॥

---

* ऋक्सं॰ १०.२७.१. § ऐ॰ आ॰ १.२.२

तत् सूक्तम् । [*] उ हि । वासुक्रं वसुक्रेण दृष्टम् ।

[8] 'असत्सु चतुर्विंशतिरैन्द्रो वसुक्रः' ।

इति हि सर्वानुक्रमणी ।

यदि वासुक्रं ततः किम्,

॥ [§] ब्रह्म वै वसुक्रः ॥

[¶] 'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्म वै भवति ।' इति श्रुते वसुक्रस्य ब्रह्मवित्त्वाद् ब्रह्मत्वम् ।

॥ ब्रह्मैतदहः ॥

ब्रह्म प्राप्तिहेतुत्वात् ।

ततश्च,

॥ ब्रह्मणैव तद् ब्रह्म प्रतिपद्यते ॥

तत् तत्र । प्रतिपद्यते प्राप्नोति ।

॥ तदाहुरथ कस्माद्वासुक्रेणैतन्मरुत्वतीयं प्रतिपद्यत इति ॥

ब्रह्मवादिनश्चोद्यमिति शेषः । तत्र मरुत्वतीयमिति अंशे अंशिशब्दः । मरुत्वतीयशस्त्रं सप्तमांशरूपं सूक्तमित्यर्थः ।

---

* 'तदु तदपि' इति सायणः । 8 ऋक्सर्वा० १०. २७.

§ 'वसुक्रो महर्षिः ब्रह्म वै परब्रह्मस्वरूपः एतदभिज्ञत्वात्' इति सायणः ।

¶ मुण्डकोपनिषत् ३. २. ९.

परिहरति—

॥ न ह वा एतदन्यो वसुक्रान्मरुत्वतीयमुदयच्छंन्न
विव्याचेति ॥

ऋषेर्वसुक्रादन्यो न शक्ते सूक्तांशमग्रहीत्।
मरुत्वतीयेऽतिश्रैष्ठ्यान्नैवाप्रथयदुद्यतम् ॥
सूक्ष्मेक्षिकाक्षमो दक्षो वसुक्रः कृतवान् द्वयम् ॥

॥ तस्माद्वासुक्रेणैवैतन्मरुत्वतीयं प्रतिपद्यते ॥

होता।

॥ तदनिरुक्तम् ॥

अप्रकाशितदेवताभिधानं,

॥ प्राजापत्यं शंसति ॥

प्रजापतिदेवत्यम्।

कुत एतत्,

॥ *अनिरुक्तो वै प्रजापतिः ॥

महागुणत्वान्निर्वक्तुं श्रोतुं चाशक्य एव हि।

अतस्तच्छंसनं,

---

१. 'ञ्छ' क. ग., 'च्छ' ञ. ढ. ण.

---

* 'प्रजापतिः प्रजापालको जगदीश्वरः। स चानिरुक्त ईश्वरस्य कर्मप्रापित-देहाभावेनेन्द्रादिवन्निष्कृष्य मूर्तेर्वक्तुमशक्यत्वात्'। इति सायणः।

॥ प्रजापतेराप्त्यै ॥

स्यात् ।

॥ सकृदिन्द्रं निराह तेनैन्द्राद्रूपान्न प्रच्यवते ॥

सकृद् एकवारम् । अत्र सूक्ते एक इन्द्रशब्दोऽस्ति । 'युक्ष्वे युक्ष' इत्यस्यामृचि 'इन्द्राय सुन्वऽषये च शिक्षद्' इति । तेनैन्द्रत्वं न बाध्यते ।

अथ द्वितीयं सूक्तं,

॥ *पिबा सोममभि यमुग्र तर्द इति शंसति ॥

पञ्चदशर्चमेतत् ।

अत्र,

॥ ऊर्वं गव्यं महि गृणान इन्द्रेति ॥

महिपदमस्ति ।

॥ महद्वत् ॥

महच्छब्दवत् । ऐकार्थ्यम् । महत्, महस्, मह, महि, महिन्, महन्, बृहद् इति पर्यायाः ।

। रूपसमृद्धमेतस्याह्नो रूपम् । तदु भारद्वाजम् ॥

---

* ऋक्सं० ६. १७. १.

भरद्वाजेन दृष्टम्। 'बार्हस्पत्यो भरद्वाजः षष्ठं मण्डलम्' इत्यधिकारे *'पिब पञ्चोनैन्द्रं त्रैष्टुभं द्विपदान्तम्' इति हि सर्वानुक्रमणी।

यदि भारद्वाजं ततः किम्,

॥ भरद्वाजो ह वा ऋषीणामनूचानतमो दीर्घजीवितमस्तपस्वितम आस ॥

ऋषीणां मध्ये §अनूचानतमः सर्ववेदेष्वतिप्रवक्तृतमः। दीर्घजीवितमः अतिचिरजीवी। तपस्वितमः अतिशयेन तपोयुक्तः। आस बभूव।

॥ स एतेन सूक्तेन पाप्मानमपाहत ॥

स भरद्वाजः। पाप्मानं पापम्। अपाहत अपहतवान्।

हनो लङात्मनेपदे तः शब्लुङ्नलोपो ह्यडागमः।

॥ तद्यद्भारद्वाजं शंसति पाप्मनोऽपहत्यै ॥

यत् शंसति तत् पापहननाय स्यात्।

॥ अनूचानो दीर्घजीवी तपस्व्यसानीति ॥

एतदर्थं चेत्यर्थः। असानि भवानि। लोट्, आट्, मेर्निः।

---

* ऋक्सर्वा० ६. १. १७. § 'वेदशास्त्रपारं गत' इति सायणः।

॥ तस्माद्भारद्वाजं शंसति ॥

अथ तृतीयं सूक्तम्

॥ *कया शुभा सवयसः सनीळा इति शंसति ॥

पञ्चदशर्चमेतत् ।

अत्र,

॥ आ शासते प्रति हर्यन्त्युक्थेति ॥

उक्थपदमस्ति ।

॥ उक्थं वा एतदहः उक्थवद्रूपसमृद्धमेतस्याह्नो रूपम् ।
तदु कयाशुभीयम् ॥

तत् कयाशुभाशब्दवत् । § 'मतौ छः सूक्तसाम्नोः' इति छः ।

॥ एतद्वै संज्ञानम् ॥

विवदमाना ऐकार्थ्यमनेन यान्तीति । सम्पूर्वाद् जानातेः करणे ल्युट् ।

॥ सन्तनि सूक्तम् ॥

सन्तनिस्सन्ततिस्तद्वद्दशृद्धिस्तु तनेर्घञि ।

किं तत्,

* ऋक्सं० १. १६५. १. § पा० सू० ५. २. ५९.

॥ यत् कयाशुभीयम् ॥

संज्ञानत्वमुपपादयति—

॥ एतेन ह वा इन्द्रोऽगस्त्यो मरुतस्ते[1] समजानत ॥

ये ते ।

अजानत लङो झः स्याद् *'ज्ञाजनोर्जा' त्वडागमः ।
अगस्त्य इन्द्रो मरुतो ये क्रुद्धास्तेऽत्र सङ्गताः ॥
तदगस्त्येन्द्रमरुतां सूक्तमाहुर्मनीषिणः ।
कया शुभेति संवादमिति शौनकभाषितम् ॥

॥ तद्यत्कयाशुभीयं शंसति संज्ञात्या एव ॥

यच्छंसति तत् संज्ञात्यै स्यात् ।

॥ तद्वायुष्यम ॥

तद् उ पुनः, आयुष्यम् आयुषे हितम् ।

॥ तद्योऽस्य प्रियः स्यात् कुर्यादेवास्य कयाशुभीयम् ॥

तत् तस्मात् । यः यजमानः । अस्य होतुः । प्रियः स्यात् । तस्यास्य यजमानस्य होता कयाशुभीयं कुर्यात् ।

---

१. 'रुत्वतस्ते' ख.

---

* पा० सू० ७. ३. ७९.

अथ चतुर्थं,

॥ *मरुत्वाँ इन्द्र वृषभो रणायेति शंसति ॥

पञ्चर्चमिदम् ।

अत्र,

॥ इन्द्र वृषभ इति ॥

अस्ति । एतच्च वृषेरभ(गि?जि)ति निरुक्तत्वाद् वृष्टिसूचकम् ।

॥ वृषण्वद्धा इन्द्रस्य रूपम् ॥

वर्षकारी हीन्द्रः ।

॥ ऐन्द्रमेतदहः एतस्याह्नो रूपम् । तदु वैश्वामित्रम् ॥

तद् उ पुनः विश्वामित्रेण दृष्टम् । 'गाधिनो विश्वामित्रः स तृतीयं मण्डलम्' इति 'पञ्च' इति च प्रकृत्य §'आ युष्मस्य । मरुत्वान् । सद्यो ह' । इति हि सर्वानुक्रमणी ।

विश्वामित्रनिर्वचनेन फलमाह—

। विश्वस्य ह वै मित्रं विश्वामित्र आस ॥

‡'मित्रे चर्षौ' इति दीर्घः । विश्वस्य सर्वस्य जगतः । आस बभूव ।

॥ विश्वं हास्मै मित्रं भवति य एवं वेद ॥

---

* ऋक्सं० ३. ४७. १. § ऋक्सर्वा० ३. ४५-४८.

‡ पा० सू० ६. ३. १३०.

अस्मै इमो के । अस्य वेदितुः ।

॥ येषां चैवं विद्वानेतद्धोता शंसति ॥

तेषामपि विश्वं मित्रं स्यात् ।

अथ पञ्चमं सूक्तं,

॥ *जनिष्ठा उग्रः सहसे तुराय इति ॥

शंसेत् ।

एतच्च,

॥ निविद्धानम् ॥

मरुत्वतीया हि निविदत्र सूक्ते निधीयते ।
इन्द्रो मरुत्वानित्याद्याष्षड्[1]ृचस्त्वेकादशर्चके ॥

सौकर्यात् स्तौति—

॥ ऐकाहिकं रूपसमृद्धं बहु वा एनस्मिन्नहनि किञ्च किञ्च वारणं क्रियते शान्त्या एव । शान्तिर्वै प्रतिष्ठैकाहः । शान्त्यामेव तत्प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति । प्रतितिष्ठति य एवं वेद । येषां चैवं विद्वानेतद्धोता शंसति ॥

उक्तार्थम् ।

---

१. 'ष्षट्चस्त्वे' क. ख. 'ष्षट्चछस्त्वे' घ. एष भागो गपाठे नष्टः ।

---

* ऋक्सं० १०. ७३. १.

॥ ताः पराग्वचनेन सप्तनवतिर्भवन्ति ॥

आत्वारथादिजनिष्ठीयान्तशस्त्रे सप्ताधिका नवतिरनभ्यस्तानामृचां संख्येत्यर्थः।

कथं संख्यैवमिति चेच्छ्लोकं शृणु पुरातनम्।
प्रान्विन्द्रनवकं ब्रात्रिनवकं धात्रिकं ध्रुवम् ॥
मत्रिषट् पञ्चसूक्तः(?) सप्ततिः सप्तनवतिस्त्वृचः।

इति।

अर्थोऽस्य दुर्ज्ञान इति व्यक्तं व्याख्यायतेऽधुना ॥

प्र प्रतिपत्तृचः। अनु अनुचरस्तृचः। इन्द्र इन्द्रनिहवप्रगाथो द्वृचतृचः। एवमृचां नवकम्। ब्रा ब्राह्मणस्पत्याः। त्रि त्रयो द्वृचतृचा इति नवकम्। धा धाय्या। त्रिकं तिस्रः। ध्रुवं ध्रुवः इन्द्रनिहवो धाय्याश्चेति नित्याः। म मरुत्वतीयप्रगाथाः त्रि त्रयो द्वृचा इति षट्। इति सप्तविंशतिः। पञ्चसूक्तानि असत्सु चतुर्विंशतिः। पिब पञ्चदश। कया पञ्चदश। मरुत्वान् पञ्च। जनिष्ठा एकादश। इति सप्ततिः। इति सर्वा ऋचः सप्तनवतिरित्यर्थः।

उक्तसंख्यामवयुत्य स्तौति—

॥ सा या नवतिस्तिस्रस्तास्त्रिंशिन्यो विराजः ॥

त्रिंशतां पूरणस्त्रिंशष्टिलोपो डच्यतस्त्वनिः।
*'ऋन्नेभ्यो ङीप्'तद्वती तु त्रिंशत्संख्या विराट् तु सा ॥

उक्तं हि 'दशकास्त्रयो विराळ्'इति।

---

* पा० सू० ४. १. ५.

विराडुक्तिर्विराड्युक्तफलाम्नायादिसिद्धये ।

॥ अथ यास्सप्तातियन्ति यैवैषा प्रशंसा साप्यस्य तस्या एव ॥

अथ नवतेरनन्तरम् । याः सप्त ऋचः । अतियन्ति । *इणो यण् । अतिरिच्यन्ते । साप्ति– 'भावार्थे सप्तनो आडि छन्दस्त्वाम्नानणीह तु ।'(१) 'गायत्रं प्रउगं कुर्याद्' इत्यादिजगत्यन्तं सप्त छन्दांस्याश्रित्य यैषा तेजो वै ब्रह्मवर्चसादिपश्वन्तफलप्रशंसा अस्य मरुत्वतीयशस्त्रस्य तस्यै प्रशंसाया एव ता भवेयुरित्यर्थः ।

॥ तास्त्रिः प्रथमया त्रिरुत्तमयैकशतं भवन्ति ॥

चतस्रस्सप्तनवतेराद्यान्त्यात्रित्वतोऽधिकाः ।
एवमेकाधिकशतमृचश्शस्त्रेऽभवन्खलु ॥

आत्मन्येतां संख्यामाह –

॥ पञ्चाङ्गुलयश्चतुष्पर्वाः ॥

अङ्गुलीषु प्रत्येकं चत्वारि पर्वाणि एवं यासां ताः तथोक्ताः । डाप् टिलोपः । इति विंशतिः ।

॥ द्वे कक्षसी ॥

कक्षसी बाहुमूलमरत्निमूलश्च ।

॥ दोश्च ॥

---

* पा० सू० ६. ४. ८१.

बाहुश्च ।

॥ अक्षश्च ॥

बाहुसन्धिरक्षः ।

॥ अंसफलकञ्च ॥

स्तनबाह्वोरन्तरमंसः । तस्योपर्यंसफलकम् ।

॥ सा पञ्चविंशतिः ॥

एकपार्श्वे नाभेरूर्ध्वम् ।

॥ पञ्चविंशानीतराणि ह्यङ्गानि ॥

तस्मिन्नेव पार्श्वे नाभेरध एवम् । एवमेकपार्श्वे पञ्चाशत् । पञ्च-
विंशतेः स्वार्थे डे तिलोपः । शि नुम् । एवमन्यपार्श्वेऽपि पञ्चाशत् ।

॥ तच्छतम् ॥

तत् तस्मात् शतसंख्यास्ति ।

॥ आत्मैकशततमः ॥

मध्यमः कायोऽधिकारी वात्मा एकशतानां पूरणः । '*नित्यं
शताद्' इति डटि तमट् ।

ततः,

---

* पा० सू० ५. २. ५७.

॥ *यच्छतं तदायुरिन्द्रियं वीर्यं तेजः ॥

शतसंख्या आयुरिन्द्रियवीर्यतेजोर्था।

§'शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रियः'।

इति श्रुतेः। इन्द्रियं बलम्। वीर्यं सामर्थ्यम्। तेजो दीप्तिः।

॥ यजमान एकशततमः ॥

अधिकारी।

स च,

॥ आयुषीन्द्रिये वीर्ये तेजसि प्रतिष्ठितः ॥

स्यात्।

॥ तास्त्रिष्टुभमभिसम्पद्यन्ते ॥

अभिसम्पत्तिः प्राप्तिः। ता एकशतसंख्याकास्सर्वाः।

अत्र श्लोकौ,

आत्वादिनकिरन्तेषु नानाच्छन्दस्सु सम्पदा।
त्रिष्टुप्त्वमर्धसहितास्त्रिष्टुभस्त्वेकविंशतिः॥

वर्णा नवशतान्यत्र चत्वारिंशत्तथाष्ट च।
स्वत एव हि पञ्चापि सूक्तानि त्रैष्टुभा[1]नि तु॥

---

1. 'भान्वि तु' Mss

---

* 'तत्र या शतसंख्या सेयमायुरादिरूपा' इति सायणः।

§ ऐ० ब्रा० ७. ७.

इति ।

त्रिष्टुप्सम्पत्तिर्युक्तैवेत्याह—

॥ त्रैष्टुभो हि मध्यन्दिनः ॥

*'त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यन्दिन' इति ब्राह्मणे विभागोऽप्युक्तः ।

द्वितीयः खण्डः ।

इत्थं मरुत्वतीयाख्यं शस्त्रमुक्तमतः परम् ।
निष्केवल्यशंसिहोतुः प्रेङ्खाख्यासनमुच्यते ॥

॥ तदाहुः किं प्रेङ्खस्य प्रेङ्खत्वमिति ॥

ईखे(ः) पचाद्याचि प्रेङ्खो वाच्यो वायुः सदागतिः ।
होत्रासनस्य प्रेङ्खत्वं कथमित्यत्र चोद्यते ॥

साम्येन परिहरति—

॥ अयं वै प्रेङ्खो $योऽयं पवत एष ह्येषु लोकेषु प्रेङ्खत इति तत्प्रेङ्खस्य प्रेङ्खत्वम् ॥

---

* ऐ० ब्रा० १२. २.

$ 'योऽयं वायुरन्तरिक्षे पवते सञ्चरत्ययमेव प्रेङ्खशब्दवाच्यः । यस्मादेष वायुरेषु पृथिव्यादिषु लोकेषु प्रकर्षेण चलति तस्माद्वायुवदन्तरिक्षे पवते सञ्चरति प्रकर्षेणेङ्खते चलत इति व्युत्पत्त्या प्रेङ्खनाम सम्पन्नम्' इति सायणः ।

यः वायुः। पवते चलति। वै इवेत्यर्थः। अयमिव प्रेङ्खः। वायुवच्चलत्ययं प्रेङ्ख इत्यर्थः। वायुवच्चलनं स्पष्टयति– एष हीति। स्थानं लोकः। ङ्यर्थे सुप्। अस्मिन् स्थाने।

अस्य च,

॥ एकं फलकं स्यादित्याहुरेकधा ह्येवायं वायुः
पवतेऽस्य रूपेणेति ॥

हेतुं वदन्त इति शेषः। पवते गच्छति। रूपं प्रकारः।

दूषयति—

॥ तत्तन्नादृत्यम् ॥

*नाद्रियेतार्थरूपश्च हेतुश्चेति द्वितद्ग्रहः।
+'एतिस्तुशासु' क्यपि तुग् दृङ आदृत्यनिर्वचः।

अन्ये तु,

॥ त्रीणि फलकानि स्युरित्याहुस्त्रयो वा इमे त्रिवृतो
लोका एषां रूपेणेति ॥

हेतुं वदन्त इति शेषः।

लोकास्त्रयो हि वर्तन्ते त्रिष्वन्योन्योपकारिणः।

॥ £तत्तन्नादृत्यम् ॥

---

* 'त [त्त] स्मिन् प्रेङ्खे तदेकफलकमतं नैवादरणीयम्' इति सायणः।

+ पा० सू० ६. १. १०९. £ 'पूर्ववद्योज्यम्' इति सायणः।

अनादरो नियमगस्त्रीण्येवेति त्रिगो न तु ।
त्रीणि द्वे वेति पक्षौ द्वौ चतुर्थे सूत्रयिष्यति ॥

*'त्रीणि फलकान्युभयतस्तष्टानि द्वे वा ।'

इति ।

॥ £द्वे एव स्यातां द्यौ वा इमौ लोकावद्धातमाविव दृश्येते य उ एने अन्तरेणाकाशः सोऽन्तरिक्षलोकस्तस्माद् द्वे एव स्याताम् ॥

एवेति वार्थौ ।

अद्धेत्यसंशयार्थोऽयं \$'को अद्धे'ति श्रुतौ यथा ।
निस्सन्देहौ द्युभूलोकौ खं तयोर्मध्यगोचरम् ॥
तदाश्रित्य न तु त्रित्वममूर्तत्वादिति स्थितिः ।
अन्तरा मध्यतः क्षान्तं नष्टमित्यन्तरिक्षगीः ॥
नोपलब्धममूर्तत्वात्तलनैल्यादिको भ्रमः ।

एने फलके । ‡'अन्तरान्तरेण युक्ते' इत्योसर्थे औशी । §'द्वितीयाटौस्स्वेनः' ।

स्वानुग्रहः फलकयोरवकाशत इष्यताम् ।

ते च द्वे,

---

* ऐ० आ० ४. १. ३. £ 'द्वे एव फलके सम्पादनीये, न त्वेके नापि त्रीणि । द्वावेव पृथिवी द्यौश्चेतीमौ लोकावद्धातमाविवास्माकमतिशयेन प्रत्यक्षाविव दृश्येते' इति सायणः । \$ ऋक्सं० ३. ५४. ५.
‡ पा० सू० २. ३. ४. § पा० सू० २. ४. ३४.

॥ औदुम्बरे स्याताम् ॥

*'पलाशादिभ्यो वा' इत्यण् । उदुम्बरविकारभूते । द्वित्वे इदम् । त्रित्वे तु त्रीण्यौदुम्बराणि स्युः ।

§ ('स्यु? औ)दुम्बराणि काष्ठानि प्रेङ्खस्ये'ति हि सूत्र्यते ।

स्तौति —

॥ ऊर्ग्वा अन्नाद्यमुदुम्बरः ॥

†'यद्वैतद्देवा इषमूर्जं व्यभजन्त तत उदुम्बरस्समभवद्' इति हि ब्राह्मणे अधीमहे । ऊर्क् बलकरं स्वादु च ।

तेन तदौदुम्बरत्वम्,

॥ ऊर्जोऽन्नाद्यस्यावरुद्ध्यै ॥

स्यात् ।

औदुम्बरे च द्वे,

॥ ¶मध्यत उद्भृते स्याताम ॥

मध्यप्रदेशे सूचीभ्यां स्यातां संश्लेषिते दृढम् ।
भृतशब्दो भृजः क्ते स्याद्धत्वं वा छान्दसे भृजः ॥

॥ मध्यतो वै प्रजा अन्नं धिनोति ॥

---

* पा० सू० ४. ३. १४१. § ऐ० आ० ५. १ १. † ऐ० ब्रा० २४. ५.

¶ 'ते फलके यथा भूमिं न स्पृशतो यथा चोपरितनं वीतयनामकं तिर्यक्काष्ठं न स्पृशतस्तथैव भूमिवीतययोर्मध्यदेशे उद्भृते ऊर्ध्वं भरणं प्राप्ते प्रेरोषिताम्, (भवेताम्') इति सायणः ।

देहमध्योदरस्थं सदन्नं प्रीणयति प्रजाः ।
*'धिन्विकृण्व्योर च' त्युः स्यात्प्रीणनार्थो 'धिविः स्मृतः ॥

॥ मध्यत एव तदन्नाद्यस्य यजमानं दधाति ॥

तत् मध्यत उद्भूतत्वं कर्तृ ।

मध्ये निधानं स्वामित्वं स्वातन्त्र्यानुभवानुगम् ।

अस्य च प्रेङ्खस्य,

॥ उभय्यो रज्जवो भवन्ति ॥

तयस्यो† 'भादुदात्तो' ऽयच्ङीपि यण् जसि वै भवेत् ।
$'सृजेरसुम्चे' ति रज्जुरुस्सलोपो जशादसः ॥

कथम्,

॥ §दक्षिणाश्च सव्याश्च ॥

दक्षिणपाण्युपरिवृत्तयो दक्षिणाः । तद्विपरीतास्सव्याः ।

॥ दक्षिणा वा एकेषां पशूनां रज्जवः सव्या एकेषाम् ॥

एकेषां जनपदीनाम् ।

---

१. 'विधिः' क. घ.

---

* पा० सू० ३. १. ८०. † पा० सू० ५. २. ४४. $ उणा० सू० १५.
§ 'दक्षिणहस्तेन निर्मिता रज्जवः प्रदक्षिणावृतो वामहस्तेन निर्मितास्सव्यावृत एवमत्रोभयविधा रज्जवो भवेयुः' इति सायणः ।

॥ तद्यदुभय्यो रज्जवो भवन्त्युभयेषां पशूनामाप्त्यै ॥

उभय्यो भवन्ति यत् तदुभयेषां जनपदीनां ये पशवः तेषामाप्त्यै[1] स्यात् ।

ताश्च,

॥ दार्भ्यः स्युः ॥

कस्मात्,

॥ दर्भो वा ओषधीनामपहतपाप्मा तस्माद्दार्भ्यः स्युः ॥

अपहतपाप्मा येन स दर्भः कुशः ।

*रज्जोर्बहुत्वं सर्वत्र द्वित्व इत्यवधार्यताम् ।
§'रज्जूभ्यां' 'रज्जू' इति च चतुर्थे सूत्रयिष्यति ॥

तृतीयः खण्डः ।

डोळवत्सदसि प्रेङ्खो बध्यमानस्तु रज्जुतः—

॥ अरत्निमात्र उपरि भूमेः प्रेङ्खः स्यादित्याहुः ॥

---

१. 'प्त्यै च स्यात्' क.

---

* 'यद्यपि दक्षिणोत्तरभागयोर्द्वे एव रज्जू तथाप्येकैकस्यां त्रिगुणत्वात्षड्-संख्याकानवयवानभिप्रेत्य रज्जव इति बहुवचनम्' इति सायणः ।

§ ऐ० आ० ४. १. ४.

अरत्निपरिमाणं स्याद् भूमेः प्रेङ्खस्य चान्तरम् ॥

॥ *एतावता वै स्वर्गा लोकास्सम्मिता इति ॥

अरत्निसम्मितो भागः स्तनान्तश्शिर आदिकः ।
तत्रत्या ये नव प्राणास्तन्यौ द्वौ मूर्ध्नि सप्त ते ॥

§'नव प्राणा नव स्वर्गा' इति श्रुतिषु संस्तुताः ।
तस्मादरत्न्यवच्छिन्नास्स्वर्गा इत्यत्र कथ्यते ॥

॥ तत्तन्नाद्दत्यम् । ¶प्रादेशमात्रे स्यादित्याहुरेतावता वै प्राणास्सम्मिता इति ॥

उपरि भूमेः प्रेङ्ख इत्येव ।

चुबुकादिललाटान्ते मुखे प्रादेशसम्मिते ।
चक्षुश्श्रोत्रादयः प्राणास्सप्त तिष्ठन्ति वै यतः ॥

तत्तन्नाद्दत्यम् । मुष्टिमात्रे स्यात् ॥

उपरि भूमेः प्रेङ्ख इत्येव ।

॥ एतावता वै सर्वमन्नाद्यं क्रियते एतावता सर्वमन्नाद्यमभिपन्नं तस्मान्मुष्टिमात्र एव स्यात् ॥

---

* 'अन्तरिक्षादुपरि वर्तमानभोगहेतवो ये स्वर्गलोकास्ते प्रजापतेररत्निमात्रेण सदृशा भवन्ति । तत्प्रशस्तत्वादरत्नेरुपरि प्रेङ्खः स्थापनीय इति केचिदाहुः' इति सायणः । § ऐ० ब्रा० १८. २. ¶ 'प्राणवायवो हि देहस्यान्तर्हृदयादूर्ध्वं प्रादेशमात्रं सञ्चरन्ति मुखाद्बहिरपि सञ्चरतां प्रादेशमात्रेण संमिता भवन्ति' । इति सायणः ।

सर्वमन्नं भक्ष्यभोज्यचोष्यलेह्यं सपेयकम् ।

*क्रियते भुज्यते । अभि(सं?)पन्नं शरीरपोषकत्वेन उदरे प्राप्तं च ।

अधिरोहणविशेषमाह—

॥ पुरस्तात् प्रत्यञ्चं प्रेङ्खमधिरोहेदित्याहुरेतस्य
रूपेण य एष तपति ॥

एष तपति एतस्य रूपेण प्रकारेण । पुरस्तात् स्थित्वा प्रत्यञ्चं पश्चात् स्थितं प्रेङ्खं होताधिरोहेदित्याहुः ।

अयं ह्यस्य प्रकार इत्याह—

॥ पुरस्ताद्ध्येष इमाँल्लोकान्प्रत्यङ्ङधिरोहतीति ।
तत्तन्नादृत्यम् । तिर्यञ्चमधिरोहेदित्याहुः ॥

प्रेङ्खमित्येव ।

पार्श्वे स्थित्वा दक्षिणत आरोहेदुत्तरापि वा ।

॥ तिर्यञ्चं वा अश्वमधिरोहन्ति तेनो
सर्वान्कामानवाप्नवामेति ॥

§तेन अश्वारोहणप्रकारेण उ साधु । सन्त्यपेक्षं बहुत्वम् ।

---

* 'एतावता मुष्टिपरिमितेन द्रव्येण मोदकदध्यपूरिकादिरूपं सर्वमन्नाद्यं निष्पाद्यते । एतावता मुष्टिपरिमितेन ग्रासेन सर्वमन्नाद्यं मुखे प्राप्तं भवति ' इति सायणः ।　§ ' तेनो तेनैव ' इति सायणः ।

आप्लृ व्याप्तौ लोण्मस (त्वा ? स्त्वा) ट् सलोपः[2] श्च उवङ्डच: ।

॥ तत्तन्नादृत्यम् । अन्वञ्चमधिरोहेदित्याहुः ॥

प्रेङ्खस्य पुर आगत्य तं परीत्य प्रदक्षिणम् ।

पश्चात् स्थित्वा प्राङ्मुखः सन्नारोहेदिति वै विदुः ॥

॥ अनूचीं वै नावमधिरोहन्ति ॥

अनूचीम् अनुकूलं गच्छन्तीम् ।

अञ्चतेः क्विन् ङीम्नलोऽपोऽतो*'ऽचो' दीर्घश्च +'चावि'ति ।

॥ नौर्वैषा स्वर्गयाणी यत्प्रेङ्ख इति ॥

वा यस्मात् ।

यातेर्ल्युट् करणे ङीपि णत्वं गिरिणदी यथा ।

यत् यः ।

निगमयति—

॥ तस्मादन्वञ्चमेवाधिरोहेत् ॥

प्रेङ्खमित्येव ।

---

१. 'त्' घ. २. 'प क्षा भुवच:' क. 'प क्षो भुवचः' ख. गपाठोऽत्र तालीपत्रस्यैव नष्टत्वान्न लभ्यः। घपाठस्तु 'प क्षो भुत्र च' इति वर्तते ।

---

* पा० सू० ६. ३. १३८. + पा० सू० ६. ४. १३८.

॥ छुबुकेनोपस्पृशेत् ॥

प्रेङ्खमित्येव ।

अधरोष्ठाधःप्रदेशश्छुबुकस्तेन संस्पृशेत् ।
प्रेङ्खमादौ ततो रोहेत्पूर्वार्थे स्यादुपेत्ययम् ॥

॥ शुको हैवं वृक्षमधिरोहति स उ वयसामन्नादतम इति ॥

छुबुकेनोपस्पृश्याधिरोहतीत्यर्थः । *अन्नादतमः स्वादुभक्षकतमः ।

॥ तस्माच्छुबुकेनोपस्पृशेत् । +बाहुभ्यामधिरोहेत् ॥

पाणी प्रेङ्खे प्रतिष्ठाप्य पूर्वं रोहेत्ततस्त्वमम् ।

॥ एवं श्येनो वयांस्यभिनिविशते ॥

वयांसि शंसशिशुनृपक्षिणः(?) एवं बाहुभ्यां गृहीत्वा अभिनिविशते श्येनः । §'नेर्विश' इति तङ् ।

$'अभिनिविशश्च' इति कर्मत्वम् ।

---

१. 'चु' ख.

---

* 'अतिशयेनान्नादः, राजामात्यादयो विनोदार्थं शुकं रक्षन्तः क्षीरादिकं भोजयन्ति' इति सायणः । + 'बाहुशब्देनात्र कूर्परमारभ्याग्रभागोऽरत्निशब्दवाच्यो विवक्षितः । तथा च पञ्चमे पठ्यते— "पश्चार्धे फलकेऽरत्नी प्रतिष्ठापयति" [ऐ० आ० ५ १. ४.] [इति] इति सायणः ।
§ पा० सू० १. ३. १७. $ पा० सू० १. ४. ४७.

॥ एवं वृक्षम् ॥

श्येनोऽभिनिविशत इत्येव ।

॥ स उ वयसां वीर्यवत्तम इति ॥

सः श्येनः । उ खलु । वयसां पक्षिणां मध्ये वीर्यवत्तमः ।

॥ तस्माद्बाहुभ्यामधिरोहेत ॥

वीर्यवच्छ्येनसमाचारसिद्ध्यै बाहुभ्यां स्पृष्ट्वाधिरोहेत् प्रेङ्खम् ।

॥ अस्यै पादं नोच्छिन्द्यात् ॥

ङसो ङे । अस्या भूमिगतं पादमात्मीयं होता नोच्छिन्द्यात् उच्छेदो विश्लेषः ।

पादं भूमिगतं त्वेकमन्यं प्रेङ्खगमाचरेत् ।

॥ *नेदस्यै प्रतिष्ठाया उच्छिद्या इति ॥

ङस्यर्थे ङे । प्रतिपूर्वात्तिष्ठतेरङ् अधिकरणे[2] ।

---

१. 'सिद्धये' घ. २. 'णः' क. घ. 'णं' ख. गपाठस्त्वत्र तालीपत्रस्य नष्टत्वान्न लभ्यः ।

---

* 'नेदित्यव्ययसमूहः परिभयार्थे वर्तते । यद्यहं पादं भूमेर्वियुक्तं कुर्यां तदानीं प्रतिष्ठारूपाया अस्या भूमेः सकाशादहमेवोच्छिन्नो भूयासमित्यभिप्रेत्य स्वकीयं भयं द्योतयन् भीतिपरिहाराय भूमिं स्पृष्ट्वैव तिष्ठेत्' इति सायणः ।

प्रतिष्ठाभूतभूमेस्तु विच्छित्तिर्मास्म भूदिति ।

(क्तिनि[?]लिङि) तलोपः छान्दसः । यद्वा उच्छिद्यै,

छिदः कर्मणि लोडिट्टेरेत्वं य*'क्येत ऐ' तथा ।

॥ प्रेङ्खं होताधिरोहति ॥

वक्ष्यमाणप्रशंसार्थोऽनुवादः ।

॥ औदुम्बरीमासन्दीमुद्गाता ॥

अधिरोहेदित्येव । आसन्दी आसनम् । उदुम्बरविकारभूतौदुम्बरी ।
तत्र,

॥ वृषा वै प्रेङ्खः ॥

पुंलिङ्गत्वात् ।

॥ योषासन्दी ॥

स्त्रीलिङ्गत्वात् ।

॥ तन्मिथुनम् ॥

स्त्रीपुंसयुगलम् ।

॥ मिथुनमेव तदुक्थमुखे करोति ॥

---

* पा० सू० ३. ४ ९३.

तत् तेन । करोति सम्पादयति मिथुनं सत्रिगणः[1] ।

॥ प्रजात्यै[2] ॥

स्यादिति शेषः ।

॥ प्रजायते प्रजया पशुभिर्य एवं वेद ॥

प्रजा[3] पुत्रपौत्रनप्त्रादिः । पशुर्गवादिः । प्रजायते प्रकाशते[4] ।
पुनः स्तौति—

॥ अथान्नं वै प्रेङ्खः ॥

प्रीत्युत्पादकत्वात् ।

॥ श्रीरासन्दी ॥

संश्रयणीयत्वात् ।

॥ अन्नश्चैव तच्छ्रियश्चान्वधिरोहतः ॥

प्रेङ्खमासन्दीञ्चाधिरोहतः होतोद्गातारौ ।

॥ बृसीर्होत्रकास्समधिरोहन्ति सब्रह्मकाः ॥

तृणासनानि बृस्यः ।

---

१. 'सत्रिणं' क. ख, 'सत्रिणः' ग. २. 'प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद । स्यादिति शेषः । प्र' इति कपाठः ३. 'प्रजया पुत्र' क. ग. घ. ४. कगपाठयोः प्रकाशते इति नास्ति ।

होत्रादिमुख्यरहिता *होत्रका द्वादशर्त्विजः।
ब्रह्मा न होत्रको मुख्यत्वादित्यस्य पृथग्ग्रहः॥

॥ समुत्सृप्य वा ओषधिवनस्पतयः फलं गृह्णन्ति ॥

समुत्सृप्य उत्थाय।

बीजरूपेण वर्तित्वात्प्राग्भूम्या उदकादिना।
युक्ता वृक्षादयः पर्णलतास्कन्धैः समन्विताः॥
फलपुष्पादि गृह्णन्ति तद्वदेतेऽपि चर्त्विजः।

॥ तद्यदेतस्मिन्नहनि सर्वशः समधिरोहन्तीष-
मेव तदूर्जमन्नाद्यमधिरोहन्ति ॥

तदिति वाक्योपन्यासे। (एतस्मिन्नहनि)। महाव्रते। इषम् इष्यमाणम्। ऊर्क् बलकरं स्वादु च।

अतः प्रेङ्खाद्यधिरोहणम्,

॥ ऊर्जोऽन्नाद्यस्यावरुद्ध्यै ॥

स्यात्।

अथ प्रसङ्गात् प्रेङ्खावरोहणमाह—

॥ वषट्कृत्यावरोहेदित्याहुः ॥

होता प्रेङ्खसमासीनो निष्केवल्यं समाप्य तु।

---

१. 'द्य च' ख.

---

* 'प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रोऽच्छावाकश्चेत्येते होत्रकाः' इति सायणः।

शस्त्रश्चाज्यां तथैवोक्त्वा भक्षे चानाहृते सति ॥
अध्वर्युपूजनायैवावरोहेत्प्रेङ्खतस्ततः ।

॥ तत्तन्नादृत्यम् ॥

अनादरे हेतुमाह—

॥ *अकृता वै सापचितिर्यामपश्यते करोति ॥

अपचितिः पूजा । सापचितिरकृता अकृतसमा यामपश्यते । ङसो ङे । अपश्यतः ।

होत्रावरोहः क्रियतेऽध्वर्योः पूजनाय हि ।
पूज्यः पूजामजानन्वै पूजयन्नैव पूजयेत् ॥

ततश्च,

॥ निगृह्य भक्षमवरोहेदित्याहुः ॥

आनीतेऽध्वर्युणा भक्षे तं हस्तेन निगृह्य तु ।
भक्षयित्वावरोहेत्प्रेङ्खाद्धोता तु त्वरान्वितः ॥

॥ तत्तन्नादृत्यम् । अकृता वै सापचितिर्यामध्यृष्टाय करोति ॥

§अध्यृष्टोऽवमतः । ऋषेरेव मत्यर्थादधिपूर्वात् कर्मणि क्तः । ङसो

---

१. 'पूजन्नैव' क. ग. घ.

---

* 'भक्षस्यापचित्यर्थं हि प्रेङ्खादवरोहणम् । सा वा (चा)पचितिः पूजनीये भक्षे समागत्य निरीक्षमाणे सति कर्तव्या । यद्यध्यर्यपश्यते भक्षस्यापचितिः क्रियेत तदानीमियमकृतैव स्यात् । नहि वषट्कारानन्तरं भक्षागमनस्यावसरः तस्यानुवषट्कारादूर्ध्वंभावित्वात्' इति सायणः ।

§ 'अध्यृष्टायाधिकृतेन समीपं प्राप्ताय' इति सायणः ।

ङे। स्वसमीपमागतमध्वर्युमनवरोहेण पूर्वमवमत्य पश्चादवरोहन्नैनं पूजयतीत्यर्थः।

कथं तर्हि,

॥ प्रतिख्याय भक्षमवरोहेत् ॥

अध्वर्युणानीयमानं भक्षं दृष्ट्वास्य सन्निधौ।
होतावरोहेत्प्रेङ्खात्तु पूजयन्भक्षदायिनम् ॥

एवमध्वर्युः पूजितः स्यादित्याह—

॥ एषा वा अपचितिर्यां पश्यते करोति।
तस्मात्प्रतिख्यायैव भक्षमवरोहेत् ॥

अवरोहंश्च,

॥ प्राङवरोहेत् ॥

प्राक् प्राङ्मुखः।

कुतः[1]

॥ *प्राग्वै देवरेतसं प्रजायते ॥

§'देवानां रेतो वर्षम्'इति वक्ष्यति। वर्षमित्यर्थः। ¶'अनसन्ताद्' इत्यच् समासान्तः। अन्तर्णीतण्यर्थो जनिः।

आहुः प्राच्यां स्थितं वर्षं सस्यवृद्धिकरं त्विति।

---

१. कगपाठयोः 'कुतः' इति नास्ति। २. 'वर्षन्' क. ग. घ.

---

* 'देवानामिन्द्रादीनां रेतः 'पुत्रादिरूपेणोत्पद्यते देवलोकस्य पूर्वदिग्वर्तित्वात्' इति सायणः। § ऐ० आ० २. १. ३ ¶ पा० सू० ५. ४. १०३

॥ तस्मात्प्राङवरोहेदवरोहेत् ॥

द्विरुक्तिरुक्तार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ मोक्षप्रदायां महाव्रते

द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

आज्यप्रउगशस्त्रे[1] द्वे प्रथमेऽध्याय ईरिते ।
मरुत्वतीयशस्त्रं तु द्वितीये प्रोक्तमादितः ॥

प्रेङ्खाख्यमासनं यत्तु निष्केवल्यस्य शंसितुः ।
तन्निर्माणं तदारोहावरोहौ च प्रवर्णितौ ॥

प्राक् *'तत्सवितुरि'त्यस्मान्निष्केवल्यमथोच्यते ।
शस्त्रं चानेकपर्वेदमुक्तं बह्वृचकुञ्जरैः ॥

आत्मा ग्रीवाश्शिरो[2] विजवः पक्षौ पुच्छमतः परम् ।
धाय्यैकाशीतयस्तिस्र उदरोरू ततः परम् ॥

निविद्धानश्च सूक्ते द्वे मध्ये चावपनं[3] तयोः ।
त्रैष्टुभानां जागतानां बृहत्यो[4] दश यावतीः ॥

---

1. 'शब्दे' क. ग. 2. 'ग्रीवाश्शि' Mss.
3. 'चावचनं' क. ग. 4. 'हतो' क. ग. घ.

---

* ऐ० आ० १. ५. ३.

सवनीयात्परस्तार्क्ष्यः तत एकपदा भवेत् ।
अनुषङ्गो विराजश्च वासिष्ठं सूक्तमुत्तरम् ॥

सन्धौ सन्धौ सूददोहा आदितो द्वादशेष्वपि ।
दशतीरावपेदैन्द्रीर्यदि कामो भवेन्नवा ॥

इति ।

तत्रात्मसंज्ञकं पर्व तृतीयाध्याय उच्यते ।

अथाभिहिङ्कारादिभूतं हिङ्कारं प्रस्तौति—

॥ हिङ्कारेणैतदहः प्रतिपद्येतेत्याहुः ॥

अहंशब्देऽच्द्वयं त्यक्त्वा परिशिष्टन्तु हं भवेत् ।
एवं हमिति हिङ्कृत्य सूत्रे ह्यर्थस्तु वर्ण्यते ॥

तस्य हिङ्कार इति नाम । एतदहः । अंशेंशिशब्दः । महाव्रताहरव-यवभूतनिष्कैवल्यम् । प्रतिपद्येत प्रारभेत ।

॥ *ब्रह्म वै हिङ्कारः ॥

ब्रह्मणः प्रतिपादकत्वात् ।

॥ ब्रह्मैतदहः ॥

ब्रह्मप्राप्तिरूपत्वात् ।

---

१. 'त्तमम्' ख. घ. २. 'शस्वति' क. ग.
३. 'सूत्रेऽत्यर्थं' क. ग.

---

* 'हिंकारस्याहश्च ब्रह्मप्राप्तिहेतुत्वाद् ब्रह्मत्वम्' इति सायणः ।

ततश्च,

॥ ब्रह्मणैव तद्ब्रह्म प्रतिपद्यते ॥

तत्तेन ।

॥ य एवं वेद ॥

सोऽपि शब्दब्रह्मणा परं ब्रह्म प्रतिपद्यते ।

स्तौति—

॥ यदेव हिङ्कारेण प्रतिपद्यता ३ इ ॥

एव साधु । *'अनुदात्तं प्रश्नान्ताभिपूजितयोः' इत्यभिपूजिते प्लुतः । $'एचोऽप्रगृह्यस्य–' इति विविच्याकारः प्लुतः। अप्लुतश्चेकारः।

हिङ्कारप्रतिपत्तिर्या सा प्रशस्तेति कथ्यते ।

अन्यथा स्तौति—

॥ वृषा वै हिंकारो योषर्क् ॥

स्त्री ।

॥ तन्मिथुनं मिथुनमेव तदुक्थमुखे करोति प्रजात्यै ।
प्रजायते प्रजया पशुभिर्य एवं वेद ॥

उक्तार्थम् ।

---

* पा० सू० ८. २. १००. $ पा० सू० ८. २. १०७.

॥ *यद्वेव हिंकारेण प्रतिपद्यता ३ इ ॥

उ साधु । एव पुनः ।

हिंकारप्रतिपत्तिर्या सा पूज्या साधु वै पुनः ।

पुनः स्तौति—

॥ यथा वा अभ्रिरेवं ब्रह्मणो हिंकारः ॥

खनित्रमभ्रिः ।

खातं खनित्रमभ्रेर्णं यथा सम्पत्तये भवेत् ।
हिंकारेण यथा वेदो भवेत्सर्वसमृद्धये ॥

तदाह—

॥ यद्वै किञ्चाभ्रियाभितितृत्सत्यभ्येवैनत्तृणत्त्येवं यं कामं कामयते हिंकारेणाभ्येवैनत्तृणत्ति ॥

किञ्च किञ्चित् खनितव्यम् । अभ्रिया—

फालवाच्यभ्रिशब्दोऽयं स्त्रीलिङ्गष्टा यणस्त्वियङ् ।

अभितितृत्सति । उ तृदिर् अत्र खननार्थः कृषिपरः । पुरुषो भूम्यां चिखनिषति ।

---

१. 'ण हि यथा' क. ग. घ. २. 'न्ति अ' ङ.
३. 'तृनत्ति एवायं का' ङ.

---

* 'यदुशब्दोऽपि चेत्यस्मिन्नर्थे वर्तते । स च पूर्वप्रशंसया समुच्चयार्थः' इति सायणः ।

तृदेस्सन् *'सेऽसिची'तीण्न हलन्तात्तिकद्गुणोऽपि न ।

एनत् नपुंसकैकवचनम् । अल्पं वा लघु वा खनितव्यमभितृणत्त्येव । $'रुधादिभ्यः श्नम्' । एवमेनं कामं तृणत्ति प्राप्नोति ।

॥ य एवं वेद ॥

सोऽपि तृणत्ति ।

पुनः स्तौति—

॥ यद्धेव हिङ्कारेण प्रतिपद्यता ३ इ ॥

व्याख्यातम् ।

॥ वाचो वा एषा व्यावृत्तिर्दैव्यै च मानुष्यै
च यद्धिङ्कारः ॥

असंस्पृष्टो विशेषातिरेको व्यावृत्तिः । दैव्यै च मानुष्यै च । इत्यर्थे ङेद्वयम् । यत् यः ।

॥ स यद्धिङ्कृत्य प्रतिपद्यते वाचमेव तद्व्यावर्तयति दैवीञ्च मानुषीञ्च ॥

व्यावर्तयति विशेषयुक्तां करोति । तं स होता यद्धिङ्कृत्य प्रतिपद्यते आरभते ।

प्रथमः खण्डः ।

---

* पा० सू० ७. २. ५७. $ पा० सू० ३. १. ७८.

अत्र चोद्यम्,

॥ तदाहुः कैतस्याह्नः प्रतिपदिति ॥

अंशेंशिशब्दः । एतस्य महाव्रतस्याह्नः एतदंशीभूतनिष्केवल्यस्य का प्रतिपत् ।

ननु प्रश्नः कथं प्रोक्तो हिङ्कारः प्रतिपद्यताम् ।
सत्यमस्य त्वधिष्ठानं हिङ्कारस्यैव पृच्छ्यते ॥

परिहरति—

॥ *मनश्च वाक्चेति ब्रूयात् ॥

चोदकान् प्रति ।

अव्यक्तत्वान्मनस्त्वं स्याच्छब्दत्वाद्वाक्त्वमेव च ।
अव्यक्तवागाश्रयत्वाद्भवेद्वाङ्मनसाश्रयः ॥

वाङ्मनसाश्रयत्वात् सर्वकामाप्तये स्यादित्याह—

॥ सर्वेऽन्यास्मिन्कामाः श्रिताः ॥

अन्यस्मिन् एकस्मिन्मनसि । कामाः कामार्थाः । श्रिताः संश्रिताः ।

॥ सर्वानन्या कामान् दुहे ॥

---

* 'मनश्च वाक्चेत्येतदुभयं प्रारम्भसाधनमित्युत्तरं ब्रूयात् । अप्रमत्तेन मनसा प्रथमं शस्त्रं पर्यालोच्य पश्चादप्रमत्तया वाचा शंसेदित्यर्थः । निष्केवल्यस्य बहुविधाविप्रकीर्णमन्त्रसमुदायरूपत्वाद्वाङ्मनसयोरत्र विशेषेणाप्रमत्तत्वाभिधानम्' इति सायणः ।

अन्या एका वाक्। *दुहे दुग्धे, प्रकाशयति। $‘लोपस्त आत्मनेपदेषु’।

स्वयमेव व्याचष्टे—

॥ मनसि वै सर्वे कामाः श्रिताः ॥

कथम्,

॥ मनसा हि सर्वान्कामान् ध्यायति ॥

इदमिदं मम भूयादिति।

ततश्च,

॥ सर्वे हास्मिन्कामाः श्रयन्ते य एवं वेद ॥

अस्मिन् वेदितरि। श्रयन्ते यथास्मृतं सम्पद्यन्ते।

तथा,

॥ वाग्वै सर्वान्कामान् दुहे ॥

कथम्,

॥ वाचा हि सर्वान्कामान् वदति ॥

महात्मन्, मह्यमिदमिदं प्रयच्छेति।

॥ सर्वान्हास्मै कामान् वाग्दुहे य एवं वेद ॥

---

* ‘दुहे दुग्धे सम्पादयति’ इति सायणः। $ पा० सू० ७. १. ४१.

अस्मै वेदित्रे। दुहे दुग्धे। प्रभूतं ददाति।

अभिहिंकाराद्यमंशं हिंकारं संविधाय तु।
विदधात्यथान्यमंशं व्याहृतित्रयरूपकम्॥

॥ तदाहुर्नैतदहरृचा न यजुषा न साम्ना प्रत्यक्षात्प्रति-
पद्येत नर्चो न यजुषो न साम्न इयादिति॥

वाङ्मनसाधिष्ठानं शब्देन लब्धवाङ्मनसो होता एतदहः निष्के-
वल्यम्। ऋग्यजुस्सामभिः। प्रत्यक्षात्। टार्थे ङसिः। प्रत्यक्षेण। नार-
भेत। ऋचो यजुषः साम्नश्चेयात् व्यवेत। तन्मा भूदित्याहुर्ब्रह्मवादिनः।

तत् तत्र।

॥ तदेता एव व्याहृतीः पुरस्ताज्जपेद् भूर्भुवः स्वरिति॥

तत् तदर्थम्।

॥ एता वाव व्याहृतय इमे त्रयो वेदाः॥

वेदो मन्त्रः।

ऋग्यजुस्सामरूपा य इमे मन्त्रा भवन्ति ते।
एता व्याहृतयोऽभूवंस्तेषां सारमिदं त्रिकम्॥

प्रसिद्ध्यर्थो वावशब्दः छन्दस्येव हि दृश्यते।
एतन्मूलकमेवोक्तं मनुना च महर्षिणा॥
*'वेदत्रयान्निरवृहद्भूर्भुवःस्वरितीति च'।

---

* मनुस्मृति० २. ७६. मुद्रितमनुस्मृतौ 'वेदत्रयान्निरदुहद्' इति पाठो दृश्यते।

इति ।

आसां पृथग्वेदान्वयमाह—

॥ भूरित्येव ऋग्वेदो भुव इति यजुर्वेदः
स्वरिति सामवेदः ॥

वेदो मन्त्र ऋग्यजुस्सामरूपा-
श्चतुर्षु वेदेषु भवत्यतश्च ॥
अथर्ववेदोऽपि च यज्ञमाह
ब्राह्मवर्गं शान्तिकं पौष्टिकञ्च ॥

॥ तन्नर्चा न यजुषा न साम्ना प्रत्यक्षात्प्रतिपद्यते
नर्चो न यजुषो न साम्न एति ॥

एति च्यवते ।

साररूपग्रहे स्थूलं यजुरादि न गृह्यते ।
किञ्च सर्वैरारभते नैकैकश इति स्थितिः ॥

द्वितीयः खण्डः ।

इत्थमुक्तोऽभिहिङ्कारः प्रसिद्धेरोन्न चोच्यते ।
आह्वानवाग्जपौ यद्वत्प्रसिद्धेरेव नेरितौ ॥
*'आहूय वागिति जपती'ति वक्ष्यति सूत्रकृत् ।

---

* ऐ० आ० ४. १. ५.

अथास्य *तदिदासीये तच्छब्दं स्तौति चादितः ॥

॥ तदिति प्रतिपद्यते ॥

आरभते ।

॥ तत्तदिति वा अन्नम् ॥

उच्यत इति शेषः ।

तदन्नं मे भवेत्तच्च बहु तत्सगुणं सदा ।
दाराणामपि पुत्राणां पौत्राणां नप्तुरेव च ॥

तन्नास्ति चेत्किमन्येन तच्चेदस्ति किमन्यतः ।
आर्जनीयं तदन्नं मे निषिद्धैरपि हेतुभिः ॥

तदन्नमिह भुञ्जीत शास्त्रं किं हन्ति वै क्षुधम् ।
जातानामिह सर्वेषां तदन्नं हृदि तिष्ठति ॥

सर्वाः प्रवृत्तयश्चैव तस्यान्नस्य प्रसिद्धये ।
इत्येवं तत्तदित्येव सर्वैरन्नं सदोच्यते ॥

॥ अन्नमेव तदभिप्रातिपद्यते ॥

येत्तादित्यन्नं सूचकमारभते तद् अन्नम् अभि । प्रतीत्यर्थः ।

पुनः स्तौति—

१. 'छादिनः' इति Mss. २. 'तदित्यन्नं' क. ख.

* ऋक्सं० १०. १२०.

॥ एतां वाव प्रजापतिः प्रथमां वाचं व्याहरदेकाक्षर-
द्व्यक्षरां ततेति तातेति ॥

प्रजापतिरुक्तवान् ।

द्व्यक्षरा वाक्तु तातेति ततेत्येकाक्षरा तु वाक् ।
एकाक्षरैकमात्रा वाक्ततेत्यन्या द्विकाक्षरा ॥
*द्व्येकमात्रावर्णयोगादित्येवमनुशुश्रुम ।

लोके,

॥ तथैवैतत्कुमारः प्रथमवादी वाचं व्याहरत्येकाक्षर-
द्व्यक्षरां ततेति तातेति ॥

एतत् एतर्हि । हिंलोपः ।

॥ तथैव तत्ततवत्या वाचा प्रतिपद्यते ॥

तत् तत्र । ततवत्या ।

तदो मतुब्दकारस्य तादेशोऽच्च ततस्तु ङीप् ।
आद्यादित्वादिहावृत्तततशब्दान्मतुप् तु वा ॥

प्राथम्यं प्रशस्तमित्याह—

॥ तदुक्तमृषिणा ॥

ऋषिर्मन्त्रः बृहस्पतिर्वा मन्त्रदर्शी ।

बृहस्पतिर्ज्ञानमस्तौत्त्रिष्टुभाङ्गिरसो मुदा ।

कथम्,

---

* 'एकेन ह्रस्वेनोपेतैकाक्षरा द्वाभ्यां ह्रस्वदीर्घाभ्यामुपेता द्व्यक्षरा' इति सायणः ।

॥ *बृहस्पते प्रथमं वाचो अग्रम् इति ॥

व्याचष्टे—

॥ एतद्ध्येव प्रथमं वाचो अग्रम् ॥

एतत् ज्ञानं सूर्यज्योतिर्वा । अग्रम् । अङ्गेरन् । गन्तृ ।

॥ यत्प्रैरत नामधेयं दधाना इति ॥

व्याचष्टे—

॥ वाचा हि नामधेयानि धीयन्ते ॥

नामधेयानि रूपाणि धीयन्ते । अभीति शेषः । अभिधीयन्ते।

॥ यदेषां श्रेष्ठं यदरिप्रमासीद् इति ॥

व्याचष्टे—

॥ एतद्ध्येव श्रेष्ठमेतदरिप्रम् ॥

श्रेष्ठं प्रशस्यतमम् । अरिप्रं रिप्रं पापं तद्रहितम् ।

॥ प्रेणा तदेषां निहितं गुहाविरिति ॥

अत्र गुहेति व्याचष्टे—

॥ इदमु ह गुहाध्यात्मम् ॥

शरीरमधिकृत्य व्याख्याने इदं ज्ञानं गुहा गुह्यम् । यकारमकारयोर । उ साधु । ह खलु ।

---

* ऋक्सं० १०. ७१. १.

॥ इमा देवताः ॥

गुहेत्येव । अधिदैवतमित्यपकर्षः । देवता अधिकृत्य व्याख्याने, योजेम् । इयं देवता सूर्याख्या गुहा ।

॥ अद उ आविः ॥

अध्यात्मं ज्ञानम् ।

॥ अधिदैवतम् ॥

अधिदैवतन्तु सूर्याख्यज्योतिः । आविः प्रकाशम् । उ साधु । अस्त्विति शेषः ।

*ऋगर्थस्तु– हे बृहस्पते! स्वात्मन्! प्रथमं पूर्वं वाचः शब्दस्य अग्रं गन्तृ ज्ञानं यत् येन हेतुना प्रैरत प्रवदन्ति नामधेयमर्थरूपं दधाना वदन्तः । किञ्च यद् एषाम् एष्टव्यानाम् । इषेः कर्मणि यक् । आमि नुण । मध्ये श्रेष्ठं यच्चारिप्रमासीत् । प्रेणा प्रेम्णा । मलोपः । स्वय-

---

* बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः । यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः । (ऋक्सं० १०.७१. १.) इतीमामृचं प्राथमिकनामपरतया व्याख्याति सायणाचार्यः— ' हे बृहस्पते जातस्य पुत्रस्य नामधेयं दधानाः पित्रादयो विचार्यैतत्स्या वाचोऽग्रं श्रेष्ठं यत्पदं प्रथमं प्रैरत प्रयुक्तवन्तः । हे कुमार त्व विष्णुशर्मा रुद्रशर्मासीत्येवमादि दक्षिणकर्णे पठन्ति । यन्नामैषां तदीयबन्धुभिर्व्यवह्रियमाणानां मध्ये श्रेष्ठं " द्व्यक्षरं चतुरक्षरं वा " इत्यादि शास्त्रीयलक्षणोपेतमासीद्यन्नामारिप्रं पापरहितं लोकशास्त्रविरोधरहितमासीत् । एषां संभावितानां मध्ये यन्नामधेयं यद्यथा प्रोक्तं नाम प्रेणा प्रेम्णा बृहस्पतिसम्बन्धिना स्नेहेन च [नि] हितं सम्पादितम् । तच्च नाम कीदृशम् । गुहा गूढमुपनयनात्पूर्वं मातापितृभ्यां गोपितम् । तथा चाश्वलायनः— " तन्मातापितरौ विद्यातामोपनयनात् " इति । यथा मनुष्येषु यन्नाम गूढं तथा देवेष्वाविः प्रकटम् । देवा हि सर्वज्ञत्वाद् गूढमपि जानन्ति ' इति । ' एतद्ध्येव प्रथमं वाचो अग्रम् ' इत्यादि ब्राह्मणमपि प्राथमिकनामपरतया स एवं योजितवान् । तस्य मन्त्रस्य प्रथ[म]पादमनूद्य व्याचष्ट–

मेव । तदु एषामस्माकं निहितं गुहा गुह्यम् आविः प्रकाशमस्त्विति । (अ? ज्ञा)नपरामृचं सूर्येऽपि योजयती (यं? मां) ब्राह्मणमित्याहुः ।

बृहस्पते प्रथमं वाचो अग्रमित्येतद्ध्येव प्रथमं वाचो अग्रम् ।

इति । प्राथमिकनामधेयस्य विचार्य निर्मितत्वादितरवाचामपेक्षया श्रेष्ठार्थ-(ता)द्योतनार्थो हिशब्दः ।

द्वितीयपादमनूद्य व्याचष्टे—

यत्प्रैरत नामधेयं दधाना इति वाचा हि नामधेयानि धीयन्ते ।

इति । यस्मान्नामधेयानां वाङ्निष्पाद्यत्वं तस्मादुच्चारणवाचिनः प्रैरतेति-शब्दस्य प्रयोगो युक्त इत्यर्थः ।

तृतीयपादमनूद्य व्याचष्टे—

यदेषां श्रेष्ठं यदरिप्रमासीदित्येतद्ध्येव श्रेष्ठमेतदरिप्रम् ।

इति । विचार्य सम्पादितस्य नाम्नो लक्षणोपेतत्वं निर्दोषत्वं च प्रसिद्धम् ।

चतुर्थपादमनूद्य व्याचष्टे—

प्रेणा तदेषां निहितं गुहाविरितीदमु ह गुहाध्यात्ममिमा देवता अद उ आविरधिदैवतमित्येतत्तदुक्तं भवति ।

इति । आत्मानं लोकप्रसिद्धं देहेन्द्रियादिसङ्घातमधिकृत्य वर्तत इत्यध्यात्मम् । तस्मिन्देहादिसंघात आश्रिता इमा अग्न्यादिदेवताः, "अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशत्" [ऐ० आ० २. ४ २.] इत्यादिश्रुतेः । तासां देवतानामस्मच्छरीरे गूढं यत्स्वरूपमिदमेवात्र गुहेत्युच्यते । शरीरमध्ये गुहा देवा एवैतन्नाम जानन्ति न मनुष्या इति गुहाशब्दस्य तात्पर्यम् । दैवतानि स्वर्गलोकनिवासीन्यधिकृत्य वर्तत इत्याधिदैवतम् । स्वर्गनिवासिषु देवेषु प्रसिद्धं यन्नाम अद उ एतदेव प्रकटमित्युच्यते । इत्येतदभिप्रायद्वयं तत्तेन चतुर्थपादेनोक्तं भवति । अस्मिन्मन्त्रे प्राथमिकनाम्नः प्राशस्त्यं प्रतीयते । प्राथमिकञ्च तद्यत्तदिदासेति सूक्तादावपि तकारः प्रयुक्तस्तस्मात्सूक्तं प्रशस्तमित्यर्थं इति ॥

॥ इत्येतत्तदुक्तं भवति ॥

प्राथम्यं प्रशस्तमिति यदवोचाम तदर्थरूपम् । एतत् टाल्लुक् । एतयर्चा ह्युक्तं सम्पद्यते । इति तच्छन्दः स्तुतः ।

तृतीयः खण्डः ।

अथ तदिदासीयं सूक्तमैन्द्रं सत् सूर्ये योजयति—

॥ *तदिदास भुवनेषु ज्येष्ठमिति प्रतिपद्यते ॥

आरभते बृहतीसहस्रम् । §'एषां वा एषां सूक्तानाम्' इति वक्ष्यमाणत्वादत्र सूक्तत्वम् ।

आदायादाय व्याचष्टे—

॥ एतद्वाव भुवनेषु ज्येष्ठम् ॥

एतत् सूर्यमण्डलम् । भुवनेषु लोकेषु । ज्येष्ठं प्रशस्यतमम् ।

॥ यतो जज्ञ उग्रस्त्वेष नृम्ण इति । अतो ह्येष जात उग्रस्त्वेष नृम्णः ॥

---

१. 'स्यात्' क. ग. घ.

---

* ऋक्सं० १०. १२०. § ऐ० आ० १. ३. ८.

उग्रः अप्रसह्यः[1] । त्वेष नृम्णः प्रवृद्धबलः ।

॥ सद्यो जज्ञानो निरिणाति शत्रूनिति । सद्यो ह्येष जातः पाप्मानमपाहत ॥

जज्ञान इत्यस्य विवरणं जात इति । शत्रूनित्यस्य पाप्मानमिति । निरिणातीत्यस्यापाहतेति । तिपस्तः । अपाहन् ।

॥ अनु यं विश्वे मदन्त्यूमा इति । भूतानि वै विश्व ऊमास्त एनमनु मदन्त्युदगादुदगादिति ॥

वदन्त[2] इति शेषः । ऊमाः । अवतेरुत्पत्त्यर्थान्मन् *'ज्वरत्वरे'त्यूठ् । अनुमदन्ति । श्यनः शप् ।

॥ §वावृधानः शवसा भूर्योजा इति । एष वै वावृधानः शवसा भूर्योजाः ॥

शवो बलम् । भूरि प्रभूतम् ओजस्तेजो यस्य सः । वावृधानः प्रवृद्धः । दीर्घः सांहितः ।

॥ शत्रुर्दासाय भियसं दधातीति ॥

शत्रुः शातयिता । दासाय हिंस्याय । भियसम् । भियोऽसज् भावे । भियसं दधाति ।

---

१. 'ग्रः प्र' क. ग. घ. २. 'वदन्ति' क. ख. ग.

---

* पा० सू० ६. ४. २० § ऋक्सं० १०. १२०. २.

तदर्थतोऽभिधत्ते—

॥ सर्वं ह्येतस्माद्बीभाय ॥

लटो लिट्। तुजादित्वाद्दीर्घः। बिभेति।

॥ अव्यनच्च व्यनच्च सस्रोति। यच्च प्राणि यच्चाप्राणक-
मित्येव तदाह ॥

नञा युक्ताद्वियुक्ताच्च विपूर्वादनितेः शतृ।
अव्यनच्च व्यनच्चेति स्थावरं जङ्गमं हि तत् ॥

॥ सं ते नवन्त प्रभृता मदेष्विति ॥

सं सम्यक्। ते। अमो ङस्। त्वाम्। नवन्त स्तुवन्ति। लटो लङ्। झेर्झः। शपस्त्वलुक्। *'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। प्रभृताः पूर्णाः। जस्। मदेषु म(दने?देन)। टार्थे सुप्। इति पदार्थाः

तात्पर्यमाह—

॥ तव सर्वं वश इत्येव तदाह ॥

वश्यत्वाद्धयेन हव्या स्तुवन्ति।

॥ त्वे क्रतुमपि वृञ्जन्ति विश्व इति ॥

त्वे इति त्वयीत्यर्थे शे। क्रतुम्। शसोऽम्। मनांसि। वृञ्जन्ति स्थापयन्ति। विश्वे सर्वे।

---

* पा० सू० ६. ४. ७५.

अमुमेवार्थमाह –

॥ त्वयीमानि सर्वाणि भूतानि सर्वाणि मनांसि सर्वे
क्रतवोऽपि वृञ्जन्तीत्येव तदाह ॥

त्वे इत्यस्यार्थस्त्वयीति । विश्व इत्यस्येमानि सर्वाणि भूतानीति । क्रतुमित्यस्य सर्वे क्रतव इति । शसर्थे (स ? जस्)द्वयम् । अस्य तु सर्वाणि मनांसीति । भूतानि कर्तॄणि । वृजी रुधादिः स्थापनार्थः ।

॥ द्विर्यदेते त्रिर्भवन्त्यूमा इति ॥

यत् यदा । द्विः द्वौ । दम्पती । तदा एते पुत्रेण सह । त्रिः त्रयः ऊमा भवन्ति । द्वित्रिरित्यौजसोः सुः ।

तदाह—

॥ द्वौ वै सन्तौ मिथुनौ प्रजायेते ॥

दम्पती मिथुनीभूय पुत्रं जनयतः सदा ।

अत एतदुक्तिः,

॥ प्रजात्यै ॥

स्यात् ।

॥ प्रजायते प्रजया पशुभिर्य एवं वेद ॥

सोऽपि ।

॥ स्वादोः स्वादीयः स्वादुना सृजासमिति ॥

स्वादोः मृष्टाद् भूम्युदकात्, स्वादीयः स्वादुतरं वृष्ट्युदकं, स्वादुना पूर्वदृष्टोदकेन भूगतेन, सृजासम्। *च्छन्दसि परेऽपि। संसृज। दीर्घः सांहितः। भूजलस्योपरि वृष्टिं कुरु।

व्याचष्टे—

॥ मिथुनं वै स्वादु ॥

दम्पतीयोगः प्रियकरत्वान्मृष्टम्।

॥ प्रजा स्वादु ॥

मृष्टान्मृष्टतरामित्यर्थः।

॥ मिथुनेनैव तत्प्रजां संसृजति ॥

सम्पर्चयति। तत् तेन।

॥ अदः सुमधु मधुनाभियोधीरिति ॥

लटो लुङ्यण्न।

॥ मिथुनं वै मधु। प्रजा मधु। मिथुनेनैव तत्प्रजामभियुध्यति ॥

तत् तेन। अभियुधि(:) सम्पर्कार्थः।

अभिवेदेन शरीरसमृद्धिरिति यदवोचाम,

॥ तदुक्तमृषिणा ॥

---

१. 'ष्टः' ख.

---

* पा० सू० १. ४. ८१.

मन्त्रेण तद्दर्शिना वा।

॥ स्वां यत्तनूं तन्वामैरयतेति ॥

*अया विष्ठेति सूत्रोक्तऋचः पादोऽन्तिमस्त्वयम्।
अस्यामृषिर्वामदेव इति शौनकशासनम्॥

अनुकृष्टस्तु यः कश्चित्कल्पेऽथ ब्राह्मणेऽपि वा।
मन्त्रः पद्योऽथ गद्यो वा वामदेव्यं निबोधत॥

इति।

वामदेवस्त्रिष्टुभास्तौदग्निं सर्वप्रवर्तकम्।

अया विष्ठा। छन्दस्त्वादजादावप्यापीद्रूपलोपः। अनया। विष्ठा। '§आतश्चोपसर्गे' भावेऽङ्[1]। टा। एत्वं न कृतम्[2]। अविशिष्टस्थित्या हेतुना। जनयन् कर्वराणि[3] कर्माणि पाकादीनि। सः अग्निः हि। घृणिः दीप्तः। उरुः महान्। वराय वरणीयं हविर्ग्रहीतुम्। गातुः गन्ता। स एव प्रत्युदैद् उद्गतवान्। उद्गमः पतित्वम्। किं प्रति। धरुणं धर्तृ। मध्वः। आमो ङस्। लिङ्गव्यत्ययेन पुंस्त्वम्। संज्ञापूर्वकत्वाद् गुणाभावः। मधूनां रसानां मध्ये। अग्रं प्रधानम्। अन्नमुद(रं?कं) वा। कदा। स्वां यत् यदा तनूं देहं वेदमयं तन्वां देहमय्याम्। ऐरय(तु?त) सम्पर्चितवान्।

---

१ 'सर्गभावेऽङ्' क. ख. घ. 'सर्गभावे टा' ख.।
२. 'ऐवत्वं' क. 'एवत्वं' ग. घ. ३. 'कर्वराणि पा' क. ख. ग.

---

* 'अया विष्ठा जनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः। स प्रत्युदैद्धरुणं मध्वो अग्रं स्वां यत्तनूं तन्वामैरयत' आ० श्रौ० सू० २. १९. १२.

§ पा० सू० ३. ३. १०६

तदाह—

॥ अस्यां शारीर्यामिमां छन्दोमयीमित्येव तदाह ॥

सम्पर्चितवानिति शेषः ।

॥ अथो ॥

अपि च ।

॥ तनूरेव तन्वो अस्तु भेषजमिति ॥

ऊर्जं गाव इत्यस्यास्तृतीयः पाद एव हि ।
दुवस्युर्वन्दनः सोमं जगत्यास्तौत्समृद्धये ॥

अर्थस्तु– *ऊर्जं स्वादु बलकरञ्च । हे गावः! यवसे । सुपो ङि । निर्धारणे । नवतृणेषु मध्ये । पीवः । पीवस् प्रवृद्धम् । अत्तन भक्षयत ।

अदेर्लोड्लुक्शपोऽथ [§]तप्तनेति तनप् कृतः ।

ऋतस्य । अमो ङस् । आशिरादिरसम् । याः यूयम् । सदने स्थाने । कोशे । मेघनाम लुप्तोपमम् । मेघोपमे पूतभृदादिके अङ्ध्वे । लुङो ल(ङ् (ट्) । दत्तवत्यः स्थः । किञ्च तनूः शरीरजं पयआशिरादि एव तन्वः पोषकत्वाच्छरीरभूतस्य सोमस्य । अस्तु भेषजं सुखदम् । आ साधु । सर्वतातिम् । [¶]सर्वदेवात्तातिल् । सर्वदा । अदितिम् अखण्डनम् । वयं वृणीमहे ।

स्वानुगुणं व्याचष्टे—

---

* ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ध्वे । तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥ ऋक्सं० १०. १०० १०.

§ प० सू० ७. १. ४५. ¶ पा० सू० ४. ४. १४२.

॥ अस्यै शारीर्या इयं छन्दोमयीत्येव तदाह ॥

भेषजमिति शेषः । ङसो ङेद्वयम् ।

अथाद्यायां पुरुष इत्युपधानेनावयुत्यं[1] स्तौति—

॥ तस्यै यान्यष्टावक्षराणि सा गायत्री ॥

ङसो ङे । तस्याः ।

॥ यान्येकादश सा त्रिष्टुप् ॥

तस्या अक्षराणीत्येव ।

॥ यानि द्वादश सा जगती ॥

तस्या अक्षराणीत्येव । चत्वारिंशदक्षरायामस्यामव्यूहेनैकत्रिंशद्गतानि ।

॥ अथ यानि दश सा विराड् । दशिन्येषु त्रिषु
छन्दस्सु प्रतिष्ठिता ॥

व्यूहेन ।

व्रीह्यादित्वादिनेर्डो(ष्शो[2] पूच) टिलोपो दशशब्दतः ।
*वक्तव्यं छन्दसि डिनिः शन्शतोरिति वा भवेत् ॥

'दशाक्षरा विराळ्' इति श्रुतिः । त्रिषु गायत्रीत्रिष्टुब्जगतीषु ।

१. 'त्य स्तुतिमाह' क. घ. २. 'ष्छ' क. ख. ग.

* वा०—'शन् शतो डिनिश्छन्दसि तदस्य परिमाणमित्यर्थे वाच्यः'।

॥ पुरुष इति त्र्यक्षरम् ॥

आद्योपाद्यचतुर्थेषु पदेषूपनिधीयते ।

इति शेषः ।

॥ स उ विराजि ॥

स पुरुषः । उ पुनः । प्रतिष्ठितेति प्रकृतमर्थाद्विपरिणम्यते ।

किमित्यनुष्टुबादीन्यवयुत्य नोक्तानीत्यत आह—

॥ एतानि वाव सर्वाणि छन्दांसि यान्येतानि
विराट्चतुर्थानि ॥

वाव खलु । एतानि गायत्रीत्रिष्टुब्जगतीविराजः ।

*एषां प्रयोगे बाहुल्यात्सर्वशब्दाभिधयता ।

॥ एवमु हैव ॥

एवञ्च सति ।

॥ एवं विदुष एतदहः सर्वैश्छन्दोभिः प्रतिपन्नं भवति ॥

टार्थे ङस् । विदुषः विदुषा । अहः अहरवयवानिष्केवल्यम् । प्रतिपन्नं प्राप्तम् । भवति सम्पद्यते ।

चतुर्थः खण्डः ।

---

* 'गायत्र्यादीनां सवननिष्पादकत्वेन मुख्यत्वात्सर्वच्छन्दोरूपत्वोपचार' इति सायणः ।

अथ विहरणमाह—

॥ ता नदेन विहरति ॥

ता ऋचः ।

*तदिदास नवर्चन्तु, §तासु षट्, पञ्च ¶भूय इत् ।
† नृणां तिस्र आत्मपर्वं त्रयोविंशत्यृचं मतम् ॥
‡ नदं व ओदतीनामृङ्नदशब्देन कथ्यते ।

विहरति व्यतिषजेत् ।

॥ पुरुषो वै नदः ॥

पुंलिङ्गत्वात् ।

॥ तस्मात्पुरुषो वदन्सर्वः सन्नदतीव ॥

+तस्मादिति किञ्चिदित्यर्थः नादो गम्भीरध्वनिः । इवेत्येवार्थः ।

कोऽसौ नद इत्याह—

॥ नदं व ओदतीनामितीँ३ ॥

प्रशंसायां प्लुतोऽनुनासिकः ।

ओदतीनामित्यत्र प्रकृत्यर्थमाह—

---

* ऋक्सं० १०. १२०. १. § ऋक्सं० १०. ५४. १.
¶ ऋक्सं ६. ३०. १. † ऋक्सं० ३. ५१. ४.
‡ ऋक्सं ८. ६९. २ + 'नदशब्दः पुरुषरूप एव यस्मात्तस्माल्लोके सर्वः पुरुषो भाषमाणः सम्यग्ध्वनिं करोतीव दृश्यते' इति सायणः ।

॥ आपो वा ओदत्यो या दिव्याः ॥

दिवि भवा दिव्या वर्षरूपाः ।

कुतः,

॥ ता हीदं सर्वमुन्दन्ति ॥

ताः दिव्याः । इदं जगत् । उन्दन्ति सिञ्चन्ति । *'श्नान्नलोपः' । §'श्नसोरल्लोपः' । उनत्तेरोदतीति पृषोदरादित्वात् ।

पुनः स्तौति—

॥ आपो वा ओदत्यो या मुख्याः ॥

मुखे भवा मुख्याः ।

कथम्,

॥ ता हीदं सर्वमन्नाद्यमुन्दन्ति ॥

पञ्चविधमन्नं क्लेदयन्ति ।

॥ नदं योयुवतीनामितीँ३ ॥

पूर्ववत्प्लुतोऽनुनासिकः ।

॥ आपो वाव योयुवत्यो या अन्तरिक्ष्याः ॥

कथम्,

॥ ता हि पोप्लूयन्त इव ॥

---

* पा० सू० ६. ४. २३. § पा० सू० ६. ४. १११.

अन्तरिक्षे कुटिलं गच्छन्ति ।

किञ्च,

॥ आपो वाव योयुवत्यो याः स्वेदते ॥

स्वेदते गात्रेभ्यः क्षरन्ति । क्षेत्तः । श्यनश्शप् ।

कथम्,

॥ ता हि सरीसृप्यन्त इव ॥

अत्यर्थं गच्छन्ति । सृपेर्यङ् । *'रीगृदुपधस्य च' ।

॥ पतिं वो अघ्न्यानामितीः३ । आपो वा अघ्न्या या अग्नेर्धूमाज्जायन्ते ॥

अघस्य नाशयितृयोऽघ्न्या अहिंस्या वेति निर्वचः ।
अग्निसम्बन्धिमेघस्य धूमाद्यास्संभवन्ति हि ॥
जलधूममयो मेघो वैद्युताग्नुपबृंहितः ।

तथा,

॥ आपो वा अघ्न्या याश्शिश्नात्प्रसृज्यन्ते ॥

टार्थे ङसिः । शिश्नेन । (प्रतीप्रि)ति वेरर्थे ।

रेतोरूपास्तु या योनौ विसृज्यन्ते हि कामिना ।
शिश्नेन ता अघ्न्यसंज्ञाः समाहननयोमतः ॥

---

* पा० सू० ७. ४. ९०.

॥ धेनूनामिषुध्यसीती३ँ । आपो वाव धेनवः ॥

कथम् ,

॥ ता हीदं सर्वं धिन्वन्ति ॥

इदं जगत् । धिन्वन्ति प्रीणयन्ति । *'धिन्विकृण्व्योर च' ।

॥ इषुध्यसीति यदाह पतीयसीत्येव तदाह ॥

इषुध्यसीति कण्ड्वादियगन्तो गमनार्थयुक् ।

पतयतिर्गत्यर्थोऽपि, मे कर्णौ पतयत इति यथा । अत ईच्छान्दसः ।

§नदं वः,

प्रियमेध इन्द्रमस्तौच्चतुस्सप्तकयोष्णिहा ।

नदं मेघादिशब्दकारिणम् । वः युष्माकम् । ओदतीनां भूमिं सिञ्चतीनाम् । नदं योयुवतीनां प्लवमानानाम् । पतिं स्वामिनम् । अघ्न्यानां मेघजातानाम् । धेनूनामिति प्रियं कुर्वतीनाम् । इषुध्यसि । सिपः सिप् ।

---

* पा० सू० ३. १. ८०.

§ ' नदं व ओदतीनां नदं योयुवतीनाम् ।

पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ ऋक्सं० ८. ६९. २. इतीमामृचं सायण एवं व्याख्याति— ओदतीनां तृतीयसवने ऋजीषमुन्दतीनामहन्तव्यानां वो युष्माकं पतिं पालकं यजमानं रक्षत । हे इन्द्र त्वं धेनूनां धेनुवत्प्रीणयितॄणामपामिषुध्यसि ईश्वरोऽसि । इषुध ऐश्वर्ये [क० ग० प०] इति धातुः इति पतीयसीत्येव तदाहेत्यस्य पतिवत् स्वामिवदाचर(ती?)सी त्यर्थवर्णनं च करोति ।

आपो ऽ वः पतिन्त्विन्द्रं गच्छामि शरणं त्वहम्।
प्रियमेधस्तेन द(त्तं? त्त) मह्यं सम्पदमुत्तमाम् ॥
युष्मद्बन्धुसंश्रयोऽपि युष्मत्संश्रय एव हि।

तत्र,

॥ त्रिष्टुभं चानुष्टुभं च विहरति ॥

व्यतिषजति।

*तत्तांभूनृत्रयोविंशत्यृचस्त्रिष्टुभ एव हि।
चतुष्पात्त्वादनुष्टुप्त्वं नदमित्युष्णिहो भवेत्॥

वक्ष्यति— $ 'उष्णिगक्षरैर्भवत्यनुष्टुप्पादैः' इति।

एवमेषा ब्राह्मणे (व? च) सूत्रे चानुष्टुबुच्यते।

£'प्र प्र वस्त्रिष्टुभमिषमर्चत प्रार्चत यो व्यतीरफाणयद् इति प्रज्ञाता अनुष्टुभश्शंसति' इति। ‡ 'तृचा आनुष्टुभा' इति च। §प्र प्र व इति तृचे हीयं द्वितीया। त्रिष्टुभमिति। शसोऽम्। जातावेकवचनम्।

॥ †वृषा वै त्रिष्टुब्योषानुष्टुप् ॥

ऐन्द्रत्वात्त्रिष्टुभः पुंस्त्वं वाक्त्वात्स्त्रीत्वमनुष्टुभः।

---

* 'तदिदास' ऋक्सं० १०. १२०. 'तां सु ते' ऋक्सं० १० ५४. 'भूय इद्वावृधे' ऋक्सं० ६. ३०. 'नृणामु त्वा' ऋक्सं० १. ५१. ४ इति तदिदास नवर्चन्तु इति श्लोकोक्ता ऋचोऽत्र प्रदर्शिताः।

$ ऐ० आ० १. ३. ८. £ ऐ० आ० १६. ४.

‡ आ० श्रौ० ६. २ ९. § ऋक्सं० ८. ६९ १.

† 'तत्र त्रिष्टुभः प्रवृद्धत्वाद् वृषत्वं सेचनसमर्थपुरुषत्वात्। अनुष्टुभो न्यूनत्वाद्योषित्त्वम्' इति सायणः।

॥ तन्मिथुनम् ॥

तत् त्रिष्टुबनुष्टुम्मेलनं स्त्रीपुंसयुगलं[1] स्यात् ।

॥ तस्मादपि पुरुषो जायां वित्त्वा कृत्स्नतर-
मिवात्मानं मन्यते ॥

यस्मात् प्रशस्तमिति च शेषः । यस्माल्लोकेऽपि पुरुषो जायां भार्यां वित्त्वा लब्ध्वा कृत्स्नतरमतिपरिपूर्णमिव खलु स्वात्मानं मन्यते अवगच्छति तस्मान्मिथुनरूपं त्रिष्टुबनुष्टुम्मेलनं प्रशस्तमित्यर्थः ।

॥ ताभिः प्रथमया पञ्चविंशतिर्भवन्ति ॥

तत्तांभूनृत्रयोविंशत्यृचस्थयावृत्तयाद्यया ।
स्युः पञ्चविंशतिर्ह्येवमात्माख्ये ह्याद्यपर्वणि ॥

॥ पञ्चविंश आत्मा । पञ्चविंशः प्रजापतिः ॥

प्रजानां पालयिता ।

कथम्,

॥ दश हस्त्या अङ्गुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पञ्चविंशः। तमिममात्मानं पञ्चविंशं संस्कुरुते। अथो पञ्चविंशं वा एतदहः पञ्चविंश एतस्याह्नः स्तोमः तत्समेन समं प्रतिपद्यते। तस्माद् द्वे एव पञ्चविंशतिर्भवन्ति ॥

---

१. 'लं वा स्यात्' क. ध.

व्याख्यातम् ।

पञ्चमः खण्डः ।

---

*॥ तदिति प्रतिपद्यते। तत्तदिति वा अन्नम्। अन्नमेव तदभि-प्रतिपद्यते। एतां वाव प्रजापतिः प्रथमां वाचं व्याहरदेकाक्षरद्व्यक्षरां ततेति तातेति । तथैवैतत्कुमारः प्रथमवादी वाचं व्याहरदेकाक्षरद्व्यक्षरां ततेति तातेति । तयैव तत्तवत्या वाचा प्रतिपद्यते। तदुक्तमृषिणा–बृहस्पते प्रथमं वाचो अग्रमिति। एतद्ध्येव प्रथमं वाचो अग्रम् । यत्प्रैरत नामधेयं दधाना इति। वाचा हि नामधेयानि धीयन्ते। यदेषां श्रेष्ठं यदरिप्रमासीदिति । एतद्ध्येव श्रेष्ठमेतदरिप्रम् । प्रेणा तदेषां निहितं गुहाविरिति। इदमु ह गुहाध्यात्ममिमा देवताः । अद उ आविराधिदैवतम । इत्येतत्तदुक्तं भवति ॥

§एकार्थस्य पुनः पाठे चिन्त्यमाहुः प्रयोजनम् ।
पुनः रुच्यर्थमिति चेद्व्यवस्था प्रसज्यते ॥

षष्ठः खण्डः ।

---

* तदिति इत्यारभ्य भवतीत्यन्तं खपाठे नास्ति । किन्तु ' तदिति प्रतिपद्यते इत्यादिः खण्डो व्याख्यातः ' इत्येव दृश्यते ।

§ ' तदिति प्रतिपद्यते इत्ययं खण्डः पूर्वं तच्छब्दस्य व्याख्यानार्थं पठितोऽपि पुनः कृत्स्नशब्दप्रशंसार्थं पठ्यते ' इति सायणः ।

तदिदासीयादि पुनः स्तौति—

॥ तदिदास भुवनेषु ज्येष्ठमिति प्रतिपद्यते । यद्वै ज्येष्ठं तन्महत् ॥

अतिशयेन प्रशस्यं हि महत् स्यात् ।

॥ महद्वत् ॥

सूक्तं महदर्थयोगात् ।

॥ रूपसमृद्धमेतस्याह्नो रूपम् । तां सु ते कीर्तिं मघवन्महित्वेति महद्वत् ॥

महदर्थं महिशब्दयोगात् ।

॥ रूपसमृद्धमेतस्याह्नो रूपम् । भूय इद्वावृधे वीर्यायेति । वीर्यवद्रूपसमृद्धमेतस्याह्नो रूपम् । नृणामु त्वा नृतमं गीर्भि-रुक्थैरिति उक्थं वा एतदहः ॥

बृहतीसहस्रवत्त्वात् ।

॥ उक्थवद्रूपसमृद्धमेतस्याह्नो रूपम् । न्यूनाक्षरे *प्रथमे पदे विहरति ॥

---

१. ‘ स्तत्वात् ’ क ग.

---

* “ तदिदास ” इत्ययं प्रथमपादो दशाक्षरत्वादेकेनाक्षरेण त्रिष्टुभो न्यूनो “ नदं वः ” इत्ययं पादः सप्ताक्षरत्वादेकेनाक्षरेण न्यूनानुष्टुप् । पादद्वयं व्यतिषक्तं भवति ’ इति सायणः ।

तदिदास यतो जज्ञ इति पदे दशाक्षरत्वादेकादशाक्षरत्वान्न्यूने नदेन व्यतिषजेत्।

॥ न्यूने वै रेतस्सिच्यते ॥

योनौ सङ्कुचिते स्थाने रेतः पुंभिः प्रसिच्यते।

। न्यूने प्राणाः ॥

सिराकेशादिषु प्राणा द्वादश प्रचरन्ति च।
मूत्र्यः पुरीष्यो रेतस्यो द्वौ स्तन्यौ सप्त मूर्ध्नि च ॥

॥ न्यूनेऽन्नाद्यं प्रतिष्ठितम् ॥

प्रतिष्ठितं भुक्तमन्नं सर्वं सङ्कुचितोदरे।

॥ एतेषां कामनामवरुद्ध्यै। एतान्कामानवरुन्धे य एवं वेद ॥

सः। कामान् काम्यान्।

किञ्च,

॥ द्वे दशाक्षरे भवतः ॥

पदे इत्यपेक्षते। आदितो द्वे पदे।

पादशब्दस्य पर्यायः पदशब्दो नपुंसकः।

॥ उभयोरन्नाद्ययोरुपाप्त्यै ॥

उभयोरिति कर्तरि षष्ठी। अन्नाद्ययोरिति तु कर्मणि। उपाप्तिः

शीघ्रलाभः ।

किं तदुभयम्,

॥ यच्च पद्वद्यच्चापादकमिति ॥

पद्वत् जङ्गमं वस्तु पशुपुत्रादि । अपादकं स्थावररूपमारामादि ।

॥ अष्टादशाष्टादशाक्षराणि भवन्ति ॥

पादानीत्यस्य सम्बन्धः प्रकृतं हि पदे इति ।
आत्माख्यवर्गगतपादेषु सदैकादशकेषु तु ॥
नदेन व्यतिषक्तेषु चतुस्सप्तपदेन च ।
न्यूनाद्योपाद्यतुर्येषु क्रमाच्च पुरुषे स्थिते ॥
अष्टादशाक्षराणि स्युर्व्यतिषक्तपदानि हि ।

अवयुत्य स्तौति—

तत्र,

॥ यानि दश ॥

तेषु,

॥ नव प्राणाः ॥

नाभेरूर्ध्वं नव प्राणा द्वौ स्तन्यौ सप्त मूर्धनि ।
अक्षराण्यभवन्प्राणा नवसंख्यासमन्वयात् ॥

॥ आत्मैव दशमः ॥

वर्णः ।

॥ सात्मनः संस्कृतिः ॥

महत्त्वप्राप्तियोग्यता ।

एवमष्टादशसूपयुक्तेषु[1] प्रतिपादम्,

॥ अष्टावष्टा उद्यन्ते ॥

अतिरिच्यन्ते । झर्झः । उद्यन्ति ।

शाकल्यस्य वलोपो न पूर्वत्र स्यात् परत्र तु ।
ओष्ठ्ये परे स्याद्वलोपः सर्वत्र प्रातिशाख्यतः ॥
*'ओष्ठ्ययोन्योर्मुग्रमनोष्ठ्ये वकारोऽत्रान्तरागमः' ।

॥ अश्नुते यद्यत्कामयते य एवं वेद ॥

सः ।

अशेस्तानिन्यष्टशब्द[2] इति कृत्वाऽश्नुतेवचः ।

सप्तमः खण्डः ।

॥ ता नदेन विहरति ॥

उक्तार्थम् ।

स्तौति –

---

१. 'शकेदसूक्तेषु' क. 'शकेदसूपयुक्तेषु' ख. २. 'स्तनि ह्यष्ट' ख.

---

* ऋग्वेदप्रातिशाख्यम् २. ११.

॥ प्राणो वै नदः ॥

*नदस्य प्राणकार्यत्वात् ।

॥ §तस्मात्प्राणो नदन्सर्वस्सन्नदतीव ॥

तस्मादिति तथाह्यर्थः । नदन्नुच्चारयन् । सर्वः प्राणः । अर्शआदित्वादच् । प्राणी । सन्नदति गम्भीरध्वनिं करोति । इव साधु ।

नदमाह—

॥ नदं व ओदतीनामिती ३ँ ॥

व्याख्यातम् ।

॥ उष्णिगक्षरैर्भवत्यनुष्टुप्पादैः ॥

इयं चतुस्सप्तकत्वाद् अष्टाविंशत्यक्षरत्वाद् उष्णिक् अनुष्टुप् च । पूर्वं पादकृतमेवानुष्टुप्त्वमाश्रित्य त्रिष्टुभश्चानुष्टुभश्चेत्युक्तमित्यवोचाम ।

॥ आयुर्वा उष्णिग्वागनुष्टुप्तदस्मिन्नायुश्च वाचं च दधाति ॥

तत्तेनोष्णिगनुष्टुब्रूपनदविहरणेन । अस्मिन् सत्रिगणे । दधाति । होता ।

---

* 'तस्मिन्मन्त्रे यो नदशब्दः स प्राणमाचष्टे प्राणस्य कार्योपेतत्वात्' इति सायणः। § 'यस्मादेवं तस्मादखिलेषु देहेष्ववस्थितः सर्वः प्राणो नदन् शब्दं कुर्वन्सन्नदतीव । सुषुप्त्यादौ समाश्वासरूपेण सम्यग्ध्वनिं करोत्येव'। इति सायणः ।

॥ ताभिः प्रथमया पञ्चविंशतिर्भवन्ति। पञ्चविंश आत्मा पञ्चविंशः प्रजापतिः। दश हस्त्या अङ्गुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पञ्चविंशः। तमिममात्मानं पञ्चविंशं संस्कुरुते। अथो पञ्चविंशं वा एतदहः पञ्चविंश एतस्याह्नः स्तोमः। तत्समेन समं प्रतिपद्यते। तस्माद् द्वे एव पञ्चविंशतिर्भवन्ति ॥

व्याख्यातम्।

॥ इत्यध्यात्मं पञ्चविंशः ॥

आत्मानमधिकृत्य। विभक्त्यर्थेऽव्ययीभावः। *'अनश्चे'ति टच्समासान्तः।

॥ अथाधिदैवतम् ॥

पञ्चविंशो वक्ष्यते।

कथम्,

॥ चक्षुः श्रोत्रं मनो वाक्प्राणस्ता एताः पञ्च देवता इमं विष्टाः पुरुषम् ॥

विष्टाः प्रविष्टाः। पुरुषे वर्तन्ते इत्यर्थः।

किञ्च,

॥ पञ्चो हैवैता देवता अयं विष्टः पुरुषः ॥

---

* पा० सू० ५. ४. १०८.

उ पुनः । एताः शम् ।

कथम्,

॥ सोऽत्रालोमभ्य आ नखेभ्यः सर्वः *साङ्ग आप्यते ॥

सः आत्मा । अत्र शरीरे । सर्वः साङ्गः । ङ्यर्थे सुद्वयम् । सर्वस्मिन्साङ्गे । आप्यते आप्नोति । श्नोः श्यन् । तिपस्तः ।

॥ तस्मात्सर्वाणि भूतान्यापिपीलिकाभ्य आप्तान्येव जायन्ते ॥

उत्पद्यन्ते ।

॥ तदुक्तमृषिणा ॥

आत्मनो जगद्व्यापनम् ।

वैरूपेण सध्रिणा । अथवा तापसेन घर्मेण ।

॥ †सहस्रधा पञ्चदशान्युक्थेति ॥

---

* 'साङ्गः सम्पूर्णावयवः आप्यते आप्तो दृश्यते' इति सायणः ।

† सहस्रधा पञ्चदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् । सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥ (ऋक्सं० १०. ११४. ८.) अत्र सायणः सहस्रधा पञ्चदशान्युक्थेऽस्य सहस्रसंख्याकेषु ब्रह्मादिपिपीलिकान्तेषु देहेषु चक्षुरादिपञ्चकं मातृसम्बन्धीनि पितृसम्बन्धीनि च तदाधारभूतपञ्चभूतानि मिलित्वा दशेत्येवं पञ्चदशाङ्गान्युत्कृष्टानीति, यावद्द्यावापृथिवी तावदित्तद् इत्यस्य द्यावापृथिव्योर्यावत्परिमाणमस्ति तावदित्तत्परिमाणमेवात्माधिष्ठितं प्राणिदेहजातं भवतीति, सहस्रधा महिमानः सहस्रम् इत्यस्य सहस्रसंख्याकेषु देहेषु सहस्रं महिमानः सहस्रसंख्याका महान्तो व्यवहारविशेषा दृश्यन्ते इति, यावद्ब्रह्म विष्ठितं तावती वाग् इत्यस्य ब्रह्म नानाविधप्राणिदेहरूपेण

दिवि भूम्याश्च वाग्यत्र तत्र ब्रह्म प्रतिष्ठितम् ।
तस्या माहात्म्यमुक्थादिक्रतुशस्त्रादिके स्थितम् ॥

इत्यर्थं मत्वा व्याचष्टे—

॥ *पञ्च हि दशता भवन्ति ॥

पञ्च हि दश ता उ भवन्ति । ता तानि उक्थाख्यक्रतुशस्त्राणि पञ्चदश भवन्तीत्यर्थः । दशत इति पदच्छेदे तु दशनस्तासिल् । दशसंख्योपरि पञ्चैवेत्यर्थः । ¶'पञ्चदशतौ वर्गे वा' इति (दन्? डतो) डसिश्चेद्दशव (र्गाः? र्गो)परि पञ्चैवेत्यर्थः ।

॥ यावद्द्यावापृथिवी §तावदित्तदिति । यावती वै द्यावापृथिवी तावानात्मा ॥

द्यावापृथिव्यौ ।

॥ $सहस्रधा महिमानः सहस्रमिति । उक्थान्येव

1. 'क्थ्या' Mss. 2. 'क्थ्या' Mss.

यावदभिधेयं भूत्वा विशेषेण स्थितं तावती तत्परिमाणा वाग्भवति । एकैकस्याभिधेयार्थस्यैकैकनामापेक्षणाद् इत्यर्थं च वर्णयित्वा तदनुसारेण पञ्च हि दशतो भवन्तीत्यादिब्राह्मणार्थवर्णनं कृतवान् ।

* 'चक्षुरादीनि पञ्चाकाशादीनि मातृपितृसम्बन्धीनि भूत्वा दशकात् सम्पूर्णं देहरूपेण निष्पाद्यन्ते' इति सायणः । ¶ पा० सू० ५. १. ६०

§ 'आत्मा देहविशिष्टो जीवात्मा । द्यावापृथिव्योर्लोकयोर्जीवदेहे पूर्णत्वादात्मनस्तत्समानपरिमाणत्वं द्रष्टव्यम्' इति सायणः ।

$ 'यावन्त्युक्थान्युत्कृष्टानि चक्षुरादीनि सन्ति तान्येव तत्तेन महि(मा ? म) शब्देनानुवदन्नयमृषिर्मन्त्रो मदति हर्षति । तथा महि(मा ? म)शब्दप्रयोगात्तान्यङ्गानि महयति ।' इति सायणः ।

तदनुमदति महयति ॥

श्यनः शप्। माद्यति तृप्यति । *'तृतीयार्थे' इत्यनोः कर्मप्रवचनीयत्वाद् उक्थैरित्यर्थः । महयति मह(दु ? मु)त्सवं करोति ।

॥ यावद्ब्रह्म विष्ठितं तावती वागिति। यत्र ह क्व च ब्रह्म तद्वाग् यत्र वा वाक्तद्वा ब्रह्मेत्येतत्तदुक्तं भवति ॥

यत्र ह क्व च सर्वत्र। तत् तत्र। वाशब्दः खल्वर्थः। एतत्तदुक्तं भवति—

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परश्च यत् ।
ते च क्रतुगतैश्शस्त्रैः स्तू (य ? ये)ते इति वर्ण्यते ॥
अत्रापि पञ्चविंशत्वं देहापेक्षं प्रचक्षते ।

अथात्मपर्वसूक्तानि संख्यया स्तौति पूजयन् ।—

॥ †एषां वा एषां सूक्तानां नवर्चं प्रथमम् ॥

इषेः कर्मणि घञ्येषः छन्दस्त्वादामि नुण्न तु ।

एष्टव्यानां श्रद्धेयानां वै एषां सूक्तानां मध्ये आद्यं तदिदासीयं

---

* पा० सू० १. ४. ८५

† 'विविधानि सूक्तानि शस्त्रार्थं 'नदं व' इत्यादिकया व्यतिषक्तानि केवलानि चेति । तत्राद्येनैषामित्यनेन पदेन व्यतिषक्तानि परामृश्यन्ते । 'ता नदेन विहरति' इत्येवं व्यतिषक्तानामनन्तरमेव प्रकृतत्वात् । द्वितीयेनैषामित्यनेन व्यतिषक्तान्तर्भूतानि केवलानि परामृश्यन्ते । तानि च 'तदिदास इत्यादिव्याख्यानप्रकृतानि । तत्र (या ? वा)क्षरयोजना— एषां व्यतिषक्तानां मध्ये यानि केवलानि सन्ति, (ये ? ए)षां केवलानां मध्ये यत्प्रथमं तदिदासेति सूक्तं तन्नवर्चम्' । इति सायणः ।

नवर्चम्। *'तादिन्नवाथर्वणो बृहद्दिव' इति हि सर्वानुक्रमणी।

तथा §तां सु षड् ‡'भूयः पञ्च। इति च।

स्तौति—

॥ नव वै प्राणाः ॥

नाभेरूर्ध्वं नव प्राणा द्वौ स्तन्यौ सप्त मूर्धनि।

॥ प्राणानां क्लृप्त्यै ॥

स्यात्। क्लृप्तिः सर्वसम्मता प्राप्तिः।

॥ षळृचं भवति ॥

तां सुतीयं हि षळृच+'मृक्पूरि'त्योऽत्र डश्च ळः।

॥ षड्वा ऋतवः ॥

वसन्ताद्याः।

ततश्च द्वितीयं तां सुतीयम्,

॥ ऋतूनामाप्त्यै ॥

भवेत्।

॥ पञ्चर्चं भवति ॥

तृतीयं भूय इद्वीयं सूक्तं पञ्चर्चमुच्यते।

---

* ऋक्सर्वां० १०. १२०. § ऋक्सर्वां० १०. ५४.

‡ ऋक्सर्वां० ६. ३० + पा० सू० ५. ४. ७४.

ततः किम् ।

॥ पञ्चपदा पङ्क्तिः ॥

बहुव्रीहावन्त्यलोपे *'पाद: पद्'[§]ऋची'ति च ।

॥ ¶पङ्क्तिर्वा अन्नम् ॥

पङ्क्तीति पञ्चसंख्योक्ता त्वन्नं पञ्चविधं मतम् ।
भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं खाद्यञ्च पञ्चधा ॥

॥ अन्नाद्यस्यावरुद्ध्यै ॥

वक्तव्यम् ।

॥ तृचो भवति ॥

चतुर्थस्तु सूक्तैकदेशः नृणामु त्वेति तिस्रः ।

॥ त्रयो वा इमे त्रिवृतो लोका एषामेव
लोकानामभिजित्यै ॥

तृचः स्यात् ।

॥ ता अभिसम्पद्यन्ते बृहतीं छन्दः ॥

---

१. 'ख्या क्त्या स्व' क. घ.

---

* पा० सू० ६. ४. १३०. § पा० सू० ४. १- ९.

¶ 'पङ्क्तिश्छन्दः पञ्चभिश्छन्दःपादैरुपेतमन्नं च पङ्क्तिश्छन्दःसाध्यत्वात् क्षेत्रेषु पङ्क्तिरूपेणोप्तत्वाद्वा पङ्क्तिरूपम्' इति सायणः ।

*त्रयोविंशत्यृचस्तत्तांभूनृस्थास्त्रिष्टुभस्तु याः ।
नदोष्णिग्विहृतास्तास्तु षट्चत्वारिंशदेव हि ॥

बृहत्यो[1] हि भवन्तीति प्रोच्यतेऽत्रेति वै विदुः ।
आ(द्योऽत्रि?द्यात्रि)त्वेन पञ्चाशद्बृहत्योऽत्रात्मनि स्थिताः॥

उक्तं हि गा(आपु?जबृ)त्री च द्वे बृहत्यौ तु सम्पदा ।
मही द्यौस्ते हि गाजोक्तौ बृहत्योस्समता यथा(?) ॥

इति ।

अत्र गेत्याद्येकदेशनिर्देशः । गायत्रीजगत्यौ द्वे बृहत्यावित्यादि । ब्राह्मणे †'मही द्यौरि'त्यादि £'यदु गायत्री च जगती च ते द्वे बृहत्यौ' इत्यध्यगीष्महीत्यर्थः । अभिसम्पद्यन्ते प्राप्नुवन्ति ।

या बृहती तद्,

॥ अमृतं देवलोकम् ॥

विद्यात् । मरणाद्युपद्रवरहितं देवस्य लोकं रूपम् ।

॥ §एष आत्मा ॥

बृहत्याख्यः ।

१. 'त्यो महि भ' क ख. ग.
२. 'गाज पु बृत्री' क. ग., 'गाजावुत्री' ख.

* तत्तांभूनृ इति । 'तदिदास' ऋक्सं० १०. १२०. 'तां सु ते' ऋक्सं० १०. ५४. 'भूय इद्वावृ' ऋक्सं० ६. ३०. 'नृणामु त्वा' ऋक्सं० ३. ५१. ४. इति सूक्तानां तृचस्य चैकदेशाः । † ऐ० आ० १७. ४. £ ऐ० आ० १७. ४. § 'एष ईदृशो बृहतीसंघ आत्मा पक्ष्याकारस्य शस्त्रस्य मध्यदेहः' इति सायणः ।

॥ [*]एव मु हैव ॥

एवं हीत्यर्थः । ततश्च,

॥ एवंविदेतयैव सम्पदामृतमेवात्मानमभि-
सम्भवति[१] सम्भवति ॥

एवं विद्वान् [£]सम्पदा अपवर्गाख्यया आनन्दाब्धिरूपया अमृतम् अभि सम्यक् सम्भवति प्रतिपद्यते । द्विरुक्तिरुक्तार्था ॥

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां महाव्रते

तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः ।

तृतीयाध्याय आत्माख्यं शस्त्रे पर्वाद्यमीरितम् ।
अथ ग्रीवाशिरो त्रिजवस्तत्पक्षौ पुच्छमेव च ॥

धाय्यैकाशीतयस्तिस्र इति पर्वाणि वै दश ।

---

१. 'ति सम्भवत्येवामृतमात्मानमिति' ङ. २. 'ख्य' क. ख. ग.

---

* 'अनेन प्रकारेण पक्ष्याकारस्य मध्यदेहः । सम्पादित इति शेषः' । इति सायणः । £ 'एतयैव सम्पदा पक्षिदेहमध्यसम्पादनेनामृतमेवात्मानं विनाशरहितं स्वरूपमभिसम्भवति । तद्ध्यानसहिते महाव्रते कर्मणि मनुष्यवच्छीघ्रं विनाशरहितं देवजन्म प्राप्नोतीत्यर्थः' इति सायणः ।

उच्यते सूददोहाख्यो मन्त्रः पर्वान्तवत्यपि ॥

॥ अथ सूददोहाः ॥

स्यात्। आत्मपर्वानन्तरं *'ता अस्य सूददोहसः' इति सूददोहस्संज्ञं मन्त्रं शंसेत्।

स्तौति—

॥ प्राणो वै सूददोहाः ॥

प्राणकार्यत्वात्।

॥ प्राणेन पर्वाणि सन्दधाति ॥

ऋङ्मयस्य सुपर्णस्य यानि पर्वाणि तानि तु।
प्राणेन संश्लेषयति तेन सर्वं सुखं भवेत् ॥

॥ $अथातो ग्रीवाः ॥

शंसेत्।

अथात इत्ययं शब्दोऽनन्तरार्थस्य बोधकः।
†'यस्येदमारजे'त्याद्या ग्रीवासंज्ञा ऋचो मताः ॥

॥ [1]ता आचक्षते §अयथाच्छन्दसमुष्णिह इति ॥

---

1. 'यथा' क. ख. ग. च. ढ. ण. 'सा आचक्षते अयथाच्छ' ञ.

---

* ऋक्सं० ८. ६९. ३. $ 'अथ मध्यदेहकथनानन्तरं यस्मात्षड्वीरास्यभागः(?) पक्ष्याकारस्यापेक्षितोऽतः कारणाद् ग्रीवारूपा ऋचा शंसेत्' इति सायणः। † ऐ० आ० ४. २. १. § 'यथाच्छन्दसमध्यापकप्रसिद्धवेदपाठमनतिक्रम्यगीक्षरगणनया तिस्र उष्णिहः सम्पद्यन्ते। तत्र छन्दःपूरणायाक्षरान्तरप्रक्षेपं पुरुष इत्यादिवदपेक्षन्ते' इति सायणः।

अयथाच्छन्दसम्[1] । *'अनसन्तान्नपुंसकाच्छन्दसि' इति समासान्तः ।

उष्णिहो वेदितव्यास्ता वर्णैर्यद्यपि नोष्णिहः ।
छन्दश्शास्त्रविरोधेऽपि वचनादुष्णिहस्त्विमाः ॥

॥ अथ सूददोहाः । प्राणो वै सूददोहाः प्राणेन पर्वाणि सन्दधाति । अथातः शिरः ॥

स्यात् । ऋङ्मयस्य शिरः ।

॥ तद्गायत्रीषु भवति ॥

†इन्द्रमिद्गाथिनो बृहदित्यृक्षु दशसु ।

॥ §अग्रं वै छन्दसां गायत्री[2] ॥

अग्रं मुखं प्रथमतः पाठाद् गायत्र्युष्णिगिति ।

॥ अग्रमङ्गानां शिरः ॥

निर्माणकाले देहस्य शिरः पूर्वं हि जायते ।

॥ तदर्कवतीषु भवति ॥

---

१. 'यथा' क. ख. ग. २. 'त्रं' घ.

---

* पा० सू० ५. ४. १०३. † ऋक्सं० १. ७. १.

§ 'शिरोगायत्र्योरग्रत्वसाम्यात् । सिसृक्षोः प्रजापतेः प्रथमं मुखतो गायत्री समुत्पन्ना । (एतच्च) यजुर्ब्राह्मणे द्रष्टव्यम्' इति सायणः ।

तद् शिरआख्यं पर्व । *'इन्द्रमर्केभिरर्किण' इत्यर्कशब्दयुक्तासु स्यात् ।

॥ अग्निर्वा अर्कः ॥

ऋच स्तुतौ । कर्मणि घञ्[1] । स्तूयत इति चाग्निचित्यत्वादग्नियोगः । अवयुत्य स्तौति—

॥ ता नव भवन्ति ॥

ऋच आदितो नव ।

॥ नवकपालं वै शिरः ॥

नव कपालानि हि शिरसि भवन्ति ।

॥ दशमीं शंसति ॥

अन्त्याम् ।

॥ त्वक्केशा इत्येव सा भवति ॥

सा दशमी[2] कपालेभ्यः परा ऋक् त्वक्केशसम्मिता ।

॥ अथो स्तोमातिशंसनाया एव ॥

स्यात् । अथो अपि च ।

---

१. 'कर्मघ' क. ख. ग.　　२. 'शर्म्येक' क. ख.

---

* ऋक्सं० १. ७. १.

[1]शंसेः स्वार्थे णिचो युच्(शामेडा[2] टाम्डेया)द् स्याद् *'वृद्धिरेचि'वै। नवर्चेन त्रिवृत्स्तोमोऽतिस्तुतस्त्वेकया हि सा॥

॥ तौ त्रिवृच्च स्तो[3]मो भवतो गायत्रं च छन्दः॥

अत्र शिरःपर्वणि तौ छन्दःस्तोमो गायत्री त्रिवृदाख्यौ भवतः।

॥ एतयोर्वै स्तोमच्छन्दसोः §प्रजातिमनु सर्वमिदं प्रजायते यदिदं किञ्च॥

प्रजातिरभिवृद्धिः। इदं स्थावरजङ्गमात्मकं जगत्। सर्वमिति व्याचष्टे यदिदं किञ्चेति। किञ्च किञ्चित्।

ततश्च,

॥ प्रजात्यै॥

स्यात्।

॥ प्रजायते प्रजया पशुभिर्य एवं वेद॥

स वेदिता हि वर्धते।

॥ अथ सूददोहाः। प्राणो वै सूददोहाः प्राणेन पर्वाणि सन्दधाति। अथातो विजवः॥

---

१. 'शसेः' क. ख. २. 'शामेन्दाद्' क. ग. घ.
३. 'मौ' आनन्दाश्रममुद्रितपाठः चपाठश्च।

---

* पा० सू० ६. १. ८८

§ प्रजोत्पादनमनु इति प्रजातिमन्वित्यस्य सायणीया व्याख्या।

*सुतस्ते सोम इत्याद्या विजुसंज्ञा ऋचस्त्वथ ।

॥ ता विराजो भवन्ति ॥

छन्दः ।

॥ तस्मात्पुरुषः पुरुषमाह । वि वा अस्मासु राजसि ग्रीवा वै धारयसीति स्तभमानं[1] वा ॥

अस्मासु मध्ये त्वं विद्योतसे, ग्रीवाः स्थविराश्च धारयसि कम्पयसि इति ।

§स्तभमानमैश्वर्यवन्तं[2][3] पुरुषं पुरुष आह वा ।

यस्मात्तस्माल्लोके विदुः विजो(ः)सम्बन्धोऽस्ति ।

ग्रीवावयवभूतास्तु ¶धमन्यो विजवो मताः ।
स्तभतेश्शानाच्चि मुकि स्तभमानपदं विदुः ॥

कं पुरुषम् ।

॥ ¶ यद्वाहुताः संबाह्लतमाः[4] सत्योऽन्नतमां प्रत्यच्यन्ते ॥

---

१. ' स्तंभ ' ग. २. ' स्तंभ ' ग. ३. ' र्यम् अन्तं पु 'Mss.
४. ' बाह्र ' क. ख. घ. च. झ. ञ. ड. त ' वाह ' ग.

---

* ऐ० आ० ४. २. १. § ' यस्माद्ग्रीवाया अधोवर्ती पक्षमूलभागोऽस्थिभागो वा विराट्छन्दस्कमन्त्ररूपो यस्माल्लोके कश्चित्पुरुष इतरं पुरुषं श्रुताध्ययनसम्पन्नं स्वामिनं प्रत्येवं ब्रूते अस्मासु मध्ये त्वमेव विराजसीति । अथवा स्तभमानं प्रणिपातादिविनयरहितमुत्कन्धरं स्तब्धं पुरुषमुपालम्भं कुर्वन्नेतद् ब्रूते ग्रीवावयवानेन त्वं धारयसीति ' इति सायणः ।
¶ ' विशेषेण जवो वेगो यस्मिन्पक्षमूले [स] विजवः । यद्वा ग्रीवाया अधस्तना अस्थिविशेषा विजव इत्येनेनोच्यन्ते । ' इति सायणः । ¶ अथास्यैः तुरवमुपजीव्य प्रशंसार्थं यद्वेति पक्षान्तरोपन्यासः । ग्रीवाया अधोभागरूपा-

यत् यस्य । वादुताः वाक् उक्तिः तया उताः । वेञः क्तः । सम्बद्धाः । गकारस्य दकारः । संबाह्लतमाः[1] । बाहे बाढम्[2] । अति[3]-प्रवृद्धाः सत्यः भवत्यः धमन्योऽन्नतमाम् । अदेः कर्तरि क्तः । अत एवान्नस्यार्त्रीं ग्रीवां प्रति अच्यन्ते[4] । अश्नेः शपो[5] यक् । झेर्झः । प्राप्नुवन्ति ।

किञ्च,

॥ अन्नं हि विराड् अन्नमु वीर्यम ॥

उ एव ।

अतोऽधिकारी वीर्यान्नसम्बन्धी स्यादितीर्यते ।

॥ अथ सूददोहाः । प्राणो वै सूददोहाः प्राणेन पर्वाणि सन्दधाति ॥

प्रथमः खण्डः ।

॥ अथातो दक्षिणः पक्षः ॥

---

१. 'बाळ्ह' क. ग. घ, 'बाढत' ख. २. 'बाढः' ग. घ.
३. 'तिवृद्धाः' क. ४. 'अच्यवन्ते' क. घ. ५. 'शपो' ग. घ.

'सुतस्ते सोम' इत्यादिका ऋचो दुताः प्राप्ताः । "दु गतौ" इत्यस्माद्धातोरुत्पन्नः शब्दः । संबाहूळतमा अतिशयेन परस्परसंश्लिष्टास्थिरूपत्वेन दृष्टाः सत्योऽतिशयेनान्नरूपां विराजं प्रत्यच्यन्ते प्राप्यन्ते । यस्मादन्नहेतुत्वेन विराडन्नं तच्च शक्तिहेतुत्वाद्वीर्यं तस्माद्विराजः शंसेदित्यर्थः ' इति सायणः ।

ऋग्मयस्य सुपर्णस्य दक्षिणः पक्ष उच्यते ।

॥ सोऽयं लोकः सोऽयमग्निः सा वाक्तद्रथन्तरं स वसिष्ठः ॥

दक्षिणपक्षे भूम्यग्निवाग्रथन्तरवसिष्ठदृष्टिः कार्येत्यर्थः ।

॥ तच्छतम् ॥

*एकशतम् । एकशब्दस्य लोपः ।

सूत्र्यते हि— $‘एकशतं वसिष्ठप्रासाहः’ इति ।

कथं तृचामेकशतं शृणूक्तं बह्वृचोत्तमैः ।
अभि त्वा शूर पूर्वेति षड्बृहत्यो द्वृचाद्विके ॥

इन्द्र पञ्चदश त्वेह तथैकादश यस्ति च ।
उग्रो दशोदुषट् चाते षण्नसोमश्च पञ्च वै ॥

इन्द्रं ब्रह्मायमेतानि पञ्चकानीति पञ्च वै ।
एकादशान इत्थाहीत्येकेत्येकाधिकं शतम् ॥

अर्थस्तु- +अभि त्वा शूरेति द्वृचे बृहतीकारतस्तिस्रो बृहत्यः । †अभि त्वा पूर्वेति च तथा । ‡इन्द्रस्य नु पञ्चदश । §त्वेह यत् पितर इति पञ्चविंशत्यृचे पञ्चदश आदितः । ¶यस्तिग्मशृङ्गः इत्येकादश । &उग्रो जज्ञे दश । aउदु ब्रह्माणि षट् । cfआ ते मह इन्द्रेति

---

* ‘तस्याः पङ्क्तेः प्राचीनं सर्वमृचां शतं संपद्यन्ते’ इति सायणः ।

$ ऐ० आ० ४. २. ८.　　+ ऋक्सं० ७. ३२. २२.

† ऋक्सं० ८. ३. ७.　　‡ ऋक्सं० १. ३२

§ ऋक्सं० ७. १८.　　¶ ऋक्सं० ७. १९.

& ऋक्सं० ७. २०.　　a ऋक्सं० ७. २३.

cf ऋक्सं० ७. २५.

षट् । [sf]न सोम इन्द्रं पञ्च । [*]इन्द्रं नरो नेमधिता पञ्च । [§]ब्रह्माण इन्द्र पञ्च । [A]अयं सोम इन्द्र तुभ्यं पञ्च । [B]आ न इन्द्र इत्येकादश । [C]इत्था हीत्येका । इत्येकशतम् इति ।

॥ तानि षड्वीर्याणि भवन्ति ॥

उक्तानि भूम्यग्निवाग्रथन्तरवसिष्ठैकशतरूपाणि । वीर्याणि वीर्यकराणीत्यर्थः ।

तिष्ठन्तु षट् । केवलः

॥ सम्पात एव कामानामभ्याप्त्यै प्रतिष्ठित्यै ॥

च स्यात् ।

[†]सम्पात आन इन्द्रेति सूक्तमेकादशर्चकम् ।
स्थः क्तिन् [D]'द्यति स्यती'तीत्वं स्थानिभ्योऽङि विधीयते ॥
कथं प्रतिष्ठा पुच्छं तु ज्ञापकात्करणेऽथवा ।

॥ अन्नाद्याय पङ्क्तिः ॥

अन्नाद्यप्राप्तये पङ्क्तिरित्था हीति भवेदियम् ।

॥ [*]अथ सूददोहाः । प्राणो वै सूददोहाः । प्राणेन

---

sf ऋक्सं० ७. २६. * ऋक्सं० ७. २७.
§ ऋक्सं० ७. २८. A ऋक्सं० ७. २९.
B ऋक्सं० ४. २०. C ऋक्सं० १. ८०.
† 'आ नः'' इत्यादिसूक्तगतर्क्सम्पात एव सम्यक्प्राप्तिहेतुरेव । अतोऽयं कामानामभितः प्राप्त्यर्थं भूलोके प्रतिष्ठार्थमन्नाद्यप्राप्त्यर्थश्च । इति सायणः ।
D पा० सू० ७. ४. ४०.
* अथेत्यारभ्य सन्दधातीत्यन्तं सायणभाष्ययुतमुद्रितपाठे न दृश्यते ।

पर्वाणि सन्दधाति। अथात उत्तरः पक्षः॥

उच्यत इति शेषः।

॥ सोऽसौ लोकः॥

द्यौरसौ।

॥ सोऽसावादित्यस्तन्मनस्तद्बृहत्स भरद्वाजः॥

पूर्ववद्दृष्टिविधिः।

॥ तच्छतम्[1] ॥

द्विशतम्। द्विशब्दलोपः। ¶'द्विशतं भरद्वाजप्रासाहः' इति हि स्तूयते।

ऋचां शतश्च ह्यधिकं प्रोक्तं बह्वृचकुञ्जरैः।
त्वामि त्वं हि बृहत्यष्षड् द्विदृचे दश पञ्च च॥

तम्रु ष्टुहि सुते त्रीणि दशके द्वे नवार्थवा।
अभूरष्टौ पञ्चकानि तथैकादश चैकया॥
इन्द्रो मदाय पङ्क्त्येति ह्यधिकं शतमुचरे।

इति। अर्थस्तु– $त्वामिद्धि +त्वं ह्येहीति दृचयोर्बृहतीकारतः

1. 'थ च' ख.

¶ ऐ० आ० ४. २. ८. $ ऐ० आ० ४. २. ८.
+ ऋक्सं० ८. ६१. ७.

षड् बृहत्यः । *तमु ष्टुहि पञ्चदश । ※सुत इत् त्वं दश । ℭ वृषा मद इन्द्रे दश । A यात ऊतिर्नव । B अभूरेकः पञ्च । C अपूर्व्या पञ्च । D य ओजिष्ठः पञ्च । E सं च त्वे पञ्च । F कदा भुवन् पञ्च । G सत्रा मदासः पञ्च । H अर्वाग्रथं पञ्च । I अपादितः पञ्च । इत्यष्टपञ्चकानीति चत्वारिंशत् । J कथा महाम् एकादश । K इन्द्रो मदाय एका पङ्क्तिरिति L अधिकं शतमिति ।

॥ तानि षड्वीर्याणि भवन्ति ॥

उक्तानि स्वर्गसूर्यमनोबृहद्भरद्वाजद्विशतरूपाणि वीर्याणि वीर्यकराणि स्युः ।

सत्रिगणानां,

॥ सम्पात एव कामानामभ्याप्त्यै प्रतिष्ठित्यै ॥

च स्यात् । कथा महामिति ।

॥ अन्नाद्याय पङ्क्तिः ॥

स्यात् । इन्द्रो मदायेति ।

पक्षौ स्तौति—

---

* ऋक्सं० ६. १८. ※ ऋक्सं० ६. २१.

ℭ ऋक्सं० ६. २४. A ऋक्सं० ६. २५.

B ऋक्सं ६. ३१. C ऋक्सं० ६. ३२.

D ऋक्सं० ६. ३३. E ऋक्सं० ६. ३४.

F ऋक्सं० ६. ३५. G ऋक्सं० ६. ३६.

H ऋक्सं० ६. ३७. I ऋक्सं० ६. ३८.

J ऋक्सं० ४. २३. K ऋक्सं० १. ८१.

L 'तस्याः पङ्क्तेः प्राचीना ऋचो यद्यप्येकाधिकशतसंख्याकाः तथापि तत्र (न?श)तस्य विद्यमानत्वाच्छतमित्युच्यते' इति सायणः ।

॥ ता ऊनातिरिक्तौ भवतः ॥

M‘लोपः शाकल्यस्य’इति वकारलोपः । तौ दक्षिणोत्तरपक्षौ ।

[1]ऊनाधिकत्वमनयोरन्योन्यापेक्षमेव च ।
द्विशतादुत्तरादन्या ऊनोऽतोऽधिक उत्तरः ॥

तत्र,

॥ *बृषा वै बृहत् ॥

पूर्वजत्वात् ।

$‘बृहच्च वा इदमग्रे रथन्तरं चास्ताम्’ इति हि श्रुतिः ।

वधूवरयोर्हि पूर्वजो वरः ‘यवीयसीं भ्रातृमतीम्’ इति स्मृतेः ।

॥ योषा रथन्तरम् ॥

तत्र,

॥ अतिरिक्तं वै पुंसो न्यूनं स्त्रियै ॥

ङसो ङे । पुमांसो हि बलिनः । अबला हि स्त्रियः ।

अथवा ।

---

१. ‘ऊनातिरिक्तत्वमनयोरन्योन्यापेक्षम् हि’ ख.

M पा० सू० ८. ३. १९.
* ‘तस्योत्तरस्य बृहद्रूपता बृहतश्च पुंरूपत्वेनाङ्गाधिक्यं युक्तम् । दक्षिणस्यापत्वाद्रथन्तरत्वम् । तस्य स्त्रीरूपत्वान्न्यूनाङ्गत्वं युक्तम्’ इति सायणः
$ ऐ० ब्रा० १९. ६.

बहिष्प्रजननं पुंसामूरोरन्तर्हि तत्स्त्रियाः ।
यद्वा पूर्णान्नलाभेऽपि चित्तं पुंसो हि हृष्यति ॥
रत्नपूर्णपृथिव्याप्तावपि साशं स्त्रिया मनः ।

॥ तस्मादूनातिरिक्तौ भवतः । अथो *एकेन ह वै पत्रेण सुपर्णस्योत्तरः पक्षो ज्यायान् ॥

अथो अपि च । अत्रेतिहासः—

सुपर्णस्य पुरा पक्षौ ह्यास्तां द्विशतपत्रकौ ।
मातुर्दास्याद्विमोक्षार्थममृताहरणे सति ॥
रुद्धेन्द्रेण वृक्णमेकं पत्रं वज्रेण दक्षिणे ।
तदादि पक्षौ तावास्तामेकद्विशतपत्रकौ ॥

इति ।

॥ तस्मादेकयर्चोत्तरः पक्षो भूयान्भवति ॥

भूयान् बहुतरः । ‡'बहोर्लोपो भू च बहोः' ।

॥ अथ सूददोहाः । प्राणो वै सूददोहाः । प्राणेन पर्वाणि सन्दधाति । अथातः पुच्छम् ॥

उच्यते ।

॥ ता एकविंशतिर्द्विपदा भवन्ति ॥

---

१. 'लोभेऽपि चि' क. 'भेन चि' ख. २. 'पक्ष' क. घ.
३. 'वृक्थ' क, 'वृका' घ.

---

* 'लोके पक्षिण उत्तरपक्ष एकं पत्रमधिकं भवति । अतोऽत्राप्युत्तरः पक्ष एकयर्चाधिकः कर्तव्यः' इति सायणः ‡ पा० सू० ६. ४. १५८.

*इमा नु कं पञ्च । ℂआ याहीति चतस्रः इति नव समाम्नाताः ।
A प्र व इन्द्रायेत्यसंहितास्थास्त्रयोदश अन्त्यावर्जमेकविंशतिः ।

कथमेवमित्याह—

॥ एकविंशतिर्हीमानि प्रत्यञ्चि सुपर्णस्य पत्राणि भवन्ति ॥

प्रत्याञ्चि अधोमुखानि पुच्छभाञ्जि ।

॥ अथो एकविंशो वै स्तोमानां प्रतिष्ठा ॥

अथो अपि च ।

एकविंशे प्रतिष्ठोक्तिः प्रतिष्ठाफलयोगतः ।

॥ प्रतिष्ठा पुच्छं वयसाम् ॥

प्रतिष्ठा सुखमासनम् । वयसां पक्षिणाम् ।

अथ,

॥ द्वाविंशीं शंसति ॥

द्वाविंशतेः पूरणीं द्विपदाम् ।

॥ प्रतिष्ठयोरेव तद्रूपं क्रियते ॥

---

* ऋक्सं० १०. १५७. ℂ ऋक्सं० १०. १७२.
A ऐ० आ० ४. २. ८.

प्रतिष्ठयोः पद्योः । रूपं सादृश्यम् । क्रियते अनुष्ठीयते । तत् । टापो लुक् । तया द्विपदया ।

॥ तस्मात्सर्वाणि वयांसि पुच्छेन[1] प्रतितिष्ठन्ति ॥

तस्मादिति निपातोऽयं तथाहीत्यर्थवाचकः ।

किञ्च,

॥ पुच्छेनैव प्रतिष्ठायोत्पतन्ति ॥

कुतः,

॥ प्रतिष्ठा हि पुच्छम् ॥

पक्षिणामिति शेषः ।

॥ स एष द्वाभ्यां दशिनीभ्यां विराड्भ्यामनयोर्द्वा-
विंश्योर्द्विपदयोरयं पुरुषः प्रतिष्ठितः ॥

स एषः ।

इषेः कर्मणि घञ्येषः श्रद्धेय उच्यते ।

सुलुक् । य ऋङ्मयः सुपर्णः । दशवती संख्या दशिनी । व्रीह्यादीनेर्ङीप् । दशत्वयोगाद्विराट् । आभ्यां परयोरेकविंशीद्वाविंश्योः द्विपदयोः सोऽयं पुरुषः स्थितः[2] ।

द्वाविंशीत्येकविंशी च साहचर्येण गृह्यते ।
द्वितीयोक्ता प्रथमयोः पूर्वेति खलु वै यथा ॥

---

१. 'पुच्छे प्र' ङ. २. स्थित इति कखपाठयोर्नास्ति ।

॥ तस्य यत्सुपर्णरूपं तदस्य कामानामभ्याप्त्यै ॥

स्यात् ।

॥ अथ यत्पुरुषरूपं तदस्य श्रियै यशसेऽन्नाद्यायापचित्यै ॥

पञ्चविधमन्नाद्यम् । अपचितिः पूजा । स्यात् ।

॥ अथ सूददोहाः । अथ धाय्या ॥

*यद्वावान इति ।

॥ अथ सूददोहाः ॥

भवेत् ।

॥ §वृषा वै सूददोहाः ॥

मन्त्रस्य पुंस्त्वात् ।

॥ योषा धाय्या ॥

‡धीयतेऽस्यां गर्भ इति धाय्या स्त्री ।

॥ तदुभयतः सूददोहसा धाय्यां परिशंसति ॥

तत् तत्र । धाय्यामुभयतः सूददोहसा शंसति । अमर्थे टा । परि-
रनर्थकः प्रलम्बतेः प्रशब्दवत् ।

---

* ऋक्सं० १०. ७४. ६. § 'उभयतः पठितायाः सूददोहस आधिक्यात्पुरुषत्वम्' इति सायणः । ‡ 'मध्ये पठिताया यद्वावानेति धाय्याया अल्पत्वेन स्त्रीरूपत्वम्' इति सायणः ।

॥ तस्माद्द्वयो रेतः सिक्तं सदेकतामेवाप्येति योषामेवाभि[1] ॥

द्वयोः स्त्रीपुंसयो रेतः शुक्लशोणितसंज्ञकम् ।
सिक्तं वर्षसिराभ्यां (सत्) स्त्रियामेकत्र तिष्ठति ॥

किमिति न पुंसीत्याह—

॥ अत आजाना हि योषा ॥

आजनयतीत्याजाना ।

जनेर्णिच्युपधावृद्धौ पचाद्यचि कृते तु टाप् ।
अतः पुंसि गृहीत्वैषा रेतः पुत्रयति ध्रुवम् ॥

॥ * अतः प्रजाना ॥

योषेत्येव । अतः । आद्यादित्वात्तसिः । एतदोऽश् । एषा योषा । प्रजाना अभिवर्धयित्री ।

॥ तस्मादेनामत्र शंसति ॥

---

१. कगपाठयोः 'योषामेवाभ्यत आजाना हि' इत्यनन्तरं 'द्वयोः०' इति पद्यं, ततश्च 'किमिति न पुंसीत्याह— ॥ योषातः प्रजाना ॥ आजनयतीत्याजाना' इति, तदनन्तरं 'जनेर्णिचि०' इति पद्यं, ततश्च 'योषेत्येव । अतः आद्यादित्वात्तसिः' । इति दृश्यते ।

---

* 'अतः कारणादियं योषा प्रजानाना (प्रजाना) । प्रकृष्टो जातः (नः ?) पुत्र-पौत्रोत्पादनं यस्याः सा प्रजाना' इति सायणः ।

एनां धाय्याम् । अत्र सूददोहसोर्मध्ये ।

द्वितीयः खण्डः ।

॥ गायत्रीं तृचाशीतिं शंसति ॥

सचत्वारिंशद्द्विशतं गायत्रीरथ शंसति ।

गायत्र्यां भवाः । अणो ङीपोऽम् ।

॥ अयं वै लोको गायत्री तृचाशीतिः ॥

आदित्वसाम्यात् ।

॥ यदेवास्मिँल्लोके यशो *यन्महो यन्मिथुनं यदन्नाद्यं यापचितिस्तदश्नवै तदाप्नवानि तदवरुणधै तन्मेऽसदिति ॥

अस्मिन् भूम्याम् । महः कल्याणम् । स्त्रीपुंससम्पाद्यं द(ष्टा ? ष्टा)-दृष्टसुखं मिथुनम् । अपचितिः पूजा । अष्टिः स्वीकारः । आप्तिरनु-

---

* यच्च महः पूजा यच्च मिथुनं भार्यासम्बन्धि यच्चान्नाद्यं भक्ष्यभोज्यादिकं यापचितिः पूजा । वेदशास्त्रप्रयुक्ता पूजा महःशब्देन पूर्वमुक्ता । तेजो वा तत्रो क्तम् । अत्र तु धनधान्यादिसमृद्धिरूपा पूजोच्यते । तद्यशःप्रभृतिकमपचितन्तं सर्वमश्नवै (प्राप्त ? व्याप्त) वानि । पुत्रपौत्रादिषु तत्सम्पदधीनत्वं व्याप्तत्वम् । तत्सिद्ध्यर्थमादौ तद्यशःप्रभृतिकमाप्नवानि सम्पादयामि । सम्पादितं तत्सर्वम् अवरुणधै स्वाधीनं करवाणि । तच्च स्वाधीनं मे मदीयगृहेष्वसत्, अस्तु इति सायणः ।

भवः । अवरोधो वशीकारः । सत्त्वं विद्यमानता ।

रुधेर्लोट इटष्टेरेदेत ऐ श्नमि चाडपित् ।

मे होतुः । असत् । अस्तेर्लेट् ति(पः १ पू) भवेत् । इति एव-मर्थम् ।

॥ अथ सूददोहाः । प्राणो वै सूददोहाः प्राणेनेमं लोकं सन्तनोति ॥

अविच्छेदः सन्तानः ।

॥ बार्हतीं तृचाशीतिं शंसति ॥

सचत्वारिंशद्द्विशतं बृहतीरथ शंसति ।
सतो बृहत्योऽप्यत्रास्ति बृहतीशब्दयोगतः ॥

बृहत्या अणो ङीपोऽम् ।

॥ अन्तरिक्षलोको वै बार्हती तृचाशीतिः ॥

मध्यत्वसाम्यात् ।

॥ यदेवान्तरिक्षलोके यशो यन्महो यन्मिथुनं यद-न्नाद्यं यापचितिस्तदश्नवै तदाप्नवानि तदवरुणधै तन्मेऽसदिति ॥

व्याख्यातम् ।

॥ अथ सूददोहाः । प्राणो वै सूददोहाः प्राणेनान्तरि-

क्षलोकं सन्तनोति ॥

उक्तार्थम्।

॥ औष्णिहीं तृचाशीतिं शंसति ॥

सचत्वारिंशद्द्विशतमुष्णिहस्त्वथ शंसति।

उष्णिहोऽञो ङीपोऽम्।

॥ असौ वै लोको द्यौरौष्णिही तृचाशीतिः ॥

उपरिभवत्वसाम्यात्।

॥ यदेवामुष्मिँल्लोके यशो यन्महो यन्मिथुनं यदन्नाद्यं यापचितिः यद्देवानां दैवं तदश्नवै तदाप्नवानि तदवरुणधै तन्मेऽसदिति ॥

व्याख्यातार्थम्।

देवानां दैवमिति हि परं ब्रह्म प्रचक्षते।

॥ अथ सूददोहाः। प्राणो वै सूददोहाः प्राणेनामुं लोकं सन्तनोति सन्तनोति ॥

द्विरुक्तिरुक्तार्था।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां महाव्रते

चतुर्थोऽध्यायः।

अथ पञ्चमोऽध्यायः ।

आत्मादिकत्र्यशीत्यन्तं पर्वैकादशकं पुनः ।
तृतीय आत्मपर्वोक्तं ग्रीवादिदशपर्वकम् ॥
चतुर्थेऽथो पञ्चमेऽत्र त्वान्तात्सर्वं प्रवर्ण्यते ।

॥ वशं शंसति ॥

वशनाम्नर्षिणा दृष्टं *त्वावतीयं वशं विदुः ।
एतद्द्वादशकं पर्व ह्युदराख्यं श्रुतौ श्रुतम् ॥

किमर्थम्,

॥ वशे म इदं सर्वमसदिति ॥

वशे इच्छायाम् । $‘वशिरण्योः’ इति भावेऽप् । मे होतुः । इदं जगत्सर्वम् । असत् भवेत् ।

॥ ता एकविंशतिर्भवन्ति ॥

¶एकविंशतिरादौ स्युस्त्रयस्त्रिंशदृचे वशे ।

॥ एकविंशतिर्हि ता अन्तरुदरे विकृतयः ॥

£‘उदरं वश’ इति स्तूयते । उदरे आमाशयादिरूपा विकृतय एकविंशतिरित्यर्थः ।

---

* ऋक्सं० ८. ४६. १. $ पा० सू० वा० ३. ३. ५८

¶ ‘त्वावतः’ इत्यारभ्य ‘सनितः सुसनितः’ इत्यन्ता विंशतिः । ततः सूददोहा एकेत्येवमेकाविंशतिर्द्रष्टव्या’ इति सायणः । £ ऐ० आ० ४. २. ५.

॥ अथो एकविंशो वै स्तोमानां प्रतिष्ठा ॥

अथो अपि च । प्रतिष्ठाकामस्यैकविंश इति श्रुतेः ।

॥ प्रतिष्ठोदरमन्नाद्यानाम् ॥

आधारत्वात् ।

॥ ता विच्छन्दसो भवन्ति ॥

नानाच्छन्दस्काः ।

॥ विक्षुद्रमिव वा अन्तस्स्यमणीय इव च
स्थवीय इव च ॥

अपि च तत्परिमाणः क्षुद्रः । वि नाना । इव एव । अन्तः मध्ये[1] भवमन्तस्स्यम् ।

शुभपार्श्वं क्षुद्रमध्यं कुड्यादि क्रियते खलु ।

अणोरणीयसुनि टिलोपः ।

*'स्थूलदूरे'तीयसुनि लोपेचोर्गुणोऽवचः ।

॥ ताः प्रणावं छन्दस्कारं यथोपपादं शंसति ॥

ल्यबर्थे णमुल् । प्रणुत्य । छन्दस्कारं छन्दस्कृत्वा । उपपादः

---

1. 'मध्यम' Mss.

---

* पा० सू० ६. ४. १५६.

समाम्नायः। समाम्नायानतिक्रमेण।

तथा हि—

*यथोपपादमिव वा अन्तरस्यं ह्रसीय इव च
द्राघीय इव च ॥

उपपाद उत्पत्तिः। ईयसुनि ह्रस्वस्य वलोपः। दीर्घस्य च द्राघः।

॥ अथ सूददोहाः। प्राणो वै सूददोहाः प्राणेन पर्वाणि
सन्दधाति। तामत्रोत्सृजति द्वादशकृत्वः शस्त्वा ॥

तां §ता अस्येत्यृचम्। अत्रोदरान्ते। शस्त्वा पुनर्ग्रहणाय त्यजेत्।

॥ द्वादशविधा वा इमे प्राणाः सप्त शीर्षण्याः ॥

नेत्रे श्रोत्रे घ्राणबिले वागित्येवन्तु सप्त ते।

शिरसः शीर्षन्नादेशः। †'ये चाभावकर्मणो'रिति प्रकृतिभावः।

॥ द्वौ स्तन्यौ ॥

इति। नाभेरूर्ध्वं नव।

॥ त्रयोऽवाञ्चः ॥

---

* 'अन्तरस्यमुरोमध्येऽवस्थितमप्यत्र क्लोमप्लीहादिकं यथोपपन्नं भवति तथैवावतिष्ठते। किञ्चिदङ्गमतिह्रस्वामिवान्यदङ्गमतिदीर्घमिव स्थितं तस्मात्त-त्साहश्याय न्यूनाधिकच्छन्दांसि यथा तथा शंसेत्' इति सायणः।

§ ऋक्सं० ८. ६९. ३. † पा० सू० ६. ४. १६८.

नाभेरधः ।

रेतस्यश्चैव मूत्र्यश्च पुरीष्यश्चेति ते त्रयः ।

॥ अत्र वै प्राणा आप्यन्ते ॥

श्वोः श्यन् । श्लेष्मः । शरीरं प्राणाः प्राप्नुवन्ति ।

॥ अत्र संस्क्रियन्ते ॥

ओ(ः) यक् । देहमलङ्कुर्वन्ति ।

॥ तस्मादेनामत्रोत्सृजति ॥

द्वादशवारान् कुर्यान्नोर्ध्वम् ।

सशस्त्रसर्वोदराख्यं वै द्वादशं तु समीरितम् ।
अथ त्रयोदशं पर्व ऊर्वाख्यमभिधीयते ॥

॥ इन्द्राग्नी युवं सु न इत्यैन्द्राग्ना ऊरू उर्वष्ठीवे प्रतिष्ठे ॥

*इन्द्राग्नी युवमित्यादि द्वादशर्चं षळष्टकम् ।
महापङ्क्तिच्छन्द आहुरन्त्यास्त्रिष्टुभमेव च ॥

द्वितीयां शक्करीमेतन्नाभाको दृष्टवान्मुनिः ।

ऊरू स्यातां तौ चैन्द्राग्नौ §द्वित्वसाम्यात् । ऊर्वोरुपरिभागोऽष्ठी-

---

१. 'उर्वोप' Mss.

---

* ऋक्सं ८. ४०.　　§ 'अस्मिन्सूक्ते याविन्द्राग्नी प्रतीयेते तयोः सम्बन्धिनौ पक्षिण ऊरू । "इन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ" [तै० ब्रा० का० १ प्र० ८ अ० ७] इति तयोः प्रबलत्वश्रवणादूर्वोश्च गमनादिव्यवहारहेतुत्वेन प्रबलत्वात्' इति सायणः ।

वदाख्यः। स उरुः ययोस्ता उर्वष्ठीवे। प्रतिष्ठाहेतू प्रतिष्ठे। औतोरेद्वयम्। उर्वष्ठीवौ प्रतिष्ठावित्यर्थः।

॥ ताः षट्पदा भवन्ति ॥

द्वादशर्चे[2] द्वितीयान्त्यावर्जमन्यास्तु षट्पदाः।

तच्च,

॥ प्रतिष्ठाया एव ॥

स्यात्।

॥ द्विप्रतिष्ठो वै पुरुषः चतुष्पादाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति। द्वितीया सप्तपदा भवति ॥

*नहि वां वव्रयेत्येषा सप्तभिस्त्वष्टकैर्युता।

॥ तां गायत्रीं चानुष्टुभं च करोति ॥

पूर्वार्धर्चन्तु गायत्रीं कुर्यादन्यदनुष्टुभम्।

स्तौति—

॥ ब्रह्म वै गायत्री वागनुष्टुब्ब्रह्मणैव तद्वाचं सन्दधाति ॥

तद्गायत्र्यनुष्टुप्करणम्।

---

१. 'ऊ' Mss. २. 'शद्वितीयावर्जम' क. 'शर्चे द्वितीयावर्जम' घ.

---

* ऋक्सं० ८. ४०. २.

॥ त्रिष्टुभमन्ततः शंसति ॥

द्वादशी हि त्रिष्टुप् ।

॥ वीर्यं वै त्रिष्टुप् ॥

*वीर्यवदिन्द्रसम्बन्धात् ।

॥ वीर्येणैव तत्पशून्परिगच्छति ॥

§अनुष्टुङ्क्ते ।

॥ +तस्मात्पशवो वीर्यमनूपतिष्ठन्त ईर्यताञ्चैवाभ्युत्थानञ्च ॥

तस्मात्तथाहि । वीर्यम् । अंश आद्यच् । वीर्यवन्तम् । ईर्यतां प्रेरणं कुर्वताम् । अल्लोपः छान्दसः । अभ्युत्थानं मुखत आगतिः । या(ही ? न्ती)ति शेषः । वीर्यञ्चैवेत्यन्वयः ।

प्रथमः खण्डः ।

॥ †प्र वो महे मन्दमानायान्धस इत्यैन्द्रे निष्केवल्ये निविदं दधाति ॥

---

* 'त्रिष्टुभो वीर्यहेतुत्वाद्वीर्यरूपत्वम्' इति सायणः । § 'पशून् परितः प्राप्नोति' इति सायणः । + 'यस्मादेवं तस्माल्लोके पशवो वीर्यमनूपतिष्ठन्ते वाक्पारुष्येण दण्डपारुष्येण वा गोपालवीर्यमवधार्य प्रत्यासन्नन्ति तथा तद्वीर्यवशादीर्यतां च शयनादभ्युत्थानञ्च प्राप्नुवन्ति' इति सायणः ।

† ऋक्सं० १०. ५०. १.

ङसो ङिद्वयम् । ऐन्द्रस्य निष्केवल्यस्य सम्बन्धिनि प्र व इति सप्तर्चे चतस्रः शस्त्वा *इन्द्रो देवस्सोममिति निविदं दध्यात् ।

॥ प्रत्यक्षाद्ध्येव तदात्मन्वीर्यं धत्ते ॥

प्रत्यक्षात् । ङसिष्टार्थे । प्रत्यक्षेण । हि एव । तत् । टालुक् । तेन निविद्धानेन । आत्मन् । ङिलुक् । आत्मनि । वीर्यं धत्ते स्थापयति होता ।

॥ तास्त्रिष्टुब्जगत्यो भवन्ति ॥

§प्र वो महीयमाद्ये द्वे जगत्यौ[1] तु तथान्ततः ।
त्रिष्टुभो मध्यतस्तिस्रोऽभिसारिण्यौ तु के द्वृचः ॥

॥ तदाहुरथ कस्मात्त्रिष्टुब्जगतीषु निविदं दधातीति ॥

चोदयतां ब्रह्मवादिनामैन्द्रत्वात्त्रिष्टुबेव युक्ता कथमिह[2] जगतीवि भावः ।

परिहरति—

॥ न ह वा एतस्याह्न एकं छन्दो निविदं दाधार न विव्याचेति तस्मात्त्रिष्टुब्जगतीषु निविदं दधाति ॥

---

१. 'त्यौ न तथान्त' क. 'त्यौ तथान्त' घ. २. 'व' क.

---

* 'इन्द्रो देवः सोमं पिबमान इत्यादिकं निवित्पदजातं निवित्संज्ञके सूक्ते पठितम्' [ऐ० आ० सायणभाष्यम्]

§ आदौ पञ्च त्रिष्टुभ उत्तरे द्वे जगत्यौ । यद्वा प्रथमा सप्तमी चोभे जगत्याववशिष्टास्त्रिष्टुभः । तदाहानुक्रमणिकाकारः– 'प्रवोमहे सप्त द्विजगत्याद्यन्तम्' । इति सायणः । "प्रवो महे सप्त द्विजगत्याद्यन्तं के तेऽभिसारिण्यो" [ऋक्सर्वा० १०. ५०.]

इति । विर्यस्मादर्थे । दाधार । तुजाद्यभ्यासदीर्घः ।

एकं छन्दो धारयितुं विवेक्तुश्चैव न क्षमम् ।

किञ्च,

॥ तदेतदहस्त्रिनिवित्कं विद्यात् ॥

एतत् निष्केवल्यं शस्त्रं महाव्रतांशभूतम् ।

कथम्,

॥ वशो निवित् ॥

*त्वावतीयं सूक्तं निविदिव यज्ञसमृद्धिकरम् ।

॥ वालखिल्या निवित् ॥

बार्हत्यां तृचाशीत्याम् §अभि प्र वः सुराधसम् इत्याद्याः ।

॥ निविदेव निवित् ॥

इन्द्रो देव इत्याद्याः साक्षान्निविदपि निविदेव ।

॥ एवमेनन्त्रिनिवित्कं विद्यात् ॥

एनत् अहः ।

॥ अथ सूक्ते ‡वने न वा यो ¶न्यधायि चाकन्यो जात एव प्रथमो मनस्वानिति ॥

* ऋक्सं० ८. ४६.

‡ ऋक्सं० १०. ९२.

§ ऋक्सं० ८. ४९. १.

¶ ऋक्सं० २. १२. १.

अष्टर्चपञ्चदशर्चे स्याताम् ।

॥ तयोरस्त्यन्ने समस्य यदसन्मनीषा इति ॥

छत्रिन्यायेन द्वयस्तुतिः । वने न वीये हि तदन्न इति पदमस्ति[1] । यदन्न इति तत्,

॥ अन्नाद्यस्यावरुद्ध्यै ॥

प्राप्तये स्यात् ।

॥ अथावपनमेते अन्तरेण ॥

वक्ष्यते । आवपेः कर्मणि ल्युट् । एतयोः सूक्तयोर्मध्ये ।

॥ ऐन्द्रीणां दशतीनां त्रिष्टुब्जगतीनां बृहतीसम्पन्नानां यावतीरावपन्ते तावन्त्यूर्ध्वमायुषो वर्षाणि जीवन्ति ॥

दशतीभूता इत्यर्थः । दशतीनां दशवर्गभवानाम् । अण्याद्यवृद्धिः । मण्डलदशकवर्तिनीनामैन्द्रीणां त्रिष्टुब्जगतीनाम् । भिसामामः । एताभिर्मिलिताभिः सम्पन्नानाम् । बृहती । आमो लुक् । बृहतीनाम् ।

षट्त्रिष्टुभो द्वे जगत्यौ बृहत्यो दश वै मताः ।

इत्यादि यावतीर्दशतीभूता बृहतीरावपन्ते आयुषः शताब्दरूपादूर्ध्वं तावन्ति वर्षाणि जीवन्ति सत्रिणः । एकं बृहतीदशकमेकवर्षाप्तये स्यादित्यर्थः । वपिः स्वरितेत् । *'संवत्सरात्संवत्सराद्दशतः' इति हि स्तूयते ।

---

१. 'वने न ये हि तदन्न' क, 'वने न एव हि तदन्न' ख.

---

* ऐ० आ० ४ ३. १.

॥ एतेन हैवावपनेनायुराप्यते ॥

हेति प्रसिद्ध्यर्थः।

किञ्च,

॥ प्रजां मे पशवोऽर्जयान्निति त्वेव ॥

मे मम। पशवः द्विपाच्चतुष्पाद्रूपाः प्रजां सन्ततिमर्जयन्। अर्जिः प्राप्त्यर्थः। लिङो लङ्। झि। आण्न। प्राप्नुयुरिति भावेन।

॥ सजनीयमनुशंसति ॥

सजनास इति सजनशब्दयुक्तं *यो जात इति सूक्तम्। अनु अथ, आवपनादनन्तरं, शंसेत्।

॥ तार्क्ष्यं शंसति ॥

§त्यनूषु इति तृचं सूक्तम्।

॥ स्वस्त्ययनं वै तार्क्ष्यः ॥

अविनाशगमनहेतुः।

॥ स्वस्तितायै ॥

स्यात्तार्क्ष्यशंसनम्।

॥ स्वस्त्ययनमेव तत्कुरुते ॥

होता सत्रिणामात्मनश्च।

॥ एकपदां शंसति ॥

---

* ऋक्सं० २. १२. § ऋक्सं० १०. १७८.

*'इन्द्रो विश्वं विराजति' इत्येतां चतुर्थारण्यके पठिष्यमाणाम् ।

॥ एकधेदं सर्वमसानीति ॥

भावयानि जगत्सर्वं सुखरूपमिहैकधा ।
अस्तिरन्तर्गतण्यर्थो लोट्यामेर्निश्च वै कृतः ॥

इति भावेन ।

॥ अथो सर्वां छन्दस्कृतिमाप्नवानीति ॥

सर्वेषु छन्दस्स्वेकं हि पदमस्तीति कृत्वा एकपदोक्त्या सर्वेषां छन्दसां कृतिमुच्चारणमाप्नवानीति भावेन ।

+इन्द्रं विश्वा अवीवृधन्निति पदानुषङ्गाः ॥

अष्ट ऋचः शंसेदिति शेषः । पदेषु पदेष्वनुषङ्गो यासु ताः ।

॥ तास्सप्तानुषजति ॥

§दंशसञ्जस्वञ्जां शपि । ‡'तस्य प्रथमाया' इत्यादि चतुर्थेऽनुषङ्गो वक्ष्यते ।

॥ सप्त वै शीर्षन्प्राणाः ॥

शीर्षन् । ङिलुक् । शिरसि ।

नेत्रश्रोत्रे घ्राणबिले वाक्प्राणास्सप्त मूर्धनि ।

॥ शीर्षन्नेव तत्प्राणान्दधाति ॥

---

* ऐ० आ० ४. ३. १. + ऋक्सं० १. ११. १.
§ पा० सू० ६. ४. २५. ‡ ऐ० आ० ४. ३. १.

तत् तेनानुषक्तशंसनेन ।

॥ अष्टमीं नानुषजति । *वागष्टमी ॥

स्त्रीत्वसाम्यात् ।

॥ नेन्मे वाक्प्राणैरनुषक्तासदिति ॥

न इत् । मे मम । असद् भवेदिति भावेन । वाक्प्राणेन सङ्गो मुखनासिकासहितोच्चारणम् ।

॥ तस्मादु सा वाक्समानायतना प्राणैः सत्यननुषक्ता ॥

उ एव । समानायतना एकमुखवर्तिनी ।

॥ विराजश्शंसति ॥

†पिबा सोममिन्द्र मन्दतु त्वेति षळृचः ।

॥ §अन्नं वै विराजः ॥

अन्नवान् विराजतीति ।

॥ अन्नाद्यस्यावरुद्ध्यै ॥

---

* 'केनाभिप्रायेणाष्टम्या व्यतिषङ्गो नास्तीति चेद्येयमृगष्टमी सा वाग्रूपा । अत एव वाजसनेयिनश्चक्षुरादीन्द्रियेषु गौतमभरद्वाजर्षिध्यानमधीयानाः "वागष्टमी ब्रह्मणा संविदाना" इत्येवं वाचोऽष्टमीत्वमामनन्ति ' इति सायणः ।

† ऋक्सं० ७. २२. १.

§ 'विराट्छन्दसोऽन्नहेतुत्वादन्नत्वम्' इति सायणः ।

तद्विरादूछंसनं स्यात् ।

॥ वासिष्ठेन परिदधाति वसिष्ठोऽसानीति ॥

*योनिष्ट इन्द्र सदने वासिष्ठं षळृचन्त्विदम् ।

£वसिष्ठः वसुमत्तमः । वसोरिष्ठनि ¶'विन्मतोर्लुक्' । असानि भवानीति भावेन । अस्य प्रकारः— ℂ 'एतस्य चतस्रः शस्त्वोत्तमामुपसन्तत्योपोत्तमया परिदधाति' इति चतुर्थे वक्ष्यते ।

तामुपान्तामाह—

॥ एष स्तोमो मह उग्राय वाह इति
महद्वत्या रूपसमृद्धया ॥

परिदधातीत्येव । मह इति महद्वती ।

समृद्धिमाह—

॥ धुरी वात्यो न वाजयन्नधायीति ॥

कथम्,

॥ अन्तो वै धूः ॥

रथादेर्निर्माणे ।

॥ अन्त एतदहः ॥

---

* ऋक्सं० ७. २४. £ 'अहं वसिष्ठः सर्वेषामतिशयेन निवासहेतुर्भवानीत्यभिप्रेत्य वासिष्ठसूक्तेन परिधानं कुर्यात्' इति सायणः ।

¶ पा० सू० ५. ३. ६५ ℂ ऐ० आ० ४. ३. १.

गवामयनप्रकृतिभूतानामह्नामन्त्यमिदमहः ।

॥ एतस्याह्नो रूपम् ॥

अह्नो रूपं योग्यम् ।

॥ इन्द्र त्वाऽयमर्क ईट्टे वसूनामित्यर्कवत्या रूपसमृद्धया ॥

परिदधातीत्येव ।

समृद्धिमाह—

॥ *दिवीव द्यामधि न श्रोमतं धा इति ॥

दिवीव ख इव । द्यां सूर्यमण्डलम् अधि । नः अस्मासु । श्रोमतं कीर्तिम् । धाः धेहीत्यर्थं मत्वा व्याचष्टे—

॥ यत्र ह क्व च ब्रह्मण्या वागुद्यते तद्धास्य कीर्तिर्भवति यत्रैवं विद्वानेतया परिदधाति ॥

ब्रह्मणि वेदे भवा वाक् यत्र क्वचिद्देशे उद्यते वैदिकैः । वदेः कर्माणि याकि यजादिसम्प्रसारणम् । तत् तत्र देशे । अस्य होतुः । कीर्तिर्यशः । $यत्रेति । य इत्यर्थः । एतयोपोत्तमया ।

॥ तस्मादेवं विद्वानेतयैव परिदध्यात् ॥

उपान्त्ययैव, न त्वन्त्यया ।

---

* 'दिवीव द्युलोके यथा सम्पादयति तथा द्यामधि द्युलोकस्योपरि सोमलोकादावपि धा विधेहि संपादयेत्यर्थः' इति सायणः　　$ 'यत्र यस्मिन्महाव्रते' इति सायणः ।

एवं माध्यन्दिने शस्त्रं द्वितीयं परिकीर्तितम् ।
होतुर्यत्रेह सम्पन्नं बृहत्यास्तु सहस्रकम् ॥

द्वितीयः खण्डः ।

अथो तृतीयसवने वैश्वदेवाख्यमुच्यते—

॥ *तत्सवितुर्वृणीमहे§ऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ ॥

तृचौ स्याताम् ।

॥ ऐकाहिकौ रूपसमृद्धौ बहु वा एतस्मिन्नहनि किञ्च किञ्च वारणं क्रियते शान्त्या एव। शान्तिर्वै प्रतिष्ठैकाहः शान्त्यामेव तत्प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति। प्रतितिष्ठति य एवं वेद । येषां चैवंविद्वानेतद्धोता शंसति ॥

उक्तार्थानि ।

॥ ¶तद्देवस्य सवितुर्वार्यं महदिति सावित्रम ॥

निविद्धानं सूक्तं सप्तर्चम् ।

---

* ऋक्सं० ५. ८२. १. § 'अद्या नो देव' ऋक्सं० ५. ८२. ४.
¶ ऋक्सं० ४. ५३. १.

॥ *अन्तो वै महत् ॥

पदान्ते हि महच्छन्दः ।

॥ अन्त एतदहः ॥

गवामयनप्रकृतिभूतानामह्नाम् ।

॥ एतस्याह्नो रूपम् ॥

योग्यम् ।

॥ †कतरा पूर्वा कतरा परायोरिति द्यावापृथिवीयम् ॥

एकादशर्चं निविद्धानम् । ‡'द्यावापृथिवीशुनासीरे'ति छः ।

॥ समानोदर्कम् ॥

उदर्कोऽन्तः समानस्तुल्योऽस्मिन्नृचाम् । बहुशो 'द्यावा रक्षतम्' इति ।

॥§ समानोदर्कं वा एतदहः ॥

पत्नीसंयाजान्तैरन्यैरहोभिस्तुल्यसमाप्तित्वात् ।

---

* 'अस्मिन्पादे यन्महदित्युक्तं तदन्तो वै प्रार्थनीयस्य सर्वस्याप्यवसान-भूमिः । नहि महत्त्वादूर्ध्वं किञ्चित्प्रार्थनीयमस्ति ।' इति सायणः ।

† ऋक्सं० १. १८५. ‡ पा० सू० ४. २. ३२.

§ अत्रोदर्कं उत्तरकालभावि फलं तच्च सर्वेषां समानम् । सर्वेऽपि महाव्रत-मनुष्ठाय ब्रह्म प्राप्नुवन्ति । इति सायणः ।

॥ एतस्याह्नो रूपम् । *अनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवम् ॥

ऋभुदेवत्यं निविद्धानं नवर्चम् ।

॥ रथस्त्रिचक्र इति यदेतत्त्रिवत्तदन्तो वै त्रिवत् ॥

[8] बहुवचनं सुप्तिङ्वचनानामन्तो हि ।

॥ अन्त एतदहः एतस्याह्नो रूपम् । §अस्य वामस्य पलितस्य होतुरिति वैश्वदेवं +बहुरूपम् ॥

सूक्तम् । रूपमृचां मूर्तिः ।

॥ बहुरूपं वा एतदहः एतस्याह्नो रूपम् । गौरीर्मिमाय सलिलानि तक्षतीत्येतदन्तम् ॥

द्वापञ्चाशदृचेऽप्यस्मिन्नादित एकचत्वारिंशतं शंसेदित्यर्थः ।

सूत्र्यते च– ‡'अस्य वामस्य पलितस्य होतुरिति सलिलस्य दैर्घ्यतमस एकचत्वारिंशतम्' इति ।

---

* ऋक्सं० ४. ३६ [8] 'यस्य रथस्य चक्रद्वयेना(यम)निर्वाहकं यत्र तस्य तृतीयं चक्रं सम्पाद्यते तावता निर्वाहो भवतीत्यभिप्रेत्य तन्त्रिवत्पदमन्त इत्युच्यते' इति सायणः । § ऋक्सं० १. १६४.

\+ 'बहुरूपं बह्वर्थप्रतिपादकत्वात्' इति सायणः । 'रथस्त्रिचक्र इति यदे तत्त्रिवत्तदन्तो' इति, वैश्वदेवं बहुरूपं वा एतदहरेतस्याह्नो रूपम्' इति आनन्दाश्रमसंस्कृतग्रन्थावलीस्थमूलपाठः प्रामादिक इति प्रतिभाति ।

‡ ऐ० आ० ४ ३ १.

॥ *आ नो भद्राः क्रतवो यन्तु विश्वत इति
वैश्वदेवं निविद्धानम् ॥

नवर्चम्। अधिकरणे ल्युट्।

॥ ऐकाह्निकं रूपसमृद्धं बहु वा एतस्मिन्नहनि किञ्च किञ्च वारणं क्रियते। शान्त्या एव शान्तिर्वै प्रतिष्ठैकाहः शान्त्यामेव तत्प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति। प्रतितिष्ठति य एवं वेद येषाञ्चैवं विद्वानेतद्धोता शंसति ॥

उक्तार्थम्।

वैश्वदेवं शस्त्रमुक्तमुच्यतेऽथाग्निमारुतम्—

॥ ‡वैश्वानराय धिषणामृतावृध इत्याग्निमारुतस्य
प्रतिपत् ॥

प्रतिपद्यते प्रारभ्यतेऽनेनेति सूक्तं निविद्धानं पञ्चदशर्चं प्रतिपत्।

॥ †अन्तो वै धिषणा ॥

[1]अन्तो निर्णयते पुरः।

॥ अन्त एतदहः एतस्याह्नो रूपम्। §प्र यज्यवो

1. अन्तो निर्णयः क्रियते पुरः इति घपाठः।

* ऋक्सं० १. ८९. ‡ ऋक्सं० ३. ३.
† 'अत्र या धिषणा सा बुद्धिः श्रूयते। सेऽयमन्तो वै पर्यवस्थानभूमिरेव' इति सायणः। § ऋक्सं० ५. ५५.

मरुतो भ्राजदृष्टय इति मारुतम् ॥

सूक्तं निविद्धानं दशर्चम् ।

॥ समानोदर्कम् ॥

'शुभं यातामनुरथा अवृत्सते'ति बहुशोऽभिधीयते ।

॥ समानोदर्कं वा एतदहरेतस्याह्नो रूपम्। *जातवेदसे सुनवाम सोममिति $जातवेदस्यां पुरस्तात्सूक्तस्य शंसति ॥

जातवेदसि भवा ।

किमर्थम्,

॥ स्वस्त्ययनं वै जातवेदस्या स्वस्तितायै ॥

स्यात् ।

सा

॥ स्वस्त्ययनमेव तत्कुरुते ॥

तत् तेन ।

॥ +इमं स्तोममर्हते जातवेदस इति जातवेदस्यम ॥

जातवेदोगुणो ह्यग्निः स्तुत्यः षोडशकेऽत्र हि ।

---

* ऋक्सं० १, ९९. १. $ जातवेदोनामिका देवता यस्या ऋचः सा जातवेदस्या ' इति सायणः । + ऋक्सं १. ९४.

॥ समानोदर्कम् ॥

‘[1]अग्ने सख्ये मा रिषामा वयं तवे’ति समानं हीदम् ।

॥ समानोदर्कं वा एतदहः एतस्याह्नो रूपमह्नो [2]रूपम् ॥

द्विरुक्तिरुक्तार्था ।

तद्देवादीममन्त्रेषु सूक्ततत्त्वमुपदेशतः ।
इति षष्ठं होतृशस्त्रमाग्निमारुतमीरितम् ॥
[3]षट्स्विह चतुर्थानि विज्ञेयानीह तानि तु ।
यस्मा*‘च्चतुर्विंशादि’त्येवं सूत्रयिष्यते ॥
अग्निष्टोमसंस्थमेतदुच्यतेऽथ महाव्रतम् ।
इति पञ्चभिरध्यायैः[4] सम्यक्तादिह वर्णितम् ॥
दर्शयिष्यत्यनुक्तं तद्भगवानाश्वलायनः ।
चतुर्थे तु त्र्यध्याये सर्वसम्पत्समृद्धये ॥

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां महाव्रते पञ्चमोऽध्यायः ।
समाप्तं महाव्रताख्यं पर्व ।

---

१. ‘इमं स्तोममग्ने’ क.　　२. ‘रूपम् । द्विरु’ क.
३. इदं पद्यं खपाठे नास्ति ।　　४. ‘यैः . . . . चतुर्थेन भगवाना-
श्वलायनः । इत्यध्याये महार्थेन सर्वसम्पत्समृद्धये ।’ क, ‘यैः . . . . चतुर्थेन
भगवानाश्वलायनः । त्र्यध्याये महार्थे सर्वसम्पत्समृद्धये’ ख.

* ऐ० आ० ५. १. १.

अथ द्वितीयारण्यकम् ।

वर्णितं प्रथमं पर्व पञ्चाध्यायं महाव्रतम् ।
अथात्मोपनिषत्संज्ञं द्वितीयं पर्व वर्ण्यते ॥

॥ *एष पन्थाः ॥

यद्वु † 'अग्निर्वै देवानाम्' इत्यादिना सकलेन ब्राह्मणेन समहाव्रतेन पञ्चचत्वारिंशदध्यायरूपेण कर्तव्यं कर्मावोचाम एषः परस्य ब्रह्मणः प्राप्तौ पन्थाः । महामार्ग इत्यर्थः ।

॥ [1]एतत्कर्म ॥

---

१. 'एदं कर्म' ट.

---

* 'एतच्छब्दः सन्निहितमर्थं परामृशति । स च द्विविधोऽतीत आगामी चेति । एष उभयविधोऽपि पन्थाः पुरुषार्थस्य मार्गः । साधनमित्यर्थः । कोऽयमतीतः कश्चागामीत्यपेक्षायां तदुभयं विस्पष्टं निर्दिश्यते । अग्निमीळे [ऋक्सं १. १. १.] इत्यारभ्य अह्नो रूपमह्नो रूपम् [ऐ० आ० १. ५. ३.] इत्यन्तेनातीतसंनिहितग्रन्थेन यत्प्रतिपादितं तदेतत्कर्म 'उक्थमुक्थमिति वै प्रजा वदन्ति' [ऐ० आ० २. १. २.] इत्यारभ्य 'आचार्या आचार्याः' [ऐ० आ० ३. २. ६.] इत्यन्तेन सन्निहितेनारण्यकद्वयरूपेणोत्तरग्रन्थेन प्रतिपादितं यत्सगुणं निर्गुणञ्च तदेतद् ब्रह्म तदुभयमपि पुरुषार्थसाधनम् । तत्र कर्मशब्देन तद्विषयज्ञानपूर्वकमनुष्ठानं विवक्षितम् । ब्रह्मशब्देन तु तद्विषयज्ञानमात्रम् । अत एव मीमांसाभाष्ये भाष्यकारा आहुः— 'अभ्युदयफलं धर्मज्ञानं तच्चानुष्ठानापेक्षं निःश्रेयसफलन्तु ब्रह्मज्ञानं न चानुष्ठानान्तरापेक्षम्' इति । अतीतानागतग्रन्थस्थयोः कर्मब्रह्मणोरुभयोरपि पुरुषार्थहेतुत्वे कुतः काण्डभेद इत्याशङ्क्य वैलक्षण्यं विषयभेदादित्युच्यते । यदेतदुत्तरकाण्डप्रतिपाद्यं ब्रह्म तदेतत्सत्यमबाध्यम् । न हि तस्यान्यद्बाधकं प्रमाणं पश्यामः । पूर्वकाण्डोक्तं तु कर्म मिथ्यात्वाद्बाध्यम् । बाधकप्रमाणञ्च 'नेह नानास्ति' [बृ० ४. ४. १९.] इत्यादिकं बहुलमुपलभ्यते । मिथ्यात्वेऽपि धीशुद्धिहेतुत्वादुपादेयमेव ।' इति एष इत्यारभ्यैतत्सत्यमित्यन्तस्य सायणभाष्यम् । † ऐ० ब्रा० १. १.

कृञः कर्मणि मनिन्। अनुष्ठेयम्।

॥ [1]एतद्ब्रह्म ॥

ब्रह्मप्राप्तिहेतुत्वात्।

॥ एतत्सत्यम ॥

परमार्थभूतम्। यद्वा सत्सु महत्सु देवेष्वृषिषु च साधु।

॥ तस्मान्न प्रमाद्येत् ॥

*'जुगुप्साविरामप्रमादार्थानाम्' इति [2]ङ्यर्थे ङसिः। तस्मान्न प्रमाद्येत्। प्रमादो न कर्तव्यः। विषयाकृष्टत्वेन विहितार्थानवधानं @प्रमादः

मदेर्दिवादेश्श्यन्दीर्घश्शमादित्वाल्लिङस्तिप्।

स्पष्टयति—

॥ †तन्नातीयात् ॥

तदतीत्य त्यक्त्वा न वर्तेत। अत्ययस्त्यागः। इणो लिङ्।

---

१. 'एतं ब्रह्म' ट. २. 'ङ्यर्थे' क. घ.

---

* पा० सू० वा० २. ३. २८. @ 'तस्मादुभयविधादाम्नायमार्गात्प्रमादं न कुर्यात्। कर्मानुष्ठानब्रह्मज्ञानयोरसम्पादनं प्रमादः। तथा सम्पादयितुं प्रवृत्तेनाप्यालस्यादिना तत्परित्यागोऽपि प्रमाद एव। तदुभयं न कुर्यात्। अनेनायोगव्यावृत्तिरुक्ता।' इति सायणः। † 'कृषिवाणिज्यादौ वा शाखान्तरसिद्धे चैत्यवन्दनादौ वा पुरुषार्थसाधनत्वबुद्ध्या प्रवृत्तिः तस्य पूर्वोक्तमार्गात्ययः सोऽयमन्ययोगः, तद्व्यावृत्तिस्तन्नातीयादित्यनेनोच्यते। तत्पूर्वोक्तमार्गरूपमुभयं नातिक्रामेत्।' इति सायणः।

तस्मादेवम्,

॥ न ह्यत्यायन्पूर्वे ॥

येऽस्मत्तः पूर्वे महर्षयस्ते नात्यायन् ह्युक्तमार्गम् ।

लङ् झि झोऽन्त (उ॰इ)तश्चाट्च संयोगान्त इणो यणि ।

नात्यायन् ।

किञ्च,

॥ येऽत्यायँस्ते पराबभूवुः ॥

*पराभवतिरधोगत्यर्थः ।

॥ तदुक्तमृषिणा ॥

तद् उक्तमर्थरूपमृषिणा वेदेन तद्दर्शिना वा जमदग्निना ।

'ऋषिस्तु वेदे भृग्वादौ ज्ञानवृद्धे दिगम्बरे' ।

इति ¶निघण्टुः ।

कथम् । पठति—

‡प्रजा ह तिस्रो अत्यायमीयुर्न्य[1]न्या अर्कमभितो विविश्रे ।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आविवेशेति ॥

---

१. 'न्य १ न्या' इति चपाठानन्दाश्रममुद्रितपाठौ ।

---

* 'पराभूताः पुरुषार्थाद्भ्रष्टाः' इति सायणः । ¶ वैजयन्त्यां द्व्यक्षरकाण्डे पुल्लिङ्गाध्याये नवमं पद्यम् । ‡ ऋक्सं ८. १०१. १४ 'ब्राह्मणक्षत्रियविट्शूद्राः प्रजास्तासां भागचतुष्टयेन त्रिभागत्रयवर्तिन्यस्तिस्रः प्रजा वैदिकमार्गश्रद्धाराहिताः सत्यो यथोक्तस्य मार्गस्यात्यायमतिक्रममीयुः प्राप्ताः' इति सायणः ।

सांहितः कम्प ऐकश्रुत्ये नास्ति।

आदाय व्याचष्टे—

॥ प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायँस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः ॥

अत्यायम्। इणो घञ् भावे। *उक्तकर्ममार्गस्यात्यायमतिक्रमणं यास्तिस्रः प्रजाः आयन्नकुर्वन् इमानि वयांसि पक्षिणस्तानि एताः प्रजाः वङ्गावगधा वृक्षाः। §अवगधाः। गधेः(?)मिश्रणार्थादवपूर्वात् पचाद्यच्। तालगुल्मादयः। वङ्गाश्चावगधाश्चेति द्वन्द्वः। वङ्गावगधरूपाः प्रजाः द्वितीयाः। ¶ईरपादाः। ईरतेः करणे घञ्। गमनहेतुः पादो येषां त ईरपादाः। स्थावरसाहचर्याद्द्रुवादयः। अन्त्यालोपः छान्दसः। इति तिस्रः प्रजाः।

॥ न्यन्या[1] अर्कमभितो विविश्र इति ता इमाः प्रजाः अर्कमभितो निविष्टा इममेवाग्निम् ॥

तिसृभ्योऽन्यास्ता इममग्निं महाव्रतस्थम्। बृहतीसहस्रस्तुत्यर्थम्।

---

१. 'न्य १ न्या' आनन्दाश्रममुद्रितपाठः।

---

* 'ताः पूर्वमन्त्रोक्ता इमा अस्माभिर्दृश्यमानाः श्रद्धारहितास्त्रिविधाः प्रजा याः काश्चिद्वैदिकस्यातिक्रमं प्राप्तास्तानि तथाविधप्रजानां शरीराणि तद्दोषफलं भोक्तुं प्रवृत्तानीमान्यस्माभिर्दृश्यन्ते। सामान्यतः प्रोक्तानां पुनर्वयांसीत्यादिना विशेषनिर्देश' इति सायणः। § 'अवगधा अवन्ति मनुष्यादीन्रक्षन्ति तैर्गृध्यन्तेऽभिकाङ्क्ष्यन्त इति व्रीहियवाद्या ओषधयोऽवगधाः 'गृधु अभिकाङ्क्षायाम्' इति धातोर्गधशब्दनिष्पत्तिः।' इति सायणः।
¶ 'ईरपादा उ(र ? रः) पादाः सर्पा भूबिलवासिनः' इति सायणः।

निविविश इत्यस्य विवरणं निविष्टाः । समाश्रिताः । अर्कमित्यस्याग्नि-
मिति । अन्या इत्यस्य ता इति ।

अन्यासाश्चार्थाय—

॥ बृहद्ध तस्थौ भुवनेष्वन्तरित्यद उ एव बृहद्भुवने-
ष्वन्तरसावादित्यः ॥

आदित्याख्यमदो ज्योतिर्लोकेषु बृहदुच्यते ।

॥ पवमानो हरित आविवेशेति वायुरेव पवमानो
दिशो हरित आविष्टः ॥

आविवेशेत्यस्य विवरणमाविष्ट इति ।

कर्मभक्ताः प्रजा अन्याः सूर्यवाय्वग्निसंश्रयाः ।
सुखिन्यस्त्यक्तवेदोक्ता लतागुल्मगवादयः ॥
इत्यृगर्थाभिधानेन कर्ममार्गोऽत्र संस्तुतः ।
नैरुक्तानामग्निवायुसूर्या देवास्ततोऽपरे ॥
तद्विभूतय एवेति मतमत्र खलूच्यते ।

प्रथमः खण्डः ।

अथ महदुक्थे बृहतीसहस्रे प्रकृतदेवतात्रयस्याध्यात्माधिदैवतभेदेन-
उपासनमाह—

॥ उक्थमुक्थमिति वै प्रजा वदन्ति ॥

---

१. ' मतिम ' क.

वेदभक्ताः प्रजाः शस्त्रमिदमुक्थं वदन्ति हि ।
द्विरुक्तिरादरार्था स्यात्तत्रोक्थं तु निरुच्यते ॥

॥ तदिदमेवोक्थम् ॥

इदं पुरोवर्ति वस्तु ।

किं तत्,

॥ इयमेव पृथिवी ॥

उक्थमित्येव । उक्थशब्दवाच्या भूः ।

कस्मात् ।

॥ इतो हीदं सर्वमुत्तिष्ठति यदिदं किञ्च ॥

हि हेतौ । इदं सर्वमित्यस्य विवरणं यदिदं किञ्चेति । किञ्च किञ्चित्, कृत्स्नम् ।

चराचरात्मकं कृत्स्नमुत्तिष्ठति भुवस्त्वतः ।
*'घञर्थे कविधानं' †'स्थे'त्यपादाने तु के कृते ॥
आल्लोपस्तु §'उदः स्थे'ति कादेशोऽत्र तकारयोः ।

॥ £तस्याग्निरर्कः ॥

अर्कोऽशीतिभ्यः प्राञ्मन्त्रः । पृथिव्यु(क्त?क्थ)स्याग्निर्देवतार्कः ।

---

* पा० सू० वा० ३. ३. ५८. † पा० सू० भा० ३. ३. ५८.

§ पा० सू० ८. ४. ६१. £ 'तस्य शस्त्रस्य सम्बन्धी योऽयमर्कोऽर्चनीयो देवः सोऽयमग्निस्वरूपः' इति सायणः ।

॥ अन्नमशीतयः ॥

*अन्नवत्तुष्टिहेतुत्वादश्नातेश्चाप्यशीतिगीः ।

$‘स हान्नामित्यभिव्याहृत्य’ इति वक्ष्यमाणाच्च ।

॥ अन्नेन हीदं सर्वमश्नुते ॥

इदं जगत् कर्तृ । सर्वं प्राप्यमश्नुते प्राप्नोति । सुकरं (स?) ह्यन्नवतः सर्वम् ।

ध्यायेच्छस्त्रं ब्रुवन्त्वग्निमर्कमन्नमशीतिकाः ।

॥ अन्तरिक्षमेवोक्थम् ॥

एवमेवेत्यर्थः । तत्र त्वधिकरणे कः ।

॥ +अन्तरिक्षं वा अनुपतन्ति ॥

कर्मप्रवचनीयोऽनु(ः) त्व्यर्थे तद्योगतः कृतः ।
लक्षीकृत्यैव खं सर्वे ह्युत्पतन्ति पतन्ति च ॥

व्याचष्टे—

॥ अन्तरिक्षमनुधावयन्ति ॥

---

* ‘याश्च गायत्रीबृहत्युष्णिकछन्दस्कास्तृचानामशीतयस्त्रिविधाः सर्वा अन्नस्वरूपाः । तस्मात्कारणाल्लौकिकः पुरुषोऽन्नेनेदं सर्वं प्राणिजातमश्नुते व्याप्नोति । अन्नवन्तं पुरुषं सर्वे जनास्तल्लाभाय सेवन्ते ’ इति सायणः ।

$ ऐ० आ० २. २. १.   + ‘पक्षिणः सर्वेऽप्यन्तरिक्षमनुसृत्योपरि पतन्ति सञ्चरन्ति ’ इति सायणः ।

*स्वार्थे णिच् ।

॥ तस्य वायुरर्कः ॥

अन्तरिक्षोक्थस्य वायुरर्कः ।

॥ अन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते ॥

उक्तार्थम् ।

ध्यायेच्छस्त्रं वियद्वायुमर्कमन्नमशीतिकाः ।

॥ असावेव द्यौरुक्थम् ॥

एवं वा । अपादाने कः ।

कथम्,

॥ अमुतः प्रदानाद्धीदं सर्वमुत्तिष्ठति यदिदं किञ्च ॥

प्रदानं वृष्टिलाभः ।

स्वर्गात्पतितवृष्टेर्हि भूमिः सस्यान्विता भवेत् ।

इति ।

॥ तस्यासावादित्योऽर्कः ॥

---

१. 'वमेव' ख.　　२. 'दार्कः' क. घ.

---

* 'मनुष्याश्च भूमेरुपर्यन्तरिक्षमवकाशमनुसृत्यैवाश्वबलीवर्दादीन् धावयन्ति' इति सायणः ।

तस्य द्युक्थस्यासावादित्योऽर्कः ।

॥ अन्नमशीतयः अन्नेन हीदं सर्वमश्नुते ॥

व्याख्यातम् ।

ध्यायेच्छस्त्रं दिवं सूर्यमर्कमन्नमशीतिकाः ।

॥ इत्यधिदैवतम् ॥

अग्निवाय्वादित्यान्वयात् ।

॥ अथाध्यात्मम् ॥

आत्मानमधिकृत्येत्यव्ययीभावः । *'अव्ययीभावे शरत्प्रभृतिभ्यः' । §'अनश्च' इति समासान्तः ।

॥ पुरुष एवोक्थम् ॥

कथम् ,

॥ †अयमेव महान्प्रजापतिरहमुक्थमस्मीति विद्यात् ॥

अयं पुरुषो यः स महान् प्रजानां पतिश्च भवितुमहमुक्थमस्मीति ध्यायेत् ।

तत्र च,

---

* पा० सू० ५. ४. १०७. § पा० सू० ५. ४. १०८.

† 'शिरःपाण्यादिमान्देहः पुरुषस्तस्य महत्त्वं श्रेष्ठत्वम् अयं पुरुषो ब्रह्मणो लोकः' [ऐ० आ० २. १. ३.] इत्यत्र वक्ष्यते । प्रजापतित्वं च 'तस्य वाचा सृष्टौ पृथिवी चाग्निश्च [ऐ० आ० २. १. ७.] इत्यत्राभिधास्यते । तस्मादुत्कर्षहेतुत्वादेहस्योक्थत्वम् । तच्चोक्थमहमस्मीत्येवं ध्यायेत् ।' इति सायणः ।

॥ तस्य मुखमेवोक्थं यथा पृथिवी तथा ॥

शस्त्रम् ।

॥ तस्य वागर्कोऽन्नमशीतयः अन्नेन हीदं सर्वमश्नुते ॥

उक्तार्थानि ।

॥ नासिके एवोक्थं यथान्तरिक्षं तथा ॥

एकेन्द्रियत्वेऽपि द्विबिलत्त्वाद्द्वित्वम् ।

॥ तस्य प्राणोऽर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते ॥

पूर्ववत् ।

॥ तदेतद्ब्रध्नस्य विष्टपं यदेतन्नासिकायै विनतमिव ॥

ब्रध्न आदित्यः । विष्टपं स्थानम् । नासिकायाः । ङसो ङे । विनतं नम्रम् । नासिकामूलम् ।

॥ ललाटमेवोक्थं यथा द्यौस्तथा ॥

स्वर्ग इव ।

॥ तस्य चक्षुरर्कोऽन्नमशीतयः अन्नेन हीदं सर्वमश्नुते ॥

पूर्ववत् ।

॥ समानमशीतयोऽध्यात्मं चाधिदैवतञ्चान्नमेव ॥

अन्नस्य सम्यगननहेतुत्वं समानत्वेन व्यक्तमित्यर्थः । अतोऽप्यर्कवत् । भेदो न प्रदर्शितः ।

समानत्वं स्तौति —

॥ अन्नेन हीमानि सर्वाणि भूतानि समनन्ती३ँ ॥

आख्याने प्लुतोऽनुनासिकः छान्दसः। सं सम्यक्। *अनन्ति जीवन्ति, सुरासुरनरादीनि भूतानि।

तथा,

॥ अन्नेनेमं लोकं जयति ॥

वशीकरोति अन्नेन दीयमानेन वै भुवम्।

॥ अन्नेनामुम् ॥

जयतीत्येव।

स्वर्गलोकांस्तथेन्द्रादींश्चर्वाद्यैः प्रीणयत्यपि।

॥ तस्मात्समानमशीतयोऽध्यात्मं चाधिदैवतञ्चान्नमेव ॥

अथ कृत्स्नस्य जगतोऽन्नत्वमत्तृत्वञ्चाह—

॥ तदिदमन्नमन्नादम् ॥

च स्यात्।

अदेः क्ते इट्वन्नञ्जेति ... ... निपातनात्(?)।
§'रदाभ्या'मिति णत्वञ्चाप्यन्नादः कर्मणि त्वणि ॥

---

१. 'नन्ति' ज. ख.

---

* 'समनन्ति सम्यक्चेष्टन्ते' इति सायणः।

§ पा० सू० ८. २. ४२.

तत् तत्र । इदं जगत्, अत्तव्यमत्तृ च ।

कथम्,

॥ इयमेव पृथिवी ॥

एवेति । तावदित्यर्थः ।

इयं हि पृथिवी तावद्द्वयमत्तव्यमत्तृ च ।

कथम्,

॥ इतो हीदं सर्वमुत्तिष्ठति यदिदं किञ्च ॥

सस्यादिकमत्तव्यम् ।

॥ यद्ध किञ्चेदं प्रेर्ता[1] ३ इ तदसौ सर्वमत्ति ॥

प्रादीरतेर्लट्[2]त शब्लुक् प्रेर्तेछान्दसः प्लुतः ।
[3]अभि वि खे क एतश्च देवतां याति यद्धुविः ॥
द्यौः कृत्स्नं भक्षयते[4] तदति द्यौरसमेव भूः(?)

तथा,

॥ यदु किञ्चातः प्रैती[5][6]३ तदियं सर्वमत्ति ॥

पूर्ववत्प्लुतः ।

अतो द्युलोकाद्वृष्ट्यादि तद्भूमिर्भक्षयत्यपि ।

॥ सेऽयमित्याद्यात्री ॥

---

१. 'र्ता इ' झ. २. 'ट् तक् जश' घ. ३. 'अभिदिद्वि-विपेक ए' क. 'अविद्विवेक ए' ख. ४. 'तेऽद्यत्री द्यौ क. 'द्यती द्यौ' ख. ५. 'तीः' ज. ६. 'श्री' ज.

चेति शेषः । अदेर्ण्यत्तृचौ ।

इतीयमत्ति वृष्ट्यादि द्युलोकेन च भक्ष्यते ।

॥ अत्ता ह वा आद्यो भवति ॥

*एवंविदिति शेषः ।

अन्नादिकं स्वयं भुङ्क्ते बन्धुभिश्चोपजीव्यते[1] ।

किञ्च,

॥§न तस्येशे यन्नाद्यात् ॥

यन्नाद्याद्भक्षयेद्यस्तु तस्य नेष्टेऽत्र वेदिता[2] ।
ईशतेर्लुट् त £'लोपस्त आत्मनेप'ति लुक्(त्लुलु ? श)पः
ऐश्वर्यानुभवौ स्यातां वेदितुश्चेति वर्ण्यते ।

आद्यादिति । आद्यश्च अत् भक्षयितृ च इत्यर्थः । अन्नादरूपस्य सर्वस्येष्ट इत्यर्थः ।

किञ्च,

---

१. 'भिर्वा' क. २. 'अत्ता' क.

---

* 'एतद्गुणध्यानस्य फलमाह— अत्ता ह वा आद्यो भवति, इति । अत्ता योऽयं लोके भोक्ता यश्चाद्यो भोग्यः पदार्थस्तदुभयरूपेण सर्वात्मको भवतीत्यर्थः' । इति सायणः । § 'अनुपासको लौकिकः पुरुषः स्वधर्मकर्मप्राप्तमशनादिकं कियदेवास्ति न तु सर्वम् । सर्वस्य स्वकर्मप्राप्ति[त] त्वाभावात् । तथा सति यद्वस्तु स्वयं नाद्यात् भुञ्जीत तस्य वस्तुनो नेशे नेष्टे स्वामी न भवति । उपासकस्तु हिरण्यगर्भरूपः सन् सर्वमत्तीति सर्वस्य स्वामी' । इति सायणः । £ पा० सू० ७ १ ४१.

॥ यद्वैनं नाद्युः ॥

अद्यादिति शेषः । वेति चार्थे । यद्वस्त्वन्ये नाद्युः नानुभवेयुरन्नादस्य स्यात् । अन्या(न)नुभूतं महत्सुखं भवेदित्यर्थः ।

द्वितीयः खण्डः ।

॥ अथातो रेतसः सृष्टिः ॥

उच्यते । रेतः सारभूतं कार्यवस्तु । *'स्रुरीभ्यां तुट् च' इत्यसुन् । तस्य सृष्टिर्विस्तीर्णता ।

॥ प्रजापते रेतो देवाः ॥

सृष्टिस्थित्यन्तलीलाकृत्परं ब्रह्म प्रजापतिः ।

देवा अग्न्याद्याः ।

॥ देवानां रेतो वर्षः वर्षस्य रेत ओषधयः ॥

व्रीह्यादयः ।

॥ ओषधीनां रेतोऽन्नम् ॥

पञ्चधान्नमाश्यखाद्यचोष्यलेह्यसपेयकम् ।

॥ अन्नस्य रेतो रेतः ॥

---

* उ० सू० ६५९.

तृप्तिजश्चरमो धातू रमेश्शुक्लासृगात्मकम् ।
शुक्लान्नस्य स सारांश इति वै विदुषां मतम् ॥

उक्तं हि—

पीताभिरद्भिरशनं कठिनं मृदीय-
कौक्षेयवातविहृतज्वलनावलीढम् ।
नाडीभिराहृदयमुद्गतमिन्द्रियाणि
पुष्णन्मनस्युपचयं कुरुतेऽन्नसारः ॥

॥ रेतसो रेतः प्रजाः प्रजानां रेतो हृदयम् ॥

अन्तःकरणम् ।

॥ हृदयस्य रेतो मनः ॥

सङ्कल्पविकल्पात्मकम् ।

॥ मनसो रेतो वाक् ॥

विधिनिषेधरूपा ।

॥ वाचो रेतः कर्म ॥

शुभाशुभरूपम् ।

॥ तदिदं कर्मकृतम ॥

इदमित्युक्तमाह—

॥ अयं पुरुषः ॥

शरीरम् ।

स च,

॥ ब्रह्मणो लोकः ॥

लोक्यते दृश्यते[1]ऽस्मिन् लोको ब्रह्मदर्शनस्थानभूतः।

॥ स इरामयः ॥

इरा अन्नम्। तन्मयः, अन्नरसपरिणामित्वात्।

॥ यद्धीरामयी[2] ३ तस्माद्धिरण्मयः ॥

यत् यस्मात्। इरामयाः। आख्याने प्लुतः। इरामयः[3]। हिरण्मयः हितरमणीयरूपः। इतोऽन्यत्र योग्यत्वरम्यत्वानुपपत्तेः।

॥ *हिरण्मयो ह वा अमुष्मिँल्लोके सम्भवति हिरण्मयस्सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद ॥

अमुष्मिन्परत्र। सर्वेभ्यो भूतेभ्यः। भिसो भ्यम्। सर्वभूतैः। ददृशे। लिङो लिट्। दृश्येत। यः स वेदिता।

तृतीयः खण्डः।

---

१. 'ते तास्मिन्' क. ख.
२. 'या त' क. ख, 'याः त' झ, 'यास्त' ट, 'या ३ः त' ठ.
३. 'यः इति रमणीयरूपः' क, यः हितरम' घ.

---

* 'यः पुमानेवं हिरण्मयत्वगुणमुपास्ते स पुमान्स्वर्गलोके ज्योतिर्मयो भवति। तथाविधो भूत्वा सर्वप्राण्युपकारार्थमादित्यमण्डलरूपेण सर्वदा दृश्यते' इति सायणः।

॥ तं प्रपदाभ्यां प्रापद्यत *ब्रह्मेमं पुरुषम् ॥

तमिमं पुरुषमवयविनम् । ब्रह्म प्राणः । प्रापद्यत । पादाग्रं प्रपदं ताभ्याम् ।

प्रपदशब्दं निराह—

॥ यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपदे ॥

यत् यस्मात् । प्रथमप्रतिपत्तिहेतुत्वमनयोः ।

॥ तस्मात्प्रपदे इत्याचक्षते ॥

लौकिकाः ।

॥ शफाः खुरा इत्यन्येषां पशूनाम् ॥

प्रपदे आचक्षत इत्येव । मनुष्यादन्येषाम् । द्वित्वमविवक्षितम् ।

॥ तदूर्ध्वमुपसर्पत्ता ऊरू अभवताम् ॥

तत् ब्रह्म । उपसर्पत् उदगच्छत् । याभ्यामुदसर्पत्ता ऊरूसंज्ञौ ।

॥ $उरु गृणीहीत्यब्रवीत्तदुदरमभवत् ॥

---

* ' यज्जगत्कारणं ' सत्यं ज्ञानमनन्तं ब्रह्म ' [तै० उ० २. १. १.] इत्यादिवाक्यप्रतिपाद्यं ब्रह्मास्ति तदेतत्सृष्टिकाले स्थूलदेहं सृष्ट्वा तं सृष्टमिमं दृश्यमानं पुरुषशब्दवाच्यं स्थूलं देहं प्रपदाभ्यां पादाग्राभ्यां प्रापद्यत प्रविष्टवत् । ' तत्सृष्ट्वा तदेवानुप्राविशत् ' [तै० उ० २. ६. १.] इति श्रुत्यन्तरम् ' इति सायणः । $ ' उरु विस्तीर्णं यथा भवति तथा गृणीहि निगरणयोग्यं विपुलच्छिद्रं कुर्वित्येवमुपरितनं शरीरभागं प्रत्यूर्वोरवस्थितं ब्रह्माब्रवीत्तस्य ब्रह्मणः सङ्कल्पवशात्तत्स्थानमुपरितनमुदरशब्दवाच्यं विपुलच्छिद्रमभवत् ' इति सायणः ।

तद् ब्रह्म ऊर्ध्वं गच्छद्यदङ्गं प्राप्येमं पुरुषम् उरु विपुलं गृणीहि भुक्तमन्नादीत्यब्रवीत्तदुदरमभवत्।

॥ *उर्वेव मे कुर्वित्यब्रवीत्तदुरोऽभवत् ॥

यदङ्गं प्राप्य ब्रह्म पुरुषं प्रति मे मम उरु विस्तीर्णं स्थानं कुरु सम्पादयेत्यब्रवीत्तदुरोऽङ्गं हृदयाख्यमभवत्।

॥ उदरं ब्रह्मेति $शार्कराक्ष्या उपासते ॥

पञ्चाग्नितपसो योगात्सूर्यमण्डलवीक्षणे।
शर्करावद्दृढाक्षत्वाच्छर्कराक्षमृषिं विदुः॥

गर्गादियञि तद्वंश्याः शार्कराक्ष्या महर्षयः।
§'यञञोश्चे'ति लुङ्नात्र भवेद्गोपवनादितः॥

ते ब्रह्मोदरगं मत्वा संयताः पर्युपासते।
+'अधो दृष्ट्या वितस्त्यां तु नाभ्यामुपरि तिष्ठति'॥

इत्युपनिषत्प्रसिद्धदेश इत्यर्थः।

॥ हृदयं ब्रह्मेत्यारुणयः ॥

उपासत इत्येव। बाह्वादीञ्। अरुणाचार्यपुत्रा हृदयमुरो ब्रह्मेत्यवोचन्।

---

* 'उदरवर्तिनो मम भूयोऽपि विस्तीर्णमेव छिद्रं कुर्वित्येवं ब्रह्मसङ्कल्पवशात्तदेतदुपरितनं स्थानमुरःशब्दवाच्यं विपुलमधिकमभूत्' इति सायणः।

$ 'शर्कराक्षिनामकस्य महर्षेः पुत्राः' इति सायणः।

§ पा॰ सू॰ २. ४. ६४. + उत्तरनारायणोपनिषत्।

॥ ब्रह्माहैव ता[1] ३ इ ॥

ते उदरं हृदयं च द्वे ब्रह्मैव । अहेति प्रसिद्ध्यर्थः । *अतः प्लुतविकारः छन्दस्त्वात् । +'एचोऽप्रगृह्यस्य' इति ह्युच्यते ।

॥ ऊर्ध्वं त्वेवोदसर्पत ॥

यावन्मस्तकतलम् ।

॥ तच्छिरोऽश्रयत ॥

तत् (म?य) द्रुतवद्ब्रह्म । श्रिञो लङ् ।

॥ यच्छिरोऽश्रयत तच्छिरोऽभवत ॥

श्रिञः शिरःशब्द इत्याह—

॥ तच्छिरसः शिरस्त्वम् ॥

श्रिञो मध्यगतो रेफस्तृतीयः कर्मणि कसुन् ।

॥ ता एताः शीर्षञ्छ्रियः §श्रिताश्चक्षुः श्रोत्रं मनो वाक्प्राणः ॥

शीर्षन् शिरसि । श्रियः । श्रिञः कर्मणि क्विप्, जस्, इयङ् । सर्वैराश्रयणीयाः । ताः प्रसिद्धाः ।

॥ श्रयन्तेऽस्मिञ्छ्रियो य एवमेतच्छिरसः शिरस्त्वं वेद ॥

---

१. 'ता इ' म.

---

* 'प्लुतिः शास्त्रीयप्रसिद्ध्यर्था' इति सायणः ।

\+ पा० सू० ८. २. १०७.

§ 'श्रियो दर्शनश्रवणादिव्यवहारसम्पदः श्रिताः प्राप्ताः । कास्ताः श्रिय इति चेत्तदुच्यते- चक्षुरादयः श्रियो व्यवहारसम्पदस्तन्निष्पत्तेः' इति सायणः ।

श्रयन्ते प्रीत्या वर्तन्ते अस्मिन् वेदित(स्त्वत? रि) श्रियः सम्पदः ।

*अथ देहाद्भिन्नस्य प्राणस्य वागादिभ्यो भेदमन्वयव्यतिरेकाभ्यामाह—

॥ ता अहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मीति ॥

उक्थंवचोक्थं निस्तुत्य द्वित्वं वाक्यस्य सम्भ्रमात् ।
वागाद्याः स्पर्धया हिंसामन्योन्यं तु प्रचक्रिरे ।

॥ ता अब्रुवन्हन्तास्माच्छरीरादुत्क्रामाम तद्यस्मिन्न उत्क्रान्त इदं शरीरं पत्स्यति[1] तदुक्थं भविष्यतीति ॥

§ता वागादयः स्पर्धापगमे अब्रुवन् । हन्तेत्यभिमुखीकरणार्थः । तदिति वाक्योपन्यासे। नः अस्माकं मध्ये यस्मिन् । उत्क्रा (मः[2]? माम) लोट् । आट् । मसस्सलोपः । ‡'क्रमः परस्मैपदेषु' इति दीर्घः । पत्स्यति । तङस्तिप् । पत्स्यते ।

ततः,

॥ वागुदक्रामत् ॥

उत्क्रान्तायाम्,

॥ अवदन्नश्नन् पिबन्नास्तैव ॥

---

१. 'पत्स्य' क. ख. घ. छ. ज. झ. ञ. ठ. ण. त.
२. 'मः आम लोट्' घ., मनसस्सलोपः' घ.

---

* 'इदानीं शिरःपर्यन्ते शरीरेऽवस्थितानां चक्षुरादीनां मध्ये प्राणस्य श्रैष्ठ्यं वक्तुं संवादं दर्शयति–' इति सायणः । § 'ताः स्पर्धमाना देवताः स्पर्धानिवारणार्थं समयविशेषे परस्परमब्रुवन् । निवारणोपायदर्शननिमित्तहर्षार्थो हन्तशब्दः' इति सायणः ‡ पा० सू० ७. ३. ७६.

वाचमवदन् मूकीभूतोऽशनपाने कुर्वन्नास्तैव ।

॥ चक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तैव ॥

अन्धीभूतः ।

॥ श्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव ॥

बधिरीभूतः ।

॥ मन उदक्रामन्मीलित इवाश्नन्पिबन्नास्तैव ॥

अविविक्तचित्तः स्तब्ध इव ।

वाङ्नेत्रश्रोत्रचित्तेषु समुत्क्रान्तेषु देहतः ।
मूकान्धबधिराज्ञेषु प्रभुञ्जाने शरीरके ॥

॥ प्राण उदक्रामत्तत्प्राण उत्क्रान्तेऽपद्यत ॥

ततः प्राणे समुत्क्रान्ते तच्छरीरमपद्यत ।

स्पष्टयति—

॥ तदशीर्यत ॥

विशीर्णमभवत् ।

शॄ हिंसायां लङस्त श्न ईयन्[1] तॄदीदित्वमद् तथा(?) ।

॥ अशारीतीॾँ[2] तच्छरीरमभवत् ॥

---

१. 'इय तॄदीदत्व' ब. २. 'तीँ त' ज. 'ति त' स.

अशारि । कर्तरि (णिच्? चिण्) । इतेः प्लुतानुनासि(का? को) व्याख्याने ।

शृणोतेरीरनि पदं शरीरं तु निरुच्यते ।

॥ तच्छरीरस्य शरीरत्वं शीर्यते ह्वा अस्य द्विषन्पाप्मा भ्रातृव्यः परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ॥

शीर्यत इत्यादेः परास्येत्यादि विवरणम् । *पराभवति नश्यति । अस्य वेदितुः । §'द्विषः शतुर्वावचनम्' इति षष्ठी । ¶'द्विषोऽमित्र' इति शतृ । द्विषन्नबन्धुः । पाप्मा अनर्थकारी । भ्रातृव्यः शत्रुः ।

॥ ता अहिंसन्तैवाहमुक्थमस्म्यहमुक्थमस्मीति ॥

एव पुनः ।

प्राणोत्क्रा(न्तात्प? न्तेः प)तनं यत्किलासीत्
तत्काकतालीयमिति ब्रुवाणाः ।
वागादयः स्पर्धनमेव चक्रुः
स्वकात्मवीर्याणि च भाषमाणाः ॥

इत्यर्थः ।

स्पर्धागमे[1] तु,

॥ ता अब्रुवन्हन्तेदं पुनः शरीरं प्रविशाम तद्यस्मिन्नः

---

1. 'स्पर्धावगमे तु' घ.

---

* 'कथञ्चिदविशीर्णत्वेऽपि पराभवति तिरस्कृतो भवति' इति सायणः ।
§ पा० स० ३. २. १३१. ¶ पा० सू० वा० २. ३. ६९.

प्रपन्न इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति ॥

विशस्तुदादिर्लोट्याण्मै[1] सलोपो न गुणः श ङित् ।
पदेः क्ते दतयोर्नत्वं *'रदाभ्या'मिति कर्तरि ॥

† 'उदः स्थे'ति सकारस्य तो लृट् स्येति कृते पदम् ।
प्रविशाम प्रापणेन क्रमादुत्थास्यतीति च ॥

वाक्यार्थस्तु,

अन्वयव्यतिरेकाभ्यां निश्चिन्मोऽर्थमिहाञ्जसा ।

॥ वाक्प्राविशत् ॥

ततस्तच्छरीरम्

॥ अशयदेव ॥

अशेत[2] वै शपो लुङ्न छन्दस्त्वात्तस्य तिप् लङि ।

॥ चक्षुः प्राविशदशयदेव श्रोत्रं प्राविशदशयदेव मनः प्राविशदशयदेव ॥

वाक्चक्षुःश्रोत्रचित्तेषु तच्छरीरमशेत वै ।
प्रविष्टेषु ततः पश्चात्प्राणो वै प्रविवेश ह ॥

इत्याह—

---

१. 'मैस्सलो' क. ख. २. 'तैव शपो लुङ् छान्तस्य तिर्किङ्कि' क 'तैव शपो लुङ् छन्दस्त्वात्तस्य तिलुकि' ख.

---

* पा० सू० ८. २. ८२. † पा० सू० ८. ४. ६१.

॥ प्राणः प्राविशत्। तत्प्राणे प्रपन्न उदतिष्ठत् ॥

तत् शरीरम्। प्रपन्ने प्रविष्टे।

॥ तदुक्थमभवत् ॥

तत्। सुपो लुक्। तेषु मध्ये। सः प्राणः। उक्थं सत्यं वस्त्वभवत्।

॥ तदेतदुक्थाँ३[1] प्राण एव ॥

आख्याने प्लुतः। तत् तेषु। एतद्[2] एष प्राणः। ऐषोक्थमभूत्।

ततश्च,

॥ प्राण उक्थमित्येव विद्यात्। तं देवा अब्रुवन् ॥

तं प्राणम्। देवा वागाद्याः।

॥ त्वमुक्थमसि ॥

न वयं, न चान्ये, किन्तु त्वमेव प्रशस्योऽसि।

स्तौति—

॥ त्वमिदं सर्वमसि ॥

सर्वस्य त्वदधीनत्वात्।

असेर्धातोस्सिप् शपो लुक् *'तासस्त्योर्लोप' एव च।

---

१. 'क्था ३' क. ख. ठ., 'क्थ ३ प्रा' ज, 'क्थां प्रा' झ.
२. 'एतदु' ख.

---

* पा० सू० ७. ४. ५०.

ततश्च,

॥ तव वयं स्म त्वमस्माकमसीति ॥

तवास्माकं च सम्बन्धः शेषशेषित्वलक्षणः ।
सुदुस्त्यजस्ततोऽस्मांस्त्वं परि[1]रक्षेति तेऽब्रुवन् ॥

॥ तदप्येतदृषिणोक्तम् ॥

मन्त्रेण तद्दर्शिना वा श्रुतकक्षेण ।

कथम्,

॥ त्वमस्माकं तव स्मसीति ॥

*त्वयेदिन्द्रेत्यृचः पादस्तृतीयोऽयमुदाहृतः ।

हे इन्द्र! त्वया इत् एव युजा सह येनानुगृहीता वयं प्रतिस्पृधः स्पर्धयितॄन् प्रतिसृष्टान् ब्रुवीमहि ब्रूमः यस्मात्त्वमस्माकमसीति च वयं स्मसि स्मः भवामः । $'इदन्तो मसि' । उक्तप्रकारम् ।

चतुर्थः खण्डः ।

॥ ¶तं देवाः प्राणयन्त ॥

---

1. 'चक्षेति' क. ख.

---

* त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः ।
त्वमस्माकं तव स्मसि । ऋक्सं० ८. ९२. ३२.

$ पा० सू० ७. १. ४६.

¶ 'तमुक्थे व्यातव्यं प्राणं देवा वागादयः प्राणयन्त "त्वमस्माकं तव स्मसि" (ऋक्सं ८. ९२. ३२.) इत्यादिश्रुत्या प्रकर्षमुत्साहं प्रापितवन्तः । स च प्राणः

माहात्म्यमिति शेषः । माहात्म्यं प्राणयन्त प्रापितवन्तः ।

॥ सः प्रणीतः प्रातायत ॥

*'तायृ सन्तानपालनयोः' । लङ् । वागादीन्यपालयत् स्वामीव भृत्यान् यथाविषयं नियुज्येत्यर्थः ।

॥ प्रातायी[1]ती३ँ तत्प्रातरभवत्[2] ॥

अतायि । & 'दीपजन' इति कर्तरि [3]चिण् । इति यत् तस्मात्स प्राण एव प्रतायनयोगात्प्रातःकालोऽभवत् । आख्याने प्लुतः सानुनासिकः ।

॥ समागादि[4]ती३ँ तत्सायमभवत् ॥

१. 'ति' ज. 'तीँ' झ.   २. 'त् ॥ दीप' क. घ.
३. 'णिच्' क. घ.   ४. 'तीँ । स' क., 'तिः३' ज., 'ति' झ.

प्रणीतो देवैरुत्साहं प्रापितः सन्प्रातायत प्रकर्षेण विस्तृतोऽभूज्जागरणकाले स्वभृत्यरूपान्वागादींस्तद्गोलकेषु प्रकर्षेण प्रसारितवान् । अयमेव प्राणस्य विस्तारः । तं दृष्ट्वा वागादिदेवा मनुष्या वा प्रातायीत्येवमुक्तवन्तः । प्रकर्षेण विस्तृतोऽभूदिति तस्य शब्दस्यार्थः । प्लुतिः प्रसिद्ध्यर्था । रात्रावपनीतायां प्रभाते जागरणाय स्वार्थं वागादीनां गोलकेषु प्रसरणं सर्वलोकप्रसिद्धम् । यस्मात्प्रातायीत्येवमुक्तवन्तस्तस्मादयं वागादिप्रसरणपूर्वको जागरणकालः प्रातःशब्दवाच्योऽभूत् । प्रातायि प्रातरित्यनयोः शब्दयोरक्षरसाम्यात् । स प्राणः पुनरपि रात्रौ सुषुप्त्यर्थं वागादिप्रसरणं संहृतवांस्तं संहारं दृष्ट्वा समागादित्युक्तवन्तः । सङ्कोचं प्राप्तवानिति तस्यार्थः । स कालः सायंशब्दवाच्योऽभूत् । समागात्सायमित्यक्षरसाम्यात् । तस्य च प्राणस्य दिवसे वागादिप्रसारणरूपजागरणावस्थानिष्पादकः प्राणशब्दवाच्य एको व्यापारः । तथा रात्रौ सुषुप्त्यर्थं वागादिसंहाररूपोऽपानशब्दवाच्यो व्यापारो द्वितीयः । तावेतौ प्राणापानव्यापारावहोरात्ररूपत्वेन ध्येयौ ' इति तं देवा इत्यादिरात्रिरपान इत्यन्तस्य सायणभाष्यम् ।

* धातुपाठे भ्वादौ १५ तमो धातुः ।   & पा० सू० ३. १. ६१.

विषयेभ्यः समाहृत्य स्वापे वागादिसङ्गतेः ।
स प्राणः सायमाख्योऽभूद् *'गातिस्थेति' [1]सिचोऽस्ति लुक् ।

प्रातः सायं द्वे रूपभेदमाह—

॥ अहरेव प्राणः ॥

[2]मुखे नासिकाभ्यां निर्गच्छन् रेचनवृत्तिर्वायुः प्राणः । अहः प्राणः ।

॥ रात्रिरपानः ॥

पूरणवृत्तिरपानो रात्रिः सायम् ।

॥ वागग्निः ॥

अधिष्ठात्रधिष्ठेययोरेकत्वाध्यासात् सामानाधिकरण्यम् । एव-मुत्तरत्रापि ।

॥ चक्षुरसावादित्यः । चन्द्रमा मनः । दिशः श्रोत्रम् । †स एष प्रहितां संयोगः ॥

हि गतौ । क्विपि तुक् आम् । वागादीनां सङ्गतानामेष प्राणः ब्रह्म

---

१. 'सिचास्तिलु' क. २. 'मुखनासि' घ.

---

* पा० सू० २. ७. ७७.

† 'या एता अग्न्यादयो देवताः सन्ति तासां प्रहितां प्रकर्षेण हितानां देवलोकगतेषु स्वस्वस्थानेषु प्रसारणेन विस्रम्भेणावस्थितानामध्यात्मं पुरुषशरीरे वागादीन्द्रियेषु यः प्रवेशः स एष संयोगः सङ्कोचरूपेण वागादितादात्म्यं तथाधिदैवतमद उ शास्त्रप्रसिद्धं स्वस्वस्थानेष्ववस्थितानामाविः प्रकटीभाव इत्येतदर्थजातं तदुक्तं भवति । तेन वागग्निरित्यादिवाक्येनाभिहितं भवति । अग्न्यादीनां शरीरे सङ्कोचो देवलोके विकास इत्येतादृशं तात्पर्यं श्रुत्या दर्शितम्' इति स एषेत्यादिभवतीत्यन्तस्य सायणभाष्यम् ।

संयोगात् । संयुज्यतेऽस्मिन्नित्यधिकरणे घञ् ।

॥ अध्यात्ममिमा देवता अद उ आविरधिदैवत-
मित्येतत्तदुक्तं भवति ॥

देहे वागादिषु ब्रह्म ध्येयमाविः प्रकाशते ।
देवेष्वग्न्यादिरूपेण चेत्युक्तं भवतीह तु ॥
अग्निवागादिरूपश्च प्राणो ब्रह्मेति निश्चयः ।

उ चेत्यर्थः ।

॥ एतद्ध स्म वै तद्विद्वानाह हिरण्यदन्बैदः ॥

तद् आत्मनो वागादिसंयोगत्वं विद्वान् जानन् हिरण्यदन् बैदः 'स्वदेहगतम् अग्न्यादिसहितं कोऽन्यो मत्तो वेदितुमर्हति" (इति) वक्ष्यमाणमाह स्म वै । *लट् स्मे । उक्तवान् ।

स्वभ्यासदृष्टऋग्वेदहेमीकृतसुदन्तकः ।
बैद आसीदवोचाम तथैवात्रादितो वयम् ॥

किमुक्तवान्,

॥ न तस्येशे यं मह्यं न दद्युरिति ॥

यमर्थं न प्रयच्छेयुर्मह्यं तं ते न भुञ्जते ।
उभौ विशिष्टपात्रेषु ह्यर्थो भोगाय कल्पते ॥

---

१. 'ति । वै लट् स्मे उक्तवान् ।' घ. २. 'स्वा ' घ.
३. 'होमी ' क. ख. ४. 'ति । मे तत् न प्रच्छोमंह्यं तं ते न भुञ्जते ' घ.

---

* पा० सू० ३. २. ११८.

ओत्(?)। ईशेत। ईशतेः *'लोपस्त आत्मनेपदेषु'।

तत्र को विशेष इत्यत आह—

॥ प्रहितां वा अहमध्यात्मं संयोगं निविष्टं वेद ॥

अहं हि वेद वागादियुक्तं प्राणं स्वदेहगम्।
अग्न्यादिसहितं कोऽन्यो मत्तो वेदितुमर्हति ॥

निविष्टं नियमेन प्रविष्टम्। §'विदो लटो वा' इति मिपो णल्।
(नि?)वेद।

॥ एतद्ध तत् ॥

वेदवाक्यमिति शेषः।

॥ +अनीशानानि ह्वा अस्मै भूतानि बलिं हरन्ति ॥

अनीशानानि अस्वत(यन्त्रा?न्त्रतया) परवशानि। अस्मै वेदित्रे।
बलिमभिमतमुपहारं हरन्ति। अहं हि वेद वागादियुक्तं प्राणयुतं
वस्तु।

॥ य एवं वेद ॥

---

१. 'क्तं प्राणयुतं वस्तु। एतद्ध तत्। अनीशानानि ह्वा अस्मै भूतानि बलिं हरन्ति य एवं वेद अस्मै' ख, 'क्तं प्राणयुतं वस्तु। एतद्ध तत्। अनीशानानि ह वा अस्मै भूतानि बलिं हरन्ति। निविष्टम्। अस्मै वेदित्रे। बलिम् अभिमतमुपसंहरति दद्युः य एवं वेद। तिपो णल्' घ.

---

* पा० सू० ७. १. ४१. § पा० सू० ३. ४. ८३. + 'यः पुमानेवमुक्तप्रकारेणाधिदैवं प्रसृतानामग्न्यादीनाम् अध्यात्मं वागादिरूपेण सङ्कोचमुपास्ते अस्मा उपासकाय सर्वे प्राणिनः स्वयमनीशा उपासकं प्रति गुणभावमुपेताः सन्तो बलिं हरन्ति पूजां समर्पयन्ति' इति सायणः।

निविष्टम् । अस्मै वेदित्रे । बलिम् अभिमतम् । उपसंहर(ति?न्ति) दद्यु(त्?ः) तिपो णल् ।

॥ तत्सत्त्यम् ॥

*तद् ब्रह्म सत्त्यशब्देनोपदिशति ।

कथम्,

॥ सदिति प्राणः ॥

नित्यत्वात् ।

॥ तीत्यन्नम् ॥

दीर्घः छान्दसः ।

द्वौ तकारौ सत्त्यशब्दे †'सच्च त्यच्चाभवत्' श्रुतेः ।
सदा सदिति चिन्त्यत्वात्तकारोऽन्नस्य वाचकः ॥

॥ [1]यमित्यसावादित्यः ॥

सर्वं जगद्यमयति रथं सारथिवद्यतः ।
तस्मादादित्यवाच्येषु[2] यंशब्द इति कथ्यते ॥

॥ तदेतात्त्रिवृत् ॥

त्रिप्रकारयुतं[3] वक्ष्यमाणमाह [4]स्मैं वस्तु त्रिवृत्सत्त्यं तथाभवत् । §'चक्षु-

१. 'समि' ज. २. 'षु' क. ३. 'तं व',
४. 'स्म त्रिवृत्सत्त्यं तथाभवत् । चक्षुर्मि' घ.

* तत्प्राणस्वरूपम् इति सायणः । † तै० उ० २. ६. १.
§ ऋक्सं० १. ११५. १.

मित्रस्य वरुणस्याग्नेः' इत्युक्तस्य चक्षुषो ब्रह्मणः त्रिवृत्त्वं युक्तमित्याह—

॥ त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति ॥

परितः शुक्लतां मध्येमणौ कार्ष्ण्यं कनीनिका ।
तन्मध्ये तारका चेति त्रिवृन्नेत्रं भवत्यपि ॥

त्रिवृत्त्वं स्तौति—

॥ स यदि हवा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत्सत्यस्य सत्यत्वं वेद ॥

स वेदिता । मृषा अनृतम् । अस्य अनेन वेदित्रा । ओव(?) । उदितम् उक्तम् । वदेः क्ते यजादिसम्प्रसारणम् । भवति सम्पद्यते सत्यत्वं त्रिवृत्कृतम् ।

पञ्चमः खण्डः ।

॥ तस्य वाक्तन्तिः ॥

तस्य सत्यस्य ब्रह्मणः । वाक् शब्दराशिः । तन्तिः दीर्घरज्जुः ।

तत्र,

॥ नामानि दामानि ।

नामानि पदानि । दामानि पाशमयानि ।

---

१. 'नामानि पदानी'ति कखपाठयोर्नास्ति ।

॥ तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम् ॥

तत् तत्र । अस्य अनेन ब्रह्मणा । इदं सर्वं जगत् । सितम् । षिञ् बन्धने । बद्धम् ।

॥ सर्वं हीदं नामनी ३ँ ॥

सितमित्येव । अभिपूजिते प्लुतः सानुनासिकः ।

कथम् ?

॥ सर्वं वाचाभिवदति ॥

वाच्यम् ।

॥ *वहन्ति हवा एनं तन्तिसंबद्धा य एवं वेद ॥

एनं वेदितारम् । वहन्ति भजन्ति । तन्तिसंबद्धाः तन्तिसदृश्या वाचा बद्धा अर्थाः ।

॥ तस्योष्णिग्लोमानि ॥

तस्य सत्यस्य वाचा बद्धस्य । लोमानि अङ्गरुहाणि उष्णिक् चतुरुत्तरवृद्ध्युन्मुखत्वात् ।

॥ त्वग्गायत्री ॥

छन्दसामाधारत्वाद् देहस्य लोम्नां त्वगिव ।

---

१. 'नी ३ः' ज. २. 'सर्वानु' क. घ.

---

* 'बलीवर्दा इव वागाख्यतन्तिसंबद्धाः सर्वे प्राणिन एनमुपासकं प्रति वहन्ति पूजाद्रव्यमानयन्ति' इति सायणः ।

॥ त्रिष्टुम्मांसम् ॥

मध्यगतत्वसाम्यात्[1] ।

॥ अनुष्टुप्स्नावानि ॥

वाङ्मये बहुत्वसामान्यात् ।

॥ अस्थि जगती ॥

स्थिरत्वसाम्यात् ।

॥ पङ्क्तिर्मज्जा ॥

अन्नसारत्वाद् अन्नसारत्वेन पङ्क्तेः स्तुतेश्च ।

॥ प्राणो बृहती ॥

मध्यवर्तित्वसाम्यात् ।

॥ स छन्दोभिश्छन्नः ॥

सः वाचा बद्ध ऋङ्मयः प्राणः ।

॥ यच्छन्दोभिश्छन्नस्तस्माच्छन्दांसीत्याचक्षते ॥

यत् यस्मात् । छन्देः करणेऽसुन् ।

॥ छादयन्ति हवा एनं छन्दांसि पापात्कर्मणो यस्यां कस्याञ्चिद्दिशि कामयते य एवमेतच्छन्दसां छन्दस्त्वं वेद ॥

---

१. 'गत्व' ख.

एनं वेदितारम्। पापादिति *'वारणार्थानामीप्सित' इत्यपादानत्वम् ¶यस्यां कस्याञ्चिद्दिशि सर्वतोदिशम्। एनं विशिनष्टि– कामयते। अमर्थे डि। कामेन यतं बद्धम्। अत एव पापकारिणम्।

॥ तदुक्तमृषिणा ।

मन्त्रेण तद्दर्शिना वा दीर्घतमसा।

†अपश्यं गोपां रक्षकम्। पचाद्यचो दीर्घः। अनिपद्यमानं कदाचिदप्यसंविशन्तम्। आ च परा च पथिभिश्चरन्तम् आगतिमुदयं परागतिं निवृत्तिं च पथिभिः नाडीभिः नाभेरूर्ध्वमधश्च कुर्वन्तम्। स प्राणः। सध्रीचीः सहगतियुक्ताः। सविषूचीः नानागतीः। वसानः आच्छादयन्। आ साधु। वरीवर्ति भृशं विवर्तते। भुवनेषु भूम्यादिषु। अन्तः मध्ये इत्यर्थं मत्वा आदायादाय व्याचष्टे—

॥ अपश्यं गोपामिति। एष वै गोपाः ॥

एष प्राणः।

॥ एष हीदं सर्वं गोपायति ॥

‡'गुपूधूपे'त्यायः।

॥ अनिपद्यमानमिति। न ह्येष कदाचन संविशति ॥

प्रवृत्तिशीलत्वात्।

---

१. 'इत्थं मत्वा' क. ख.

---

* पा० सू० वा० १. ४. २७.

¶ स पुमान् यस्यां कस्याञ्चिद्दिशि वर्तमानः किञ्चित्पापं कर्तुं कामयते' इति सायणः। † अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्। स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः॥ (ऋक्सं० १. १६४. ३१.) ‡ पा० सू० ३. १. २८.

॥ आ च परा च पथिभिश्चरन्तमिति । आ च ह्येष परा च पथिभिश्चरति ॥

आगच्छति परागच्छति च पथिभिर्नाडीभिः ।

॥ स सध्रीचीः स विषूचीर्वसान इति । सध्रीचीश्च ह्येष विषूचीश्च वस्त इमा एव दिशः ॥

*'सहस्य सध्रिः' । अञ्चतेर्ङीप् । $'अच' इत्यल्लोपे ‡'चौ' इति दीर्घः । सध्रीच्यो[1] दिशः । विषूच्योऽवान्तरदिशः ।

॥ आवरीवर्ति भुवनेष्वन्तरित्येष ह्यन्तर्भुवनेष्वावरीवर्ति ॥

लोकमध्ये भृशं वर्तते ।

॥ अथो आवृतासोऽवतासो न कर्तृभिरिति ॥

अभ्युक्तमृषिणेति शेषः । अथो अपि च । आवृतासोऽवतासो न कर्तृभिरित्यभ्युक्तम् ऋषिणा मन्त्रेण तद्दर्शिना वा सव्येन ।

£अप्रक्षितेत्यृचः पादस्तृतीयोऽयमुदाहृतः ।

---

१. 'सध्रीचोऽवान्तरदिशः' क., 'सध्रीचो दिशः' ख.

---

* पा० सू० ६. ३. ९५. $ पा० सू० ६. ४. १३८.

‡ पा० सू० ६. ३. १३८. £ अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे । आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥ (ऋक्सं १. ५५. ८.)

अप्रक्षितम् अक्षीणं वसु धनम् । बिभर्षि धारयसि । हस्तयोः अषाह्ळम्[1] अनभिभवनीयम् । सहः बलम् । तन्वि तनौ शरीरे । श्रुतः । श्रुतेः कर्मणि क्विपि तुकि शस् । श्रोतव्यान् ज्ञानादीन् । दधे थास इट्[2] । धारयसि । आवृतासः छादिताः पूरिताः । अवतासः कूपाः । न इव । कर्तृभिस्तनूषु । ते क्रतवः यज्ञैः । हे इन्द्र! भूरयो बहवः । इत्यृगर्थं मत्वा व्याचष्टे—

॥ सर्वं हीदं प्राणेनावृतम् ॥

ब्रह्मादिपिपीलिकान्तं प्राणेन व्याप्तम् ।

*उपपादयति—

॥ सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः ॥

देहान्तर्वर्ती प्राणो बृहती इत्युक्तत्वाद् बृहती प्राणः । $विष्टब्धः व्याप्तः ।

॥ तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्धः एवं सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं विद्यात् ॥

उपासकोऽवगच्छेत् ।

षष्ठः खण्डः ।

---

१. 'ळ्ह' Mss. २. 'थास इट् । धत्से' क, 'धाप इश्शपसे । आवृतासः' घ.

---

* 'गुणान्तरं विधत्ते—' इति सायणः । $ 'विष्टब्धो विशेषेण स्थापित इति ध्यायेत्' इति सायणः ।

अथोक्तप्राणसत्यब्रह्मप्रजापत्यादिशब्दवाच्यस्य *विभूतीराह—

॥ अथातो विभूतयोऽस्य पुरुषस्य ॥

उच्यते । पुरु बहु सनोति व्याप्नोतीति पुरुषो ब्रह्म ।

£'तेनेदं पूर्णं पुरुषेण सर्वम्' ।

इति श्रुतेः ।

॥ तस्य वाचा सृष्टौ पृथिवी चाग्निश्च ॥

मृदङ्गाराभिमानिन्यौ देवते वाक्समुद्भवे ।
पितुर्वाचस्तु शुश्रूषां पृथिव्यग्न्योरथाह वै ॥

कथम्,

॥ अस्यामोषधयो जायन्ते ॥

अस्यां पृथिव्याम् । ओषधयो व्रीह्यादयः ।

॥ अग्निरेनाः स्वदयति ॥

एनाः ओषधीः । स्वदयति पाकेन स्वाद्वीकरोति । पितृभूता वाक् प्रेषयति,

॥ इदमाहरतेदमाहरतेति ॥

---

* 'गुणान्तराणि ध्यातव्यानि प्रतिजानीते-' इति सायणः ।

£ श्वेताश्व० उ० ३. ९.

कति ते पुत्रा इतिवदाहर्त्राहर्तव्यानवधारणात्। यद्वा इदमाहरतेति यथा वक्तुं[1] शक्यते तथाग्निरेनाः स्वादूः करोति।

॥ एवमेतौ वाचं पितरं परिचरतः पृथिवी चाग्निश्च ॥

एवं भोक्तव्यं वस्तु तत्स्वादुत्वञ्च[3] सम्पादयन्तौ एतौ पुत्रौ परिचरतः शुश्रूषेते[4]।

विदुषः फलमाह—

॥ यावदनु पृथिवी यावदन्वग्निस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्च य एवमेतां वाचो विभूतिं वेद ॥

यावदनु यावता कालेन सह (पृथिव्याग्निर्वर्तते? पृथिव्यग्नी वर्तेते) *'तृतीयार्थे' इत्यनोः कर्मप्रवचनीयत्वात् टार्थेऽमो लुक्। तावान् तावत्कालः। अस्य वेदितुः। लोकः सम्पदनुभवयुक्तोऽवकाशो भवति स्यात्। जीर्यते जरां गच्छति। यावत्तावदित्यव्ययम्।

॥ प्राणेन सृष्टावन्तरिक्षञ्च वायुश्च ॥

तस्येत्येव। तस्यास्य पुरुषस्य विभूतिभूतेन प्राणेन[5]। सृष्टाविति,

---

१. 'यथा वक्तुं यथाग्नि' क, 'यथा वक्तुं शक्यं यथाग्निरेनाः' ख.
२. 'स्वादीक' क, 'स्वादीः' ख. ३. 'दुकञ्च' क. ख.
४. 'श्रूषते' क. ख. ५. 'यञ्चास्तः। प्राणेन' क, 'यञ्चाग्निः प्राणेन' ख.

---

* पा० सू० १. ४. ८५

*'पुमान्स्त्रिया'त्येकशेषः पूर्वत्र च परत्र च ।
नपुंसकैकशेषोक्तिरत्र स व्यत्ययेन तु ॥
पितुः प्राणस्य शुश्रूषामाह खानिलयोः पुनः ।

कथम्,

॥ अन्तरिक्षं वा अनुचरन्ति ॥

अवकाशे चेष्टन्ते ।

॥ §अन्तरिक्षमनु शृण्वन्ति ॥

आकाशप्रभवो हि शब्दः ।

॥ वायुरस्मै पुण्यं गन्धमावहति ॥

पुरोडाशाज्यगन्धादि घ्रातमात्राघनाशनम् ।

†आवहिर्दानार्थः ।

॥ एवमेतौ प्राणं पितरं परिचरतोऽन्तरिक्षं च वायुश्च ॥

+'नपुंसकमनपुंसकेन' इत्येतदत्र न भवति छन्दस्त्वात् ।

॥ यावदन्वन्तरिक्षं यावदनु वायुस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यतेऽ-

---

* पा० सू० १: २. ६७. § 'दूरदेशे प्रोक्तां वार्तामपि शृण्वन्ति । नहि मूर्तेन कुड्यपर्वतादिनावरुद्धे देशे सञ्चारो वार्ताश्रवणं वा सम्भवति । सोऽयमन्तरिक्षकृत उपकारः' इति सायणः । † 'वायुश्च चम्पककेतक्यादिगतं पुण्यगन्धमानयति' तदिदं पुण्यगन्धानयनं वायुकृत उपकारः' इति सायणः । + पा० सू० १. २. ६९.

न्तरिक्षस्य च वायोश्च य एवमेतां प्राणस्य विभूतिं वेद ॥

उक्तार्थप्रायम् ।

॥ चक्षुषा सृष्टौ द्यौश्चादित्यश्च। द्यौर्हास्मै वृष्टिमन्नाद्यं सम्प्रयच्छति ॥

असौ चक्षुःपित्रे ।

॥ आदित्योऽस्य ज्योतिः प्रकाशं करोति ॥

ज्योतिः सन् ।

॥ एवमेतौ चक्षुःपितरं परिचरतो द्यौश्चादित्यश्च । यावदनु द्यौर्यावदन्वादित्यस्तावानस्य लोको भवति। नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते दिवश्चादित्यस्य च य एवमेतां चक्षुषो विभूतिं वेद । श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च । दिग्भ्यो हैनमायन्ती[1] ३ँ ॥

आख्याने प्लुतः सानुनासिकः। एनं श्रोत्रं पितरं शब्दा आगच्छन्ति । एनमिति पुल्लिङ्गनिर्देशः पित्रपेक्षः।

व्याचष्टे—

॥ दिग्भ्यो विश्रृणोति ॥

---

१. 'यन्ति' ज, 'यन्ती' झ.　　२. 'एकु श्रो' क ख.

दिग्भ्य आगतान् शब्दान् विशेषेण श्रोत्रं विदित्वा शृणोति ।

॥ चन्द्रमा अस्मै पूर्वपक्षापरपक्षान्विचिनोति पुण्याय कर्मणे ॥

अस्मै श्रोत्रपित्रे । पुण्याय कर्मणे दर्शपूर्णमासादिकाय । तादर्थ्ये ङे । विचिनोति विविच्य स्थापयति ।

॥ एवमेते श्रोत्रं पितरं परिचरान्ति दिशश्च चन्द्रमाश्च । यावदनु दिशो यावदनु चन्द्रमास्तावानस्य लोको भवति । नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यते दिशाञ्च चन्द्रमसश्च य एवमेतां श्रोत्रस्य विभूतिं वेद । मनसा सृष्टा आपश्च वरुणश्च आपो हास्मै श्रद्धां सन्नमन्ते पुण्याय कर्मणे ॥

अस्मै मनःपित्र । श्रद्धामभिनिवेशम् । सन्नमन्ते । सन्नमतिर्दानार्थः । (झर्जस्? झर्झः) पुण्यानुष्ठानाय ।

॥ वरुणोऽस्य प्रजां धर्मेण दाधार ॥

न्यायेन परिपालयति । लटो लिट् । तुजादिदीर्घः ।

॥ एवमेते मनःपितरं परिचरन्त्यापश्च वरुणश्च । यावदन्वापो यावदनु वरुणस्तावानस्य लोको भवति । नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यतेऽपाञ्च वरुणस्य च य एवमेतां मनसो विभूतिं वेद ॥

---

१. 'द ॥ पुमाञ्चि' क.

व्याख्यातम्।

सृष्टावेतौ तथैते चाप्येतेषाञ्च पदेषु तु।
*'पुमान्स्त्रिये'त्येकशेषः शिष्यते न नपुंसकम्॥

आद्या विभूतिर्वाक्प्राणनेत्रश्रोत्रमनोमयी।
पृथिव्यग्निसवाय्वादित्यद्युचन्द्रदिगात्मिका॥

द्वितीयास्य विभूतिः स्यात्महाद्भिर्वरुणेन च।
उक्तो लोकोपकारश्च सम्यगत्र विभूतिभिः॥

सप्तमः खण्डः।

किञ्च,

॥ [1]आपा ३ः इत्याप इति॥

आपेर्लुङि सिपो रुत्वम्लृदित्वादङि वै प्लुतः।
व्याप्नोतीत्यृषिभिः प्रोक्तब्रह्माप्छब्देन कथ्यते॥

॥ तदिदमाप एव॥

तत् तस्माद् इदं ब्रह्म अप्शब्देन वाच्यं भवति। पूजायां जस्।

---

१. ग्रन्थेषु 'किञ्चे'ति खण्डसमाप्तिचिह्नात् पूर्वं दृश्यते।

---

* पा० सू० १.२.६७. ¶ 'पूर्वत्र तस्य वाचा सृष्टौ इत्यादिना पुरुषस्य सृष्टिहेतुत्वं यदुक्तं तदेतन्निमित्तकारणत्वाभिप्रायम्। पुरुषो हि पूर्वस्मिन् जन्मनि ज्ञानकर्मणी अनुष्ठायेदानीन्तनसृष्टेर्निमित्तं भवति। अत्र तु जगत उपादानकारणं विचार्य निर्णीयते। प्लुतिर्विचारार्था। अप्शब्देन पञ्चभूतान्युपलक्ष्यन्ते' इति सायणः।

॥ *इदं वै मूलम् ॥

इदं ब्रह्म जगन्मूलम् ।

॥ अदस्तूलम् ॥

अग्रश्चैतत् ।

स्पष्टयति—

॥ $अयं पिता ॥

वागादिक उक्तः ।

॥ एते पुत्राः ॥

अयमित्येव । पुत्राः पृथिव्यग्न्यादयः । इति मूलमग्रश्च ब्रह्मैवेति व्याप्तेराम नाम च (?)

॥ यत्र ह क्व च पुत्रस्य तत्पितुर्यत्र वा पितुस्तद्वा पुत्रस्येत्येतत्तदुक्तं भवति ॥

---

* 'इदं वै यथोक्तमपशब्दोपलक्षितभूतपञ्चकमेव मूलमुपादानं कारणमदः स्थावरजङ्गमदेहरूपं जगत्तूलं कार्यम् । अतः परस्परैक्यं युक्तम्' इति सायणः ।

$ 'तथा निमित्तकारणभूतोऽयं पुरुषः पिता । एते पृथिव्यग्न्यादिदेवतादेहाः पुत्राः । तयोश्च परस्परं नात्यन्तं भेदः । कथं भेदाभाव इति चेत्तदुच्यते । लोके पुत्रस्य वस्तु यत्र ह क्व यस्मिन्कस्मिन्नपि ग्रामान्तरे विद्यमानं तत्सर्वं स्वं भवति । पिता हि तदानीयानुभवति । अथवा पितुः सम्बन्धि यद्वस्तु ग्रामान्तरे विद्यते तद्वा तदपि पुत्रस्य स्वं भवत्येव । पुत्रोऽपि तदानीयानुभवति । भूतपञ्चकस्य पृथिव्यादिदेवतादेहानाञ्च कार्यकारणरूपेण यदैक्यमुपासकपुरुषस्य पितृरूपस्य पुत्ररूपाणां देवतात्मनाञ्च यदैक्यं तदुभयं प्राणगुणत्वेन ध्येयमित्यर्थः' इति 'अयं पिते'त्यारभ्य 'भवति' इत्यन्तस्य सायणव्याख्या ।

तत् तत्र । वेति चार्थे ।

यत्र पुत्रस्य सम्बन्धस्तत्रास्त्येव पितुः स च ॥
इति वागादिभूम्यादिगणौ ब्रह्मैव तथ्यतः ॥
कार्यकारणयोरैक्यं लोकेषु प्रथितं खलु ।

॥ एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः ॥
[1]

ऋषिर्द्रष्टा स्वमात्मानं परोक्षेणाह चान्यवत् ।
एतज्जानाम्यहं नान्य इत्यात्मानं विभावयन् ॥
इतराख्यास्य माताभूत् स्त्रीभ्यो ढक्यैतरेयगीः ।
महिदासो महीदत्तमहासनसमासनात् ॥
अत्रोचाम ब्राह्मणादौ महिदासेतिहासकम् ।

एतत् कार्यकारणैक्यम् ।

कथम्,

॥ *आहं मां देवेभ्यो वेद ओ मद्देवान्वेदेतःप्रदाना ह्येत इतः संभृता इति ॥

आ आगतम् । आहं मां देवेभ्यो वेद । ओं[2] तथा । ओ आङ

---

१. 'क्ष्ये' क. २. 'आन्तथा' ख.

---

* 'मामहमादेवेभ्यो वेद । आकारो नियतोऽभिविधौ वर्तते । देवैः सहितं तदभिन्नं मत्स्वरूपमहं वेदोपासे । ओ मदित्यत्राकार उकारश्चेति पदद्वयम् । देवानु देवानपि सर्वान् मद्वेद मया सहितानेकत्वेनोपासे । न च पुरुषस्य मम देवसाहित्यमयुक्तमिति शङ्कनीयम् । एते देवा इतःप्रदाना हि । इतोऽस्माल्लोकात्पुरोडाशादि प्रदानं येषां त इतःप्रदानाः । तस्मादेव कारणादितः संभृता एतल्लोकप्रस्ताद्धविषः सम्यक्पोषिताः । तेनोपासकस्य देवैः साहित्यं युक्तमित्येवं महर्षिरुवाच ' इति सायणः ।

उआ सह *'आद्गुणः'। आ आगतान्[1]। उ च। आ ओ इत्यसिद्धिः छान्दसः अप्रगृह्यत्वात्। मत् मत्तः प्राणाद् देवाँश्चागतान्वेद वेद्मि। इतः प्राणात् प्रदानाः समुद्गता ह्येते देवाः। व्याचष्टे– इतः संभृता इति[2]। संभृताः पुष्टाः।

मत्तो देवास्ततश्चाहं तेषामैक्यं ममैव च।
एते देवा इतः प्राणात् प्रदाना हि समुद्गताः॥
ल्युड् दाञः कर्तरि तथा भृताः[3] पोषसमन्विताः।

॥ $स एष गिरिश्चक्षुः श्रोत्रं मनो वाक्प्राणः॥

एष इन्द्रियग्रामः। रत्नपर्वत इव चित्रः।

॥ तं ब्रह्मगिरिरित्याचक्षते॥

ब्रह्माधिष्ठितत्वात्।

॥ गिरति ह वै द्विषन्तं पाप्मानं भ्रातृव्यं परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद॥

स वेदिता पापं गिरति विनाशयति। अस्य विद्वन्पराभवति।

---

१. 'त् ओ उच्। आ' क. २. 'ति पुष्टाः' क. घ.
३. 'एताः पोषाम' क.

---

* पा० सू० ६. १. ८७. $ 'योऽयं चक्षुरादीन्द्रियसमूहः स एष प्राणदेवतायाः गिरणाद्गिरिरित्युच्यते। यथा निगीर्णमन्नादिकं बहिर्नोपलभ्यते तथेयं प्राणदेवता चक्षुरादीन्द्रियैर्निगीर्णेव तिरोहिता सती लौकिकैर्नोपलभ्यते। यस्मादेवं तस्मात्तं चक्षुरादीन्द्रियसंघातं ब्रह्मगिरिरित्येवमभिज्ञा आचक्षते। प्राणरूपस्य ब्रह्मणो निगरणतिरोधानाद् ब्रह्मगिरित्वम्' इति सायणः।

*॥ स एषोऽसुः ॥

दुःखं निरस्यतीत्येव असुरेष उदस्यतेः ।

॥ ¶स एष प्राणः ॥

पञ्चवृत्तिवाग्व्यधिष्ठातृत्वात् ।

॥ †स एष भूतिश्चाभूतिश्च ॥

ब्रह्मभूतिर्भवन्तोऽत्र समृद्धाः स्युर्यतः खलु ।
अभूतिश्च नास्तिकानां सम्पन्नाशकरं यतः ॥

॥ तं भूतिरिति देवा उपासाञ्चक्रिरे ॥

§'दयायासश्च' इत्याम् ।

॥ ते बभूवुः ॥

समृद्धा अभूवन् ।

भू (मि१ति)तुल्यध्वनि (र१ना) सुप्तघोत्कारेण भूत्युपासनानुवादमाह—

॥ तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसिति ॥

१. 'भूरित्येव' ट.

* 'योऽयमुपास्यो देवः स एष देहेन्द्रियादिसंघातमस्यति क्षिपति प्रेरयतीत्यसुः' इति सायणः ¶ 'प्रकर्षेणानिति स्वयं चेष्टत इति प्राण' इति सायणः। † 'एतस्या देवतायाः शरीरेऽवस्थाने सति जीवात्मापि तत्र भवत्यवतिष्ठते। तस्माज्जीवात्मसद्भावहेतुत्वाद् भूतिरित्युच्यते। प्राणदेवताया निर्गमने सत्यत्र जीवात्मा न भवति नावतिष्ठते। तस्मादभूतिरित्युच्यते' इति सायणः। § पा० सू० ३. १. ३७.

तस्माद्भूतित्वादेव । एतर्हि अस्मिन्नपि काले । श्वसिति । *'रुदादिभ्यः सार्वधातुके' इतीट् । प्रश्वासो घोत्कारः ।

॥ †अभूतिरित्यसुराः ॥

उपासाञ्चक्रिरे इत्येव । उपास्तिरत्रोपेक्षा । भूतिहेतुत्वमस्य नेति मन्यन्ते स्मेत्यर्थः ।

॥ ते ह पराबभूवुः ॥

ह प(?असु)राः ।

॥ £भवत्यात्मना परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ॥

वर्तते स्वयमित्यर्थे निपातस्त्वात्मनेत्ययम् ।

॥ स एष मृत्युश्चैवामृतञ्च ॥

§देहांशश्च मृत्युरेष तत्र तिष्ठंस्तथामृतम् ।

॥ तदुक्तमृषिणा ॥

---

१. 'भूवुः ॥ भव' ख.

---

* पा० सू० ७. २. ७६. † 'प्राणनिर्गमनेन जीवस्यात्र योऽयमभावः सोऽयमभूतिशब्देनोच्यते । तद्गुणकं प्राणमुपास्यासुराः पराभूता विनष्टाः' इति सायणः । £ 'अयं प्राणदेवः स्वस्य सद्भावहेतुर्वैरिणामभावहेतुरित्येवं यः पुमानुपास्ते सः पुमानात्मना भवति स्वयं चिरजीवी भवति । शत्रुश्च पराभवति ।' इति सायणः । § 'स्वनिर्गमनेन देहमरणात्प्राणस्य मृत्युत्वम् । स्वावस्थानेन देहमरणाभावादमृत्युत्वम्' इति सायणः ।

मन्त्रेण तद्दर्शिना वा दीर्घतमसा ।

आदायादाय व्याचष्टे—

॥ *अपाङ् प्राङेति स्वधया गृभीत इत्यपानेन ह्ययं यतः प्राणो न पराङ्भवति ॥

निर्गच्छन्तं प्राणवायुं विशन्नन्तःसमीरणः ।
देहे बध्नाति तेनैष पराङ् भवति न द्रुतम् ॥

यतः । यमु बन्धने । क्तः । बद्धः ।

अमर्त्यो मर्त्येना सयोनिरि[§]त्येतेन हीदं सर्वं सयोनि ॥

योनिः प्रकाशः देहाङ्गश्च[1] ।

॥ मर्त्यानि हीमानि शरीराणी३[2] ॥

आख्याने प्लुतः सानुनासिकः ।

उत्पन्नानि शरीराणि म्रियन्ते बहुशो यतः ।

---

१. 'देहाङ्गश्चे'ति खघपाठयोर्नास्ति ।   २. 'राणि' ज, झ , 'राणी३ँम्' ट.

---

* अपाङ्प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य १ न्यं चिक्युर्न निचिक्युरन्यम् ॥ (ऋक्सं० १. १६४. ३८.)   † 'यतो यस्मात्कारणा(द्वा?द)यं प्राणोऽपानेनाधोवृत्तिव्यापारेणान्तराकृष्टः सन्पराङ् बहिर्गतो न भवति ।' इति सायणः ।
§ 'एतेन प्राणेन स्हेदं सर्वं शरीरजातं समानस्थानकमित्येतत्प्रसिद्धम् । शरीराणि मर्त्यानीत्येतदत्यन्तं प्रसिद्धमिति द्योतयितुं हिशब्दः प्लुतिश्च' इति सायणः ।

॥ अमृतैषा देवता ॥

नित्या प्राणाख्या ।

॥ *ता शश्वन्ता विषूचीना वियन्ता न्यन्यं चिक्युर्न निचिक्युरन्यमिति निचिन्वन्ति हैवेमानि शरीराणी३ँ[2] ॥

पूर्ववत्प्लुतः सानुनासिकः । निचिन्वन्ति धनैर्वर्धयन्ति ।

॥ अमृतैवैषा देवता ॥

एव पुनः । स्वयमेव पुष्टा ।

॥ +अमृतो ह वा अमुष्मिँल्लोके सम्भवत्यमृतः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद य एवं वेद ॥

अमुष्मिन् परत्र । सर्वेभ्यो भूतेभ्यः । भिसो भ्यस् । सर्वैः भूतैः । ददृशे । कर्मणि[3] लिङो लिट् । दृश्येत । द्विरुक्तिरुक्तार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायामात्मोपनिषदि
प्रथमोऽध्यायः ॥

---

१. 'न्य १ न्यं' आनन्दाश्रममुद्रितपाठः । २. 'णीति अमृ' ट.
३. 'णि लिट् द' घ.

---

* 'शरीराणामन्नादिना वृद्धिरत्यन्तप्रसिद्धा । प्राणदेवता त्वमृतैव । ननु जन्मवृद्ध्यादिविकारस्तस्यास्ति ।' इति सायणः । + 'उपासकः स्वर्गलोके हिरण्यगर्भत्वं प्राप्य मरणरहितो भवति । ततः सर्वप्राण्युपकारार्थमादित्यमण्डले सर्वैर्दृश्यमानो भवति ।' इति सायणः ।

प्राणस्य ब्रह्मणः पूर्वं सर्वात्मत्वं प्रदर्शितम् ।
अथर्षिसूक्तगर्धर्चपादाक्षरतुलाकृतम् ॥

प्रदर्श्यते निरुक्त्यात्र तस्यास्तित्वप्रसिद्धये ।
शाकल्यस्य संहितैका बाष्कलस्य तथापरा ॥

तयोरेकैकशः सन्ति मण्डलानि दशैव तु ।
शतर्चिसंज्ञा विज्ञेयास्तत्राद्यमण्डलदर्शिनः ॥

क्षुद्रसूक्ता महासूक्ताश्चान्त्यमण्डलदर्शिनः ।
नवमान्तद्वितीयादिदर्शिनो माध्यमा मताः ॥

मण्डलस्य द्वितीयस्य द्रष्टा गृत्समदस्त्वृषिः ।
विश्वामित्रस्तृतीयस्य वामदेवश्चतुर्थदृक् ॥

पञ्चमं त्वत्रयः षष्ठं भरद्वाजो ददर्श ह ।
वसिष्ठस्सप्तममथ प्रगाथाद्यास्तथाष्टमम् ॥

नवमे मण्डलेऽधीताः पावमान्य ऋचो मताः ।
सूक्तगर्धर्चपदकमक्षरं चेति यानि वै ॥

दश सप्त च नामानि ब्रह्मण्येव निराह ह ।

॥ *एष इमं लोकमभ्यार्चत्पुरुषरूपेण य एष तपति ॥

---

१. 'तस्यास्तिप्र' क., 'तस्यैवास्तित्वप्र' ख., 'तस्योस्तिप्र' घ.
२. 'मध्य' क. ३. 'गृत्स' Mss. ४. 'मं तद्वत्प्र' ख.

---

* 'उक्थे ध्यातव्यस्य प्राणस्य परस्परविलक्षणा बहव उपास्यगुणाः प्रथमेऽध्याये दर्शिताः । द्वितीये तु प्रथममण्डलद्रष्टृमुनिरूपत्वादयो बहवो गुणा वक्तव्याः । तत्रैकं गुणं विधत्ते - य एष आदित्यो मण्डले तपति स एष पुरुषरूपेणोपासकजीवरूपेणेमं लोकमवलोक्यमानमिममुपासकदेहमभ्यार्चत् स्वप्रवेशेनाभितोऽर्चनीयमकरोत् । पुरुषरूपाभावे हि शवरूपो देहोऽयमपूज्यः स्यात्' इति सायणः ।

इमं लोकं लोक्यत इति लोकं द्रष्टव्यं शरीरसन्निवेशम् । आर्चत् आविशत् ।

॥ प्राणो वाव तदभ्यार्चत् ॥

तत् तत्र । आदित्य एव प्राण इत्यर्थः ।

तदाह—

॥ प्राणो ह्येष य एष तपति । तं शतं वर्षाण्यभ्यार्चत् ॥

तं लोकं देहम् । शतं वर्षाणीत्यत्यन्तसंयोगे द्वितीया ।

॥ तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति ॥

पुरुषायुषस्य वर्षाणि शतं संख्यानीत्यर्थः ।

॥ *तं यच्छतं वर्षाण्यभ्यार्चत्तस्माच्छतर्चिनः ॥

ऋचां शतं शतर्चम् । राजदन्तादि । §'ऋक्पू'रित्यकारः । अत इनेर्जस् । ऋषयो मधुच्छन्दादयोऽगस्त्यान्ताः । यत् यस्मात् तस्मात् ।

॥ †तस्माच्छतर्चिन इत्याचक्षत एतमेव सन्तम् ॥

तस्माद् ब्रह्मणस्तदात्मकत्वात् । सन्तं महान्तं, पूजितं वा । ब्रह्मवादिनः ।

---

* 'यस्मादयं प्राणस्तं मनुष्यदेहं वर्षशतमर्चितवांस्तस्मात्तथैव व्युत्पत्त्या प्राणस्यावतारभूताः प्रथममण्डलद्रष्टारो मुनयः शतर्चिसंज्ञकाः सम्पन्नाः' इति सायणः । § पा० सू० ५. ४. ७४. † यस्मात्प्राणनिष्पादितार्चनवशाच्छतर्चिनामका मुनयस्तस्मात्तदुपासका एतमेव प्राणरूपं सन्तं शतर्चिनामका मुनय इत्याचक्षते । प्राणस्य तन्मुनिरूपत्वं ध्यायेदित्यर्थः' इति सायणः ।

॥ स इदं सर्वं मध्यतो दधे यदिदं किञ्च ॥

इदं सर्वमित्येतद् व्याचष्टे– यदिदं किञ्चेति । मध्यतो वाच्यत्वेन प्रविश्य वाङ्मयं दधे धृतवान् ।

॥ *[1]स यदिदं सर्वं मध्यतो दधे यदिदं किञ्च तस्मान्माध्यमाः ॥

यत् यस्मात् । ऋषयो द्वितीयादिनवमान्ताः—

मध्यमा मध्यमस्त्वत्र भवार्थेऽ[2]ण्यत्र माध्यमाः ।

॥ तस्मान्माध्यमा इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ §प्राणो वै गृ[3]त्सोऽपानो मदः ॥

गृ शब्दे । सः स्वप्ने गृणत् सन्ति, घोत्कृतिकृत् स्वपितीति हि गृत्समदः । मदी हर्षे ।

प्राणोऽस्य बाह्यग्रसनान्मनोऽपानश्च कथ्यते ।

॥ स यत्प्राणो गृत्सोऽपानो मदस्तस्माद्गृत्समद[4]ः ॥

---

१. 'स इदं' ट. २. 'ऽन्यत्र' घ. ३. 'गृत्स इत्यस्य स्थाने सर्वत्र क. ख. घ. छ. ज झ. ञ. ट. त. एषु पाठेषु गृथ्स' इति दृश्यते । ४. दः ॥ 'तस्माद्गृ......सन्तम् ॥ द्वितीयमण्डलदर्शी प्राणापानजयात् । ॥ तस्येदं' क.

---

* 'प्राणदेवो यत्किञ्चिद्देहजातमस्ति तदिदं सर्वं स्वयं मध्यतोऽवस्थाय धारितवांस्तस्मात्प्राणावतारविशेषाः केचिदृषयो माध्यमनामकाः सम्पन्नाः। तद्रूपत्वं प्राणस्य ध्यायेत्'। इति सायणः । § 'यः प्राणोऽस्ति स एव स्वापकाले वागादीनां निगरणात् गृत्स इत्युच्यते । अपानश्च रेतोविसर्गकारकमदहेतुत्वान्मद इत्युच्यते । तदुभयावतारो मुनिर्गृत्समदनामक' इति सायणः ।

द्वितीयमण्डलदर्शी, प्राणापानजयात् ।

॥ तस्मात् गृत्समद इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ तस्येदं विश्वं मित्रमासीद्यदिदं किञ्च ॥

स्निग्धः सुहृन्मित्रम् ।

॥ तद्यदस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तस्माद्विश्वामित्रः ॥

तत् तत्र । *'मित्रे चर्षा'विति दीर्घः । तृतीयमण्डलदर्शी ।

॥ तस्माद्विश्वामित्र इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ तं देवा अब्रुवन्नयं वै नस्सर्वेषां वाम इति ॥

देवाः वागाद्याः । $वामस्सुन्दरः ।

॥ तं यद्देवा अब्रुवन्नयं वै नस्सर्वेषां वाम इति तस्माद्वामदेवः ॥

चतुर्थमण्डलदृक् ।

---

१. 'वः तस्माद्वा' ...... एतमेव सन्तम् ॥ चतुर्थमण्डलदृक् । पूर्ववत् ॥ स इदं, क.

---

* पा० सू० ६. ३. १३० $ 'वामो वननीयो भजनीय' इति सायणः ।

॥ तस्माद्वामदेव इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ स इदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्च ॥

पापादरक्षत् ।

॥ स यदिदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्चं तस्मादत्रयः ॥

पञ्चममण्डलदर्शिनः । पूजायां जस् ।

अदेस्त्रिरित्यत्रिशब्दो...त्रै(ञो ः ङो) लङि निरुच्यते ।

॥ तस्मादत्रय इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

प्रथमः खण्डः ।

॥ एष उ एव बिभ्रद्वाजः ॥

उक्तार्थे शतृ । भृतवाजः ।

॥ प्रजा वै वाजः ॥

वजेर्घञ्कर्मणि प्राप्याः प्रजा वंशसमृद्धये ॥

---

1. 'अ ॥ पञ्चममण्डलदार्शिनः । पूजायां जस् । अदेरित...... ॥ तस्मादत्रयः' ॥ क.

॥ ता एष बिभर्ति[1] ॥

बिभर्ति धारयति ।

॥ यद्बिभर्ति तस्माद्भरद्वाजः ॥

षष्ठमण्डलदर्शी ।

॥ तस्माद्भरद्वाज इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ *तं देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तस्माद्वसिष्ठः ॥

सप्तममण्डलदर्शी ।

॥ तस्माद्वसिष्ठ इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ †स इदं सर्वमभिप्रागाद्यदिदं किञ्च ॥

अभि प्रति प्रागादिदं सर्वम् ।

---

१. 'र्ति ॥ तस्माद्भ' ट.

---

* 'अयमेव प्राणोऽस्माकं सर्वेषां स्वप्रवेशेनात्यन्तं निवासहेतुः सन्वसिष्ठ इति च देवा अब्रुवन्' । इति सायणः । † 'स प्राण इदं सर्वं शरीरजातं स्वानुप्रवेशेनाभिप्रागात्सर्वतः प्रगतवांस्तस्मात्प्राणदेवताया मूर्तिविशेषप्रतिपादका ऋग्द्वयात्मकसूक्तरूपा मन्त्रविशेषाः प्रगाथा इत्युच्यन्ते । तन्मन्त्रद्रष्टारो महर्षयोऽपि प्रगाथनामकाः' इति सायणः ।

*'इणो गा लुङि' †'गाति(स्थाति?स्थे')ति) सिचो लुगङितश्च तिप्।

॥ स यदिदं सर्वमभिप्रागायद्यदिदं किञ्च तस्मात्प्रगाथाः ॥

अष्टममण्डलदर्शी। आ(ऋ)र्षिणा प्रगाथेन साहचर्यात्प्रगाथाः।

॥ तस्मात्प्रगाथा इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत्।

॥ स इदं सर्वमभ्यपवयत यदिदं किञ्च ॥

पूङो णिच्यव शप् ताट् च गुणोऽय यणभेरथ।

॥ स यदिदं सर्वमभ्यपवयत यदिदं किञ्च
तस्मात्पावमान्यः ॥

§'पूङ्यजोः शानन्'‡'आने मुक्' पवमानोऽप्यणस्तु ङीप्।
नवमे मण्डलेऽधीताः पावमान्य ऋचो मताः ॥

गायत्र्य आदितस्ताश्च जगत्यस्तु ततश्शुभाः।
मधुच्छन्दःप्रभृतयो नवमस्थानकीर्तिताः ॥

॥ तस्मात्पावमान्य इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत्।

---

* पा० सू० २. ४. ४५. † पा० सू० २. ४. ७७.
§ पा० सू० ३. २. १२८. ‡ पा० सू० ७. २. ८२.

॥ सोऽब्रवीदहमिदं सर्वमसानि यच्च क्षुद्रं यच्च महदिति ॥

असानि भवानि ।

लोट् लटो *'मेर्नि'राट् पित्वान्न श्नसोरच्छपश्च लुक् ।
तदा यत्प्रत्यपादीत्स प्राणस्तमभितः स्थिताः –

॥ ‡ते क्षुद्रसूक्ताश्चाभवन्महासूक्ताश्च तस्मात्क्षुद्रसूक्ताः ॥

तस्मात्क्षुद्रसूक्ता इति महासूक्तानामप्युपलक्षणम् ।

क्षुद्रमान्ता¶'नासदासी'त्सूक्तादस्य पुरो महत् ।

॥ तस्मात्क्षुद्रसूक्ता इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ सूक्तं बतावोचतेति तत्सूक्तमभवत् ॥

† 'अग्निमीळा'दि यत्सूक्तं प्रोक्तं श्रुत्वा तु तत्पुनः ।
मधुच्छन्द(ः)प्रभृतिकानृषीन्संवननान्तकान् ॥

हृष्टप्राण उवाचेदं सूक्तं सम्यगवोचत ।
वचेर्लुङ् 'Fस्यती'त्यङ् च्लेर्वच उम्या d'द्गुणस्ततः' ॥

---

१ 'स्थत' Mss.

---

* पा० सू० ३. ४. ८९. ‡ 'लोके क्षुद्रं पिपीलिकादिरूपं यदस्ति महच्च गजाश्वादिरूपं यदस्ति तत्सर्वमहमेव भवानीत्येवं स प्राणदेवः कदाचिदब्रवीदतस्तत्प्राणप्रतिपादकमन्त्रसंघाः क्षुद्रसूक्तमहासूक्तनामानोऽभवन्' इति सायणः । ¶ ऋक्सं० १०. १२९. १. † ऋक्सं० १. १. १.
F पा० सू० ३. १. ५२. d पा० सू० ६. १. ८७.

सूक्ताख्यसंहितायान्तु सूक्तानि सहस्रं दश सप्त च ।
शाकल्यस्य बाष्कलस्य त्वतोऽष्टावधिकानि हि ॥

॥ तस्मात्सूक्तमित्याचक्षत एतमेव सन्तम् ॥

उक्तार्थम् ।

॥ *एष वा ऋगेष ह्येभ्यः सर्वेभ्यो भूतेभ्योऽर्चत ॥

भिसां भ्यसो यकश्शाम्राडेभिरस्तूयत ह्यसौ ।

॥ स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत तस्मादृक् ॥

ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिः पादश्च खिलहीना ऋचस्त्विमाः ॥

॥ तस्मादृगित्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ $एष वार्धर्च एष ह्येभ्यः सर्वेभ्योऽर्धेभ्योऽर्चत ॥

अर्धमिति स्थाननाम । सुपो भ्यास्त्रिकम् । एषु स्थानेष्वस्तूयत ।

---

* 'योऽयं प्राणदेवोऽस्त्येष एवर्क्शब्देनाभिधीयते । यस्मादेष प्राणः सर्वभूतार्थं तं तं देहमर्चत स्वप्रवेशेन पूजितमकरोत्तस्मात्प्राणप्रतिपादको मन्त्रस्तद्द्रष्टा चर्क्शब्देनाभिधीयते ' इति सायणः । $ 'ऋचो भागोऽर्धर्चः । सोऽप्येष प्राण एव । अर्धर्चशब्दः स्थानवाची । देवमनुष्यादीनां लोकविशेषरूपाणि यानि स्थानानि सर्वाणि तदर्थमयं प्राणोऽर्चत । तत्स्थानवासिप्राणिजातं पूजितमकरोत्तस्मात्तादृशप्राणमहिमवाची मन्त्रभागस्तद्द्रष्टा चार्धर्चशब्देनोच्यते ' इति सायणः ।

॥ स यदेभ्यस्सर्वेभ्योऽर्धर्चेभ्योऽर्चत तस्मादर्धर्चः ॥

अर्धर्चानां सहस्राणामेकविंशतिकं तथा ।
शतद्वयं तु द्वात्रिंशत्सपादं च खिलैर्विना ॥

॥ तस्मादर्धर्च इत्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ एष वै पदम् ॥

पदेः कर्तर्यप् ।

कथम्,

॥ एष हीमानि सर्वाणि भूतानि पादि ॥

*'चिण् ते पदः' । अण्न[1] । अपादि प्राप्तवान् ।

॥ स यदिमानि सर्वाणि भूतानि पादि तस्मात्पदम् ॥

शाकल्यदृष्टे पदलक्षमेकं सार्धञ्च वेदे त्रिसहस्रयुक्तम् ।
शतानि चाष्टौ दशकद्वयञ्च पदानि षट् चेति ह वै वदन्ति ॥

॥ तस्मात्पदमित्याचक्षत एतमेव सन्तम् ॥

पूर्ववत् ।

॥ एष वा अक्षरम् ॥

---

1. 'अनट्' ख. घ.

---

* पा० सू० ३. १. ६०.

कथम्,

॥ एष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति[1] ॥

दानार्थं क्षरति ह्येष सर्वेभ्योऽभिमतप्रदः।
न चैनं समतिक्रम्य केचिद्दातुमिहेशते ॥

॥ स यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति *न चैनमति-
क्षरन्ति तस्मादक्षरम् ॥

अक्षराणि चतुर्लक्षं सद्वात्रिंशत्सहस्रकम्।

॥ तस्मादक्षरमित्याचक्षत एतमेव सन्तम ॥

बह्वृचाचार्या एवमाहुः।

निगमयति—

॥ ता वा एतास्सर्वा ऋचः सर्वे वेदास्सर्वे घोषा
एकैव व्याहृतिः प्राण एव ॥

[2]ऋग्वेदस्था या ऋचः स्युः सर्वे वेदाश्च ये पुनः।
घोषा वाचश्च याः काश्चि[3]त्सर्वो ब्राह्मणविस्तरः ॥

धात्वर्थवर्णसाम्येन ह्यत्र निर्वचनं त्वभूत्।

---

१. 'ति' ज. ट. २. 'ऋग्वेदा या ऋचा स्युः' क. घ.
३. 'श्चित्स सर्वो ब्रह्मविस्तरः' घ.

---

* 'न खलु प्राणरहितः शवदेहोऽन्यस्मै शवदेहाय यत्किञ्चिद्रत्नादिकं दातुं प्रभवति। अतोऽयं प्राणमतिलङ्घ्य क्षरणं नास्ति। तस्य प्राणस्य वाचकं वर्णजातं तद्द्रष्टा वा अक्षरशब्देनोच्यते। तदेवं सर्वमन्त्रसर्वमहर्षिस्वरूपत्वं प्राणस्य ध्येयमिति तात्पर्यार्थः' इति सायणः।

व्याहृतिरुक्तिरित्यर्थः ।

॥ प्राण ऋच इत्येव विद्यात् ॥

ऋक्संबन्धि यदष्यादि स सर्वः प्राण एव हि ।
एवं श्रद्धान्वितो विद्यादुपासक इतीर्यते ॥

एवं प्राणः सर्वरूप उक्तोऽशीतित्रये पुनः ।

द्वितीयः खण्डः ।

अन्नदृष्टिं संविधातुं कथामैन्द्रीमथाह ह ।

॥ विश्वामित्रं ह्येतदहः शंसिष्यन्तमिन्द्र उपनिषससाद ॥

अन्नकाम इति शेषः ।

महर्षेः कस्यचिद्यज्ञे वर्तमाने महाव्रते ।
शंसिष्यन्तं तृचाशीतिं विश्वामित्रं शतक्रतुः ॥

होतारं ब्राह्मणो भूत्वाथाभ्येत्यान्नमयाचत ।
सदेर्लिट् छान्दसं त्रित्वं षत्वन्तु *'सादिरप्रतेः' ॥

न ह्यभ्यासाच्च षत्वं स्यात्सदिस्वञ्ज्योः परस्य न ।
तिपो णलुपधावृद्धि $'हलादिः शेष' एव च ॥

---

१. 'त्रीत्वं' क. घ.

---

* पा० सू० ८. ३. ६६. $ पा० सू० ७. ४. ६०.

[1]स ज्ञात्वा ज्ञानदृष्ट्यैन्द्रं ददाम्यन्नं शुभं महत् ।
त्रिचाशीत्याख्योक्थमिति ध्यात्वोवाच ददामि ते ॥

इहास्यतामिति प्रोच्य तृचाशीतिं शशंस ह ।

तदाह—

॥ स हान्नमित्यभिव्याहृत्य बृहतीसहस्रं शशंस ॥

नानाच्छन्दोरूपमपि बृहतीसम्पदा युतम् ।
निष्केवल्यं महच्छस्त्रं तृचाशीतिं तदंशकम् ॥

शशंस विश्वामित्रोऽत्र त्वभेदोंशस्य(चासि? चांशि) नः ।
अशीतिष्वेवान्नदृष्टिविधानाद्बहुशः पुनः ॥

अभिव्याहृत्योक्त्वा ।

॥ तेनेन्द्रस्य प्रियं धामोपेयाय ॥

तेन आद्यगायत्रतृचाशीतिशंसनेन । धाम स्थानम् ।

इणो [2]लिटि तिपो णल् द्वे वृद्धिराय ततस्त्वयङ् ।
*'अभ्यासस्यासवर्णे' ति त्वियायपदनिर्वचः ॥

॥ तमिन्द्र उवाच ॥

ब्राह्मणरूपी ।

---

१. 'स ज्ञात्वा ज्ञानदृष्ट्यैन्द्रं' क. 'संज्ञात्वा ज्ञानदृष्ट्यैन्द्रं' घ.
२. 'लिट् स्ति' क. 'लिम ति' घ.

---

* पा० सू० ६. ४. ७८.

कथम्,

॥ ऋषे प्रियं वै मे धामोपागाः स वा ऋषे
द्वितीयं शंसेति ॥

[1]ब्रह्मन्नैन्द्रं गुणं प्रागाद्द्वितीयं शंस तत्पुनः।
*'इणो गा लुङि' +'गातिस्था' सिचो लुक्याङि†'तश्च' सिप् ॥

॥ स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस ॥

बार्हतीं तृचाशीतिम्।

॥ तेनेन्द्रस्य प्रियं धामोपेयाय। तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे तृतीयं शंसेति। स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस ॥

औष्णिहीं तृचाशीतिम्।

॥ तेनेन्द्रस्य प्रियं धामोपेयाय। तमिन्द्र उवाच ऋषे
प्रियं वै मे धामोपागा वरं ते ददामीति ॥

तद्वृणीष्वेति शेषः।

॥ स होवाच त्वामेव जानीयामिति ॥

सः विश्वामित्रः।

---

१. 'ब्रह्मणेन्द्रं गु' क.

---

* पा० सू० २. ४. ४५. + पा० सू० २. ४. ७७.
† पा० सू० ३. ४. १००

इदानीमिन्द्ररूपेण स्थितं त्वां परमार्थतः ।
ज्ञातुमिच्छामि साक्षात्तु तन्ममोपदिश प्रभो ॥

॥ तमिन्द्र उवाच ॥

कथम्,

॥ प्राणो वा अहमस्म्यृषे ॥

प्रणयतीति प्राणः ।

॥ प्राणस्त्वं प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति । स एतेन रूपेण सर्वा दिशो विष्टोऽस्मि ॥

एतेन आदित्यरूपेण वपुषा । विष्टः प्रविष्टः ।

॥ तस्य मेऽन्नं मित्रं *दक्षिणम् ॥

तस्य मे सर्वा दिशः प्रविष्टस्य मम । मित्रं प्रियकरम् ।

दक्ष उत्साह इत्यस्मादिनस्तद्धि बलप्रदम् ।

॥ §तद्वैश्वामित्रम् ॥

विश्वस्मिन्नागतं मित्ररूपेणेत्यात्त्वमणतथा ।
विश्वामित्रं तु तज्ज्ञानं यदुक्तं ते मया मुने ॥

---

* 'दक्ष वृद्धौ इति धातुः । अभिवृद्धिहेतुत्वाद्दक्षिणत्वम्' इति सायणः ।

§ 'विश्वामित्रेण शंसनकाले सम्पादितत्वादिदं वैश्वामित्रम्' इति सायणः ।

किं बहुना—

॥ एष तपन्नेवास्मि[1] ॥

योऽसौ साक्षात्कृतस्सर्वैस्तपत्यास्थाय मण्डलम् ।
तं प्राणं त्वमृषे विद्धि ब्रह्मेदममृतन्त्विदम् ॥

निगमयति—

॥ इति[2] होवाच ॥

तृतीयः खण्डः ।

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम् ॥

तत् तत्र निष्केवल्ये । बृहतीसहस्रं सम्पन्नं हि भवति ।

बृहतीनाञ्च सम्पत्तिश्चतुर्थे वक्ष्यते सुखम् ।
छन्दांसि नानारूपाणि सम्पदा बृहतीस्तु ताः ॥

कृत्वा महाव्रते शस्त्रे निष्केवल्यं प्रकल्पितम् ।
बृहतीनां सहस्रेण यद्वै तत्रेदमुच्यते ॥

॥ तस्य यानि व्यञ्जनानि तच्छरीरम् ॥

अघोषहल्(हलो)व्यञ्जनमवयवशरीरम् ।

---

१. 'वास्मीति होवाच' इत्यनन्तरं 'योऽसाविति'ति पद्यं, ततश्च 'निगमयति' इति, तदनन्तरञ्च खण्डसमाप्तिचिह्नं कपाठे दृश्यते । २. 'ति स होवाच' ड०

॥ यो घोषस्स आत्मा ॥

तृतीयाद्यास्त्रयो वर्ग्याः स्वराश्चात्र तु घोषिणः ।

आत्मा मध्यमः कायः ।

॥ य ऊष्माणः स प्राणः ॥

शषसहा ऊष्माणः । पञ्चवृत्तिर्वायुः प्राणः ।

एतज्ज्ञानं स्तौति—

॥ एतद्ध स्म वै तद्विद्वान्वसिष्ठो *वसिष्ठो बभूव ॥

तदेतद्विद्वान्वसिष्ठ ऋषिः वसुमत्तमो बभूव ।

॥ तत एतन्नामधेयं लेभे

ततः बृहतीसहस्रगतज्ञानात् । ततो वसुमत्त्वाद्वसिष्ठ इत्येतन्नामधेयं च लब्धवान् ।

किञ्च,

॥ एतदु हैवेन्द्रो विश्वामित्राय प्रोवाच ॥

विश्वामित्राय चेन्द्रोऽपि ज्ञानमेतत्पुरोक्तवान् ।

---

* 'अतिशयेन निवासहेतुत्वमाच्छादयितृत्वं वा वसिष्ठत्वम् । प्राणो हि स्वप्रवेशेन निवासहेतुर्भवति । स्वव्याप्त्या सर्वमाच्छादयति । तादृशं प्राणात्मत्वं ध्यानेन प्राप्तवान्मुनिरप्यर्थद्वयवत्त्वेन वसिष्ठनामकत्वं लब्धवान्' इति सायणः ।

॥ एतदु हैवेन्द्रो भरद्वाजाय प्रोवाच ॥

एतदिन्द्रः पु(रो?रा) ज्ञानं भरद्वाजाय चोक्तवान् ।

किञ्च,

॥ [1]*तस्मात्स तेन बन्धुना यज्ञेषु हूयते ॥

तसु उपक्षये । करणे मः । टार्थे डमिः । सर्वदुःखनाशिना तेन ज्ञानेन । बन्धुना । बन्धेरुः सुखं बध्नता । तेन हेतुना । स इन्द्रः, सर्वैर्यज्ञेषु हूयते । एतज्ज्ञानार्थं सर्वे महर्षय इन्द्रमाह्वयन्तीत्यर्थः ।

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम ॥

पूर्ववत् ।

। तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्-
त्रिंशतमक्षराणां सहस्राणि भवन्ति ॥

षट्त्रिंशतम् । सोरम् । षट्त्रिंशत् ।

षट्त्रिंशदक्षरा ह्येका बृहती तु सहस्रके ।
अक्षराणां सहस्राणि षट्त्रिंशत्खलु सन्ति वै ॥

ततः किम्,

---

१. ' न् ॥ तस्मात्स ' ख.

---

* ' तस्मात्स इन्द्रस्तेन शिष्यरूपेण बन्धुना सोमयागेषु सुब्रह्मण्यायामिन्द्रागच्छ हरिव आगच्छेत्येवं समाहूयते ' इति सायणः ।

॥ तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति ॥

अह्नाम् । अहोरात्राणामित्यर्थः । 'व्यञ्जनैरेव रात्रीः' इति वक्ष्यमाणत्वात् ।

संवत्सरस्य चाहानि षष्ट्युत्तरशतत्रयम् ।
अह्नां संख्या शताब्दे तु सहस्रं बृहतीसमा ॥

अहोरात्रसहस्राणि षट्त्रिंशत्खलु सन्त्यतः ।
अवयुत्यानुवादोऽयं पञ्चाहान्यधिकान्यतः ॥

तत्र च,

॥ व्यञ्जनैरेव रात्रीराप्नुवन्ति ॥

सत्रिणः ।

॥ स्वरैरहानि ॥

आप्नुवन्तीत्येव ।

बृहतीसहस्रतुल्या रात्रीर्हलिभः प्रयान्ति ते ।
सत्रिणस्तद्वदेवाज्भिर्दिनानि च व्रजन्ति हि ॥

अव्यक्तत्वं रात्रिहलोस्समर्मैजिदत्नयोरपि ।
व्यक्तत्वमज्ञहितहल्नास्ति निर्हल्स्वरोऽस्ति तु ॥

बृहतीनां सहस्रेण शतमायुर्हि लभ्यते ।

---

१. 'त्वह्ना' क. २. 'रात्रिमाप्नु' ठ. ३. 'सत्रिः' क 'सत्रीः' घ. ४. 'हस्सम क, 'हलोस्स' घ. अव्यक्तेत्यारभ्य सहस्रेणेत्यन्तं खपाठे नास्ति । ५. 'मजैम' घ. ६. 'मज्ञतह' क, 'मज्ञहितह' घ.

पुनः स्तौति—

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम् ॥

पूर्ववत् ।

॥ तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य परस्ता-
त्प्रज्ञामयो देवतामयो ब्रह्ममयोऽमृतमयस्सम्भूय देवता
अप्येति य एवं वेद ॥

ज्ञानेनेति शेषः । परस्ताच्छरीरोत्क्रान्तेरूर्ध्वम् । प्रज्ञा ज्ञानम् । देवता अग्न्यादयः । ब्रह्म वेदः । *अमृतं मरणाभावः । सम्भूय[1] भूत्वा । देवता अप्येति अग्निवायुसूर्यानप्येति प्राप्नोति यो वेद स वेदिता ।

वेदितुस्तावदेवञ्चेत्किम्पुनस्त्वधिकारिणाम् ।

अथोपासनमाह—

॥ तद्योऽहं सोऽसौ योऽसौ सोऽहम् ॥

इत्युपासीतेति शेषः । तदिति वाक्योपन्यासे ।

योऽहं सोऽसौ तथा योऽसौ सोऽहमित्येवमात्मकम् ।
यज्ज्ञानं तद्धि सर्वेषां ज्ञानानामुत्तमं मतम् ॥

॥ तदुक्तमृषिणा ॥

---

१. ' भूय भूत्वा ' क, घ.

---

* ' अमृतमयः तत्त्वज्ञानोत्पादेन मोक्षहेतुत्वान्मुक्तिरूपः । यः पुमानेव-मुपास्ते स पुमानेव ता अग्निवाय्वादिकाः संभूय सर्वा अप्येकीकृत्याप्येति तद्देवतासमष्टिरूपं हिरण्यगर्भं प्राप्नोति ' इति सायणः ।

मन्त्रेण मन्त्रदृशा वा कुत्सेन[1] ।

॥ सूर्य आत्मा जगतस्तस्थुषश्चेति ॥

*चित्रमित्याद्यृचः पादश्चतुर्थोऽयमुदाहृतः ।

अर्थस्तु— चित्रं पूज्यम् । देवानां रश्मीनाम् । उद् ऊर्ध्वम् अगात् । अनीकं मण्डलम् । चक्षुः नेत्रम् । मित्रस्य वरुणस्याग्नेः । प्रदर्शनत्वात्सर्वेषामित्यर्थः । आ समन्ताद् । अप्राः ।

प्रा पूरणे लटो लङ्सिप्तिपः शब्लुगटा पदम् ।

किम्, द्यावापृथिवी दिवं भूमिश्चान्तरिक्षं च । सूर्य आत्मा जगतस्तस्थुषश्च । जगतः जङ्गमस्य तस्थुषः स्थावरस्य च इति ।

॥ §एतदु हैवोपेक्षेतोपेक्षेत ॥

यदुपासनमुक्तम् एतद् उ पुनः । ह सदा एव । उप उपरतः शान्तः सन् । ईक्षेत अनुतिष्ठेत् ।

‡'स यश्चायं पुरुषे यश्चासावादित्ये स एक' इति श्रुत्यन्तरेऽप्युक्तमिदं ज्ञानम् । द्विरुक्तिरुक्तार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायामात्मोपनिषदि
द्वितीयोऽध्यायः ॥

---

1. 'कुत्थ्सेन' क, घ.

---

* चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आ प्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ [ऋक्सं० १. ११५. १.]

§ 'एतमेव सर्वात्मकमादित्यस्वरूपं गुरुमुखादुपेक्षेत साक्षात्कुर्यात्' इति सायणः । ‡ तैत्तिरीयोपनिषत् २. ८. १.

अथ तृतीयोऽध्यायः ।

अथ पञ्चमहाभूतपाञ्चविध्यादियोगिनः ।
आत्मनस्तु महोक्थस्य ध्यानं सम्यक्प्रकथ्यते ॥

॥ यो ह वा आत्मानं पञ्चविधमुक्थं वेद यस्मादिदं[1] सर्वमुत्तिष्ठति स सम्प्रतिवित्[2] ॥

धाञो विपूर्वादाल्लोप "*उपसर्गे"त्यङा पदम्[3] ।

पञ्च विधाः प्रकाराः यस्य तम् । यः प्रकृतमुक्थमात्मानं वेद । उक्थ-शब्दं निराह— यस्मादित्यादि । इदं सर्वमुत्तिष्ठति[4] जगद्यस्मादुत्पद्यते तमात्मानम् । सम्प्रतिवित् ।

सम्प्रतीति निपातोऽयं सम्यगर्थस्य वाचकः ।

सम्यग्दर्शी ।

उक्थस्यात्मनो विधाः पञ्चाह—

॥ पृथिवी वायुराकाश आपो ज्योतींषीति ॥

एतद्[5] भूतपञ्चकम् ।

॥ एष वा आत्मोक्थं पञ्चविधम् ॥

उत्तिष्ठति यतः सर्वं तदुक्थमिति निर्वचः ।

---

१. 'तस्मा' ज. २. 'त् ॥ सः धाञो' क. ख. ३. 'म् । विधाः प्रका' क., ख. ४. 'सर्वं जगद्यस्मा' ख. ५. 'तत्पञ्चभूतपञ्चकम्' क.

---

* पा० सू० ३. ३. १०६

तदाह—

॥ एतस्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येति ॥

अप्ययः[1] प्रलयस्तस्माज्जातं तत्र प्रलीयते ।

॥ अयनं ह वै समानानां भवति य एवं वेद ॥

अयनम् । इणोऽधिकरणे ल्युट् । संश्रयणीयस्थानम् । समानानां ज्ञातीनां भवति य एवं वेद सः ।

॥ तस्मिन्योऽन्नश्चान्नादश्च वेदाहास्मिन्नन्नादो जायते भवत्यस्यान्नम् ॥

तस्मिन्[2] भूतपञ्चके । ङस्यर्थे ङि । अस्माद्वेदितुः । अन्नादः कुक्षिरोगवर्जितः पुत्रो जायते । आ पुनः । ह चेत्यर्थः । अस्य पुनरन्नश्च भवति ।

॥ आपश्च पृथिवी चान्नम ॥

कुतः,

॥ एतन्मयानि ह्यन्नानि भवन्ति[3] ॥

व्रीह्याद्यन्नानि पृथिवीजलरूपाणि हि खलु ।

---

१. 'यः तस्मा' घ. २. 'तस्मिन् कुभूतसंघे' क., 'तस्माद्भूतसंख्ये' घ. ३. 'न्ति । स्वव्रीह्या' क. घ.

॥ *ज्योतिश्च वायुश्चान्नादम् ॥

भूतम् ।

ज्योतिषा दृश्यते चान्नं वायुना परिपच्यते ।

तदाह —

॥ एताभ्यां हीदं सर्वमन्नमत्ति ॥

इदं सर्वं जगत् कर्तृ ।

॥ आवपनमाकाशः ॥

[1]ओप्यते अत्रेत्यावपनम् । अधिकरणे ल्युट् ।

कथम् ,

॥ आकाशे हीदं सर्वं समोप्यते ॥

स्थाल्यादाविवाकाशे हि निधीयते ।

॥ आवपनं ह वै समानानां भवति य एवं वेद ॥

स ज्ञातीनामाश्रयः स्यात् ।

॥ तस्मिन्योऽन्नञ्चान्नादश्च वेदाहास्मिन्नन्नादो जायते

1. 'ओप्यते इत्यावपनम्' ख. घ.

* 'भूतद्वयं भोक्तृरूपम् । प्राणवायुना जाठराग्नौ प्रदीपिते सत्येताभ्यामग्निवायुभ्यां सर्वमिदमन्नजातं जनो भक्षयति तस्माज्ज्योतिर्वाय्वोरन्नादत्वं युक्तम्' । इति सायणः ।

भवत्यस्यान्नम् ॥

व्याख्यातम् ।

तत्र च,

॥ ओषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादम् ॥

अन्नं भक्ष्यम् । अन्नादं भक्षयितृ ।

कथम्,

॥ ओषधिवनस्पतीन्हि प्राणभृतोऽदन्ति ॥

प्राणभृतः प्राणिनः । अदन्ति भक्षयन्ति ।

किञ्च,

॥ तेषां य उभयतोदन्ताः पुरुषस्यानुविधां विहितास्ते-
ऽन्नादा अन्नमितरे पशवः ॥

उभयत उपर्यधस्ताच्च दन्ता येषां त उभयतोदन्ताः मर्कटश्वादयः पुरुषस्य विधां प्रकारम् अनु लक्षीकृत्य विहिता निर्मिताः । पुरुषसदृशा इत्यर्थः । तेऽन्नादाः । इतरे पशवोऽजादयोऽन्नम् ।

॥ तस्माच्च इतरान्पशूनधीव चरन्ति ॥

ते भक्षयितारः । इतरान् भक्षान् । *अधिचरणमभिभवः ।

---

* 'अधीव चरन्ति । अधिका इव वर्तन्ते । अश्वादीनां मूल्यबाहुल्याद्यत्ना-तिशयेन रक्ष्यमाणत्वाच्चाधिक्यम्' । इति सायणः ।

अजाश्वसन्निपातेऽश्वः संगृह्णात्यजाम्[1] ।

॥ *अधीव ह्यन्नेऽन्नादो भवति अधीव ह समानानां
जायते य एवं वेद ॥

अधीवेति बलार्थः ।

वेदिता लभते ह्यन्नं बह्वन्नादो भवत्यपि ।
न्यग्भूता ज्ञायतश्चैनमाश्रयन्ति समृद्धये ॥

इति प्रथमः खण्डः ।

॥ तस्य य आत्मानमाविस्तरां वेदाश्नुते ह्याविर्भूय
ओषधिवनस्पतयो यच्च किञ्च प्राणभृत्स आत्मानमा-
विस्तरां वेद ॥

स भूय आविरश्नुते आत्मानमाविस्तरां यो वेद। आविः प्रकाशम् ।
आविस्तरामतिप्रकाशम् ।

यद्व्रीह्यादि च वृक्षादि यच्च प्राणसमन्वितम् ।
तस्यात्मानं प्रकाशं यो वेत्ति वै स तु वेदिता ॥

---

१. 'श्व संगृह्णाती त्त्वजाम्' क., 'श्वा संगृह्णातीत्यजाम्' घ.

---

* 'यस्माल्लोकेऽपि व्रीहियवादिका येऽन्ने पात्रे प्रक्षिप्ते सत्यन्नादो भोक्ता मनुष्योऽधिक इव भवति । तत्र मनुष्यस्य स्वातन्त्र्यादाधिकत्वमन्नस्य पारतन्त्र्यान्न्यूनत्वम्' इति सायणः ।

लोके प्रकाशं कल्याणं भूयो भूयः समश्नुते।
आत्मा परस्तु नो जीवो निर्द्वन्द्वं हृदि यत्स्थितम् ॥

प्रकाशमेव जानाति मुक्त्यै स तु वेदिता।
परेण जीवस्यैक्यं वा स्याद्भेदो वात्र सर्वथा ॥

तयोस्संश्लेषविज्ञानं श्रेय इत्येव निश्चयः।
ननु सर्वगतो ह्यात्मा कुत आविस्तरामिति—

अत आह—

॥ ओषधिवनस्पतिषु हि रसो दृश्यते चित्तं प्राणभृत्सु ॥

त्वर्थे हीति। रसः क्षीरादि।

तमसा बहुरूपेण वेष्टिताः कर्महेतुना।
अन्त[1]स्संज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥

इति हि[2] स्मरन्ति।

॥ प्राणभृत्सु त्वेवाविस्तरामात्मा तेषु हि र[3]सोऽपि
दृश्यते न चित्तमितरेषु ॥

प्राणित्वं चित्तरसेन। निष्प्राणो रसमात्रकम्।

तत्रापि—

॥ पुरुषे त्वेवाविस्तरामात्मा ॥

पुरुषो मनुष्यः। विविक्तकार्यकरणत्वात्।

---

१. 'त' क. घ. २. 'ह' क. घ. ३. 'रसो ह' क, ठ.

उपपादयति—

॥ स हि प्रज्ञानेन सम्पन्नतमः ॥

ज्ञानबहुलः ।

कथम्,

॥ विज्ञातं वदति ॥

अनुभूतमर्थमिदमहमज्ञासिषमित्यादि ।

॥ विज्ञातं पश्यति ॥

समुद्वीक्षते ।

॥ वेद श्वस्तनम् ॥

श्वसष्ट्युट्, ट्युल्वा । तुट् । श्वस्तनमागामिदिने भावि ।

॥ वेद लोकालोकौ ॥

स्वर्गस्सुखाय मे प्राप्यस्त्याज्यो नरक इत्यपि ।

॥ मर्त्येनामृतमीप्सति ॥

*मृतियोगिशरीरेण ब्रह्मानन्दं प्रपित्सते ।

---

१. ' दज्ञासिषमि ' क, ' दमज्ञासिषमि ' ख.

---

* ' मर्त्येन विनश्वरेण ज्ञानकर्मरूपसाधनेनामृतमविनश्वरं मुक्तिपदमीप्सति प्राप्तुमिच्छति ' इति सायणः ।

आप्लृ व्याप्तौ सनि कृत ईत्वम्[1] *'आप्ज्ञप्यृधा'मिति ॥

अभ्यासस्य तथा लोपः स्यादर्थोऽथाप्तुमिच्छति ।

॥ एवं सम्पन्नः ॥

पुरुषः ।

॥ अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानम् ॥

अशनायेति यालोपादशनाशिशिषोच्यते ।

पिपासा पातुमिच्छा । अभि प्रति । एव । ज्ञानं भोक्तव्यं प्राप्तव्यमिति । $'अभिरभागे' इति कर्मप्रवचनीयत्वमभेः ।

किञ्च,

॥ न विज्ञातं वदन्ति ॥

वागिन्द्रियाभावात् ।

॥ न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकौ ॥

विदुरित्येव ।

॥ त एतावन्तो भवन्ति ॥

ते मनुष्यव्यतिरिक्ताः । एतावन्तः अशनपानमात्रविदः । सर्वेषान्तु—

---

१. 'त्वमाज्ञप्यृ' क. घ. 'त्वमाऽज्ञप्यृ' ख. २. 'नायापि' ठ.

---

* पा० सू० ७. ४. ५२. $ पा० सू० १. ४. ९१.

॥ *यथाप्रज्ञं हि सम्भवाः ॥

ज्ञानानुगुणं ह्यनुभवा भवन्तीत्यर्थः ।

इति द्वितीयः खण्डः ।

॥ स एष पुरुषः समुद्रः सर्वं लोकमति ॥

नरोऽब्धिवत्सुदुष्पूरो युक्तो दुष्करतृष्णया ।
लोकप्राप्तः काम उक्तस्तं सर्वं (मि? म)तिवर्तते ॥

लोक्यत इति लोकः कर्मणि घञ् ।

उपपादयति —

॥ यद्ध किञ्चाश्नुतेऽत्येनं मन्यते ।

प्राप्तमर्थं स्वीकृत्य तत उत्तरमिच्छति ।

---

१. 'वाः ॥ एष पु' क्ष.

---

* 'यथाप्रज्ञं पूर्वस्मिञ्ज्ञानकर्मानुष्ठानाधिकारयुक्ते जन्मनि यादृशी प्रज्ञा शास्त्रीया लौकिकी वाभ्यस्ता । कर्मणोऽप्येतदुपलक्षणम् । कर्मापि विहितं प्रतिषिद्धं वा यादृशमनुष्ठितं तादृशीं प्रज्ञां तादृशं कर्म चानतिक्रम्य यस्मात्संभवाः प्राणिनां जन्मानि भवन्ति तस्माज्ज्ञानकर्मानुसारेण पशूनां बुद्धिमात्रं युक्तम् । एतदेवाभिप्रेत्य परलोकगामिनं जीवं प्रति वाजसनेयिन आमनन्ति- "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" [बृह० ४. ४. २.] इति । "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन [बृह० ४. ४. ५.] इति च ।" इति सायणः ।

॥ यद्यन्तरिक्षलोकमश्नुतेऽत्येनं मन्यते यद्यमुँल्लोकमश्नुवीतात्येवैनं मन्येत ॥

उक्तं हि —

यत्रास्तिमस्तमाधेयमाधारत्वाय कल्पते
दरिद्रः प्रार्थयत्यर्थमर्थवान्राज्यमिच्छति ॥

राजा च पृथिवीशत्वं पृथ्वीशश्चक्रवर्तिताम् ।
चक्रवर्ती तथेन्द्रत्वमिन्द्रो ब्रह्मत्वमिच्छति ॥

तृष्णा च निरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरकैरेव खन्यते ॥

॥ स एष पुरुषः पञ्चविधः ॥

पञ्च विधाः प्रकारा यस्य सः ।

धाञो विपूर्वा'दा*तश्चोपसर्गे'त्यङा पदम् ।

॥ तस्य यदुष्णं तज्ज्योतिः ॥

उष्णं तापांशः ।

॥ यानि खानि स आकाशः ॥

द्वाराण्यन्यावकाशश्च खानि ।

* पा० सू० ३. ३. १०६.

१. 'त्रास्तिमस्तमाधे' ख.

॥ अथ यल्लोहितं श्लेष्मा रेतस्ता आपः ॥

लोहितं रक्तम् ।

॥ *यच्छरीरं सा पृथिवी ॥

शरीरं करचरणादिसन्निवेशः ।

॥ यः प्राणः स वायुः ।

इति पञ्चप्रकारत्वं पुरुषस्येह वर्णितम् ।

॥ स एष वायुः पञ्चविधः ॥

ज्ञानकर्माश्रयः ।

कथम्,

॥ प्राणोऽपानो व्यान उदानस्समानः ॥

¶नासिकापुटाङ्गुष्ठचारी प्राणः । पार्ष्ण्यादिगुदपृष्ठवंशचार्यपानः । त्वक्पर्यन्तदेहचारी व्यानः । आपादमस्तकचार्युदानः । नाभिहृदयस्थोऽन्नरसव्याप्तिकारी समानः इति वायुः पञ्चविधः ।

वाय्वन्तानीन्द्रियाणीत्याह—

---

* शरीरशब्देन काठिन्यं विवक्षितम् । 'यत्कठिनं सा पृथिवी (गर्भोपनिषत् १) इति श्रुत्यन्तरात्' । इति सायणः । ¶ 'हृदयादूर्ध्वं मुखनासिकयोः सञ्चरन्वायुः प्राणः । अधोद्वारे सञ्चरन्नपानः । जीवोत्क्रान्त्यादिकं कर्तुं मूर्ध्वभागे कण्ठेऽवस्थित उदानः ।' इति सायणः ।

॥ ता एता देवताः प्राणापानयोरेव निविष्टाश्चक्षुः श्रोत्रं मनो वागिति ॥

चक्षुः[1] श्रोत्रं मनो वागित्येता[2] देवताः प्राणापानयोरेव निविष्टाः । कथमित्याह—

॥ प्राणस्य ह्यन्वपायमेता अपियन्ति ॥

अपायं विनाशमनु एता अपियन्ति । अप्ययो नाशः ।

तदेतत्प्राणसंवादे पूर्वमेव प्रदर्शितम् ।
प्राणे स्थिते स्थिता देवा निर्गते निर्गता इति ॥

॥ स एष वाचश्चित्तस्योत्तरोत्तरिक्रमो यद्यज्ञः ॥

वायुप्रेरिताया वाचो मनस उत्तरोत्तरि वर्धमानः क्रमः व्यापारः यत्, यः यज्ञः । वाङ्मनसनिर्वर्त्यो हि यज्ञः ।

किञ्च,

॥ स एष यज्ञः पञ्चविधः ॥

कथम्,

॥ अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः ॥

इति नित्या विधाः पञ्च ।

॥ स एष यज्ञानां सम्पन्नतमो यत्सोमः ॥

---

१. चक्षुरित्यारभ्य निविष्टाः इत्यन्तं कपाठे नास्ति । २. 'वागिति ता एता' घ.

यत् यः ।

अग्निहोत्रादिसोमान्ते यज्ञे पञ्च विधास्तु याः ।
सन्ति सोमे च तास्तस्मात्सम्पन्नतम उच्यते ॥

तदाह—

॥ एतस्मिन्ह्येताः पञ्च विधा अधिगम्यन्ते ॥

उपलभ्यन्ते ।

कथम्,

॥ यत्प्राक्सवनेभ्यस्सैका विधा त्रीणि सवनानि यदूर्ध्वं सा पञ्चमी ॥

विधैका दीक्षणीयाद्या स्थिता प्राक्सवनत्रयात् ।
सवनानि त्रीणि तिस्रो विधाः खलु भवन्ति ताः ॥

आग्निमारुतशस्त्रात्तु परा वै पञ्चमी विधा ।
पञ्चानां पूरणी नान्ताड्डटो मटि टितस्तु ङीप् ॥

इति तृतीयः खण्डः ।

अह्नोऽस्य पञ्चविंशत्वात्पुरुषादिषु पञ्चता ।
बहुकृत्वः स्तुता चास्मिन्पञ्चतामहसः स्तुवन् ॥

---

१. 'स एत' ठ.

॥ यो ह वै यज्ञे यज्ञं वेदाहन्यहर्देवेषु देवमध्यूळ्हं[1] स सम्प्रतिवित् ॥

अध्यूळ्होऽनुप्रविष्टः[2] । अस्य प्रत्येकं सम्बन्धः यज्ञेऽध्यूळ्हं[3] यज्ञमित्यादि यो वेद स सम्प्रतिवित् ।

सम्प्रतीति निपातोऽयं सम्यगर्थस्य वाचकः ।

कोऽयं यज्ञादिष्वनुप्रविष्टो यज्ञातिरिक्तः । आह—

॥ एष वै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो[4] यदेतन्महदुक्थम् ॥

महाव्रताख्यमहरित्यर्थः ।

यज्ञेषु यज्ञोऽतिश्रेष्ठ्यादहश्चाहःसु वै तथा ।
देवता सूक्तहविषोस्तद्द्वयं श्रेष्ठमत्र च ॥

अतोऽन्यत्रत्यदेवेभ्यः श्रेष्ठा ह्यत्रत्यदेवता ॥

इति भावः ।

॥ तदेतत्पञ्चविधम् ॥

महाव्रतमहः ।

कथम् ।

॥ त्रिवृत्पञ्चदशं सप्तदशमेकविंशं पञ्चविंशमिति स्तोमतः ॥

---

१. ह्ळं आनन्दाश्रममुद्रितपाठः खपाठश्च । २. 'ध्यूह्ळो' ख, 'ध्यूळोऽनु' घ. ३. 'ढं' ख., 'ळं' घ. ४. 'ह्ळो' आनन्दाश्रममुद्रितपाठः

नवकाख्यन्त्रिवृत्त्रित्वं गुण्यश्च गुणनं त्विति ।
स्तोमे पञ्चदशाद्या(ड्डीड्ड)र्लोपष्टे*'स्त्रिंविंशतेः' ॥

॥ गायत्रं रथन्तरं बृहद्भद्रं राजनमिति सामतः ॥

पञ्चविधम् ।

सामान्यत्र हि गीयन्ते प्राच्यादिषु तु सामगैः ।
शिरस्त्रिवृद्धि गायत्रं पूर्वं पक्षो रथन्तरम् ॥

स्तुतं पञ्चदशं पक्ष उत्तरं तु बृहत्स्तुतम् ।
साम सप्तदशं पुच्छमेकविंशं तु भद्रकम् ॥

पञ्चविंशं राजनेन स्तुत आत्मा स मध्यमः ।
कायस्तोमत इत्येवमुक्ताः पञ्चविधा इमाः ।

॥ गायत्र्युष्णिग्बृहतीत्रिष्टुब्द्विपदेति छन्दस्तः ॥

पञ्चविधमित्येव ।

तृचाशीतिषु गायत्रीबृहत्युष्णिह आत्मनि ।
§त्रिष्टुभस्तदिदासाद्याः[1] पुच्छे तु द्विपदा इमाः ॥

अथ चित्याग्नेः समाख्यायाः पञ्च विधा आह —

॥ शिरो दक्षिणः पक्ष उत्तरः पक्षः
पुच्छमात्मेत्याख्यानम् ।

---

१ 'सेति पु' ख.

---

* पा० सू० ६. ४ १४२. § ऋक्सं० १०, १२०. १.

आख्यानं नाम पञ्चविधम् ।

अथोद्गातॄणां क्रियातः पञ्च विधा आह—

॥ पञ्चकृत्वः प्रस्तौति ॥

प्रस्तोता ।

॥ पञ्चकृत्व उद्गायति ॥

उद्गाता ।

॥ पञ्चकृत्वः प्रतिहरति ।

प्रतिहर्ता ।

॥ पञ्चकृत्व उपद्रवति ॥

उद्गातैव ।

॥ पञ्चकृत्वो निधनमुपयन्ति ॥

सर्वे सामगाः निधनं सामान्त्यपर्व ।

। *तत्स्तोभसहस्रं भवति ॥

राजनाख्ये सामनि स्यात्स्तोभानां तु सहस्रकम् ।
निदानसूत्रकल्पज्ञाः प्रमाणं तत्र सामगाः ॥

---

१. 'धा' ज.

---

* 'ऋगक्षरव्यतिरेकेण गीतिपूरणार्थं येऽक्षरसमूहाः प्रक्षिप्यन्ते ते स्तोभसंज्ञकाः ।' इति सायणः ।

तैर्ह्युच्यते—

पञ्च स्तोमांश्च चतुरस्त्वार्चपादान्
गायन्त्येते देवताख्यांस्तथैव ।
चत्वारिंशत्स्तोमसिद्धिस्सकृच्चे
सहस्रं वै पञ्चविंशे समृद्धम् ॥

इति ।

॥ एवं ह्येताः पञ्चविधा अनुशस्यन्ते ॥

एवं हि तथैवेत्यर्थः । अनुशस्यन्ते होत्रकाः ।

पञ्च ता विधा आह—

॥ यत्प्राक्तृचाशीतिभ्यः सैका विधा तिस्रस्त्रिचाशीतयो यदूर्ध्वं सा पञ्चमी ॥

आत्मा ग्रीवा शिरो विजवः पक्षौ पुच्छमतः परम् ।
धाय्येति पर्वाष्टकयुग्विधैका परिकीर्तिता ॥

गायत्र्याद्या तृचाशीतिर्बृहती चोष्णिही तथा ।
एतास्तिस्रो विधा ज्ञेया आभ्य ऊर्ध्वा तु पञ्चमी ॥

॥ तदेतत्सहस्रम् ॥

यन्निष्केवल्यशस्त्रं तद्बृहतीनां सहस्रकम् ।
ततस्तोमसहस्रं तदेतेनैवानुशस्यते ॥

एतत् । टालुक्, एतेन ।

॥ तत्सर्वम् ॥

---

१. ' शिश ' घ.

अन्त(र्निति ? र्वर्ति)सर्वसंख्यं सहस्रं सर्वमुच्यते ।

॥ तानि दश ॥

तृचाशीतिषु गायत्री बृहती चोष्णिगेव च ।
त्रीणि छन्दांसि यानीह दश तानि भवन्ति हि ॥

दशसंख्यान्विता यस्मादेकसप्तशतविंशतिः ।

स्तौति—

॥ दशेति वै सर्वम् ।

एकत्वादिपरार्धान्तमेकैकस्माद्दशोत्तरम् ।
अतः सर्वमधिष्ठाय दशसंख्या प्रवर्तते ॥

॥ एतावती हि संख्या ॥

दशापूर्तौ न्यूनता स्यादतिरेकेऽतिरिक्तता ।
यदा दशत्वसम्प्राप्तिस्तदा संख्येति कथ्यते ॥

॥ दशदशतस्तच्छतम् ॥

यच्छतं तच्च दशमं दशकं प्रवदन्ति हि ।
*'पञ्चद्दशतौ वर्गे वा' दशदशकमुच्यते ॥

॥ दश शतानि तत्सहस्रम् ॥

यच्छतानान्तु दशकं तत्सहस्रं प्रचक्षते ।

---

* पा० सू० ५. १. ६०

॥ तत्सर्वम् ॥

तस्मात्सहस्रसंख्यायां सर्वमन्तर्भवत्यहो ।

॥ तानि त्रीणि छन्दांसि भवन्ति ॥

तृचाशीतित्रयगतं छन्दस्त्रयमनूद्यते ।
असत्त्वसंवादादन्यच्छन्दस्तदपि नेष्यते ॥[1]

ततः किम् ।

॥ त्रेधा विहितं वा इदमन्नमशनं पानं खादः ॥

यत्सुखायास्यनिक्षेप्यं तदन्नं त्रिविधं तु तत् ।
अशनादिप्रभेदेन चोष्यं लेह्यं च पान(ग? क)म् ॥

तत्राशनं तु पक्वान्नं मुद्गादि परिकीर्तितम्[2] ।
पानं क्षीरजलादि स्यात्खाद्यः खण्डादिरुच्यते[3] ॥

॥ तदेतैराप्नोति ॥

तदन्नं त्रिविधन्त्वेतैः छन्दोभिस्त्रिभिरश्नुते ।

इति चतुर्थः खण्डः ।

---

१. 'दान्य' Mss. २. 'कीर्त्यते' ख. ३. 'रिष्यते' ख, घ.

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम् ॥

अनुवाद उत्तरार्थः ।

॥ तद्धैतदेके नानाच्छन्दसां सहस्रं प्रतिजानते
किमन्यत्सदन्यद्ब्रूयामेति ॥

अबृहतीरूपां किमिति बृहतीं वयं वदामेति मन्यमाना बृहत्वं-शमनादृत्य सहस्रत्वमादरणीयमित्याहुरित्यर्थः ।

प्रपञ्चयति—

॥ त्रिष्टुप्सहस्रमेके जगतीसहस्रमेकेऽनुष्टुप्सहस्रमेके ॥

कुर्वन्तीति भावेनेति शेषः ।

अनुष्टुप्पक्षं स्तौति –

॥ तदुक्तमृषिणा ॥

'अनुष्टुभमनुचर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषे'ति । मन्त्रेण तद्दर्शिभिराग्निवरुणसोमैर्वा ।

*बीभत्सूनामित्यृचोऽयं द्वितीयोऽर्धर्च ईरितः ।

---

१. 'च्छा' ट　　२. 'चर्चूर्य' ट.

---

* बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ।
अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषा ॥
(ऋक्सं० १०. १२४. ९.)

बीभत्सूनाम्। बधेः प्राप्त्यर्थात् [§]'मान्बधे'ति सनि [†]'सना शंसभिक्ष उः'। वृष्ट्या भूमिं प्राप्तुमिच्छन्तीनाम्। सयुजं सुहृदम्। [¶] हंसमागन्तारम् आहुः। अपां दिव्यानां सख्ये सखीभूतेऽन्तरिक्षे। स्वार्थे [a]'सख्युर्यः'। चरन्तम्। किञ्च अनुष्टुभं वाचं स्तनयित्नुरूपामनुलक्ष्यीकृत्य चर्चूर्यमाणम्। यङि [b]'उत्परस्यात' इत्युत्वे दीर्घश्च रेफलोपश्च इति[1] नुक्यागमव्यत्ययेन[2] (कुँरु)क्[3]। [+]अत्यर्थं चरन्तम्। इन्द्रं निचिक्युः ददृशुः। [£]'विभाषा चेः' इति कुः। कवयः मेधाविनः। [§]मनीषा बुद्ध्या। टा दीर्घः। इत्यर्थं गृहीत्वा व्याचष्टे—

॥ [c]वाचि वै तदैन्द्रं प्राणं न्यचायन्नित्येतत्तदुक्तं भवति ॥

तत् तत्र[4]। वाचि अनुष्टुप्सहस्रे। ऐन्द्रम्। स्वार्थेऽण्। इन्द्रं प्राणं न्यचायन् स्तुत्यत्वेन दृष्टवन्त इत्येतदर्थरूपं तत् तया उक्तं भवतीति। अनुष्टुभमन्वित्यस्यार्थो वाचीत्यनेन व्याख्यातः। चर्चूर्यमाणमिन्द्रमित्यस्यार्थ[5] ऐन्द्रं प्राणमित्यनेन। निचिक्युरित्यस्यार्थो न्यचायन्निति। चायृ[6] पूजानिशामनयोः।

---

१. 'यद्युपरस्यं त' क., 'यद्युपरस्यात' घ. २. 'ति सत्वागव्यत्ययेन' क., ख. ३. 'कुत्' क. ४. 'त्र अनु' ख.
५. 'स्वार्थ ऐन्द्रं प्राणमित्यस्यार्थ ऐन्द्रं प्रा' घ. ६. 'चार्य' क., 'चाय' ख.

---

§ पा० सू० ३. १. ६. † पा० सू० ३. १. १६८.
¶ 'हन्ति वर्षणाय मेघं भिनत्तीति हंसः' इति सायणः
a पा० सू० ५. १. १२६ b पा० सू० ७. ४. ८८.
+ 'पुनः पुनश्चरन्तम्' इति सायणः। £ पा० सू० ७. ३. ५८
§ मनीषा मननेन विवेकज्ञानेन निचिक्युः नितरामुपचितवन्तः। ध्यातवन्त इत्यर्थः। इति सायणः। c 'अनुष्टुप्शब्दोपलक्षितायां वाच्येव तदोपासनकाले प्राणमिन्द्रसम्बन्धिनं न्यचायन्नितरां ध्यातवन्तः इत्येतदर्थजातं तत्तेनोत्तरार्धेनोक्तं भवति' इति सायणः।

निपूर्वाच्चायतेर्लङ् *'ज्ञीतश्चा'(ज्यश्चे ? व्यन्ते)स्तलोपः।

अनुष्टुप्सम्पादनं स्तौति—

॥ स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः ॥

अनुष्टुप्सहस्रं कुर्वन्यशस्वी, [¶]यशोऽन्नं तद्वान्, कल्याणकीर्ति-र्भवितोः भवितुमीश्वरः समृद्धः स्यात्। ह प्रसिद्धौ। अथवा इह यशः अत्र कीर्तिः। अथवा यशस्वीत्यस्यार्थं व्याचष्टे कल्याणकीर्तिरिति। भवितोरिति। [§]'ईश्वरे तोसुन्कसुनौ' इति तोसुन्प्रत्ययः।

दूषयति—

॥ ईश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह ॥

कश्चिद् ब्रह्मवादी।

शताब्दादायुषः प्राक्तु मर्तुमीशः स वै भवेत्।
ब्रह्मत्वान्न्यूनता यस्माच्चतुर्वर्णैरनुष्टुभः॥

किञ्च,

॥ अकृत्स्नो ह्येष आत्मा यद्वागभि हि ॥

वाक्। अमर्थे सुः। वाचमभि प्रति। अनुष्टुभं प्रतीत्यर्थः। यत् यः। वर्तमाने[2] एष आत्मा। अकृत्स्नः अपरिपूर्णो भवति।

---

१ 'ह् स्तलोपः' घ.　　२. 'न आत्मा' ख. घ.

---

* पा० सू० ३. ४. १००.　　¶ 'यशो धनादिनिमित्तं लौकिकम्। कल्याणकीर्तिर्यागादिनिमित्ता वैदिकी' इति सायणः।

§ पा० सू० ३. ४. १६.

कथं,

॥ *प्राणेन मनसे[1] यस्यमानो वाचा नानुभवति ॥

प्राणेन मुखनासिकासञ्चारिणा वायुना युक्तया वाचा मनसे मनोऽन्तर्णीतण्यर्थात्तुमर्थेऽसेन्[2] । अवबोधयितुम् । यस्यमानः प्रयत्नं कुर्वन् पदार्थं नानुभवति ।

प्राणयुक्तां वदन्वाचं नार्थान्बोधयितुं ह्यलम् ।
अनुष्टुबिन्द्रसंश्लेषो प्राणा वाक्छेष एव हि ॥

वायुः सकलदेहस्थो नाभेरूर्ध्वं समुत्थितः ।
प्रयत्नप्रेरितो वक्षःप्रदेशे विस्मृतिं गतः ॥

शिरो गत्वा कण्ठवर्ती व्यनक्ति विविधा गिरः ।

इति शीक्षा । ततोऽनुष्टुप्सहस्रं न समाचरेत्[3] ।

ततश्च,

॥ बृहतीमभि सम्पादयेत् ॥

बृहतीमभि प्रति सहस्रं सम्पादयेत् ।

---

१. 'नसेऽस्य' क, ख, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, आनन्दाश्रम-मुद्रितपाठश्च । २. 'से। अव' क, 'सेट् अव घ.' ३. 'त्। बृ' क.

---

* तदानीं प्राणरूपां बृहतीमुपेक्ष्य वाग्रूपायामनुष्टुभ्येव मनसेऽस्यमानः स्वचित्तेनास्यमानः प्रेर्यमाणो होता स्वकीयया वाचा तच्छस्त्रं नानुभवति । न हि प्राणशक्तिसहायमन्तरेण केवलं मानसमात्रेण होता वाचा शस्त्रं वक्तुं क्षमते । सर्वस्येन्द्रियव्यापारस्य प्राणाधीनत्वात् ।' इति सायणः ।

एतत्स्तौति—

॥ एष वै कृत्स्न आत्मा यद्बृहती ॥

यत् या ।

स्पष्टयति—

॥ सोऽयमात्मा सर्वतश्शरीरैः परिवृतः ॥

*'तस्येदम्' अणो लुक् । शरीरावयवैः करचरणादिभिः । आत्मा मध्यमः कायः । 'मध्यं ह्येषामङ्गानाम्' इति वक्ष्यमाणत्वात् ।

दृष्टान्तयति—

॥ तद्यथायमात्मा सर्वतः शरीरैः परिवृत एवमेव बृहती सर्वतः छन्दोभिः परिवृता ॥

तद्यथेति निपातोऽयं दृष्टान्तोक्तेर्हि सूचकः ।

किञ्च,

॥ मध्यं ह्येषामङ्गानामात्मा मध्यं छन्दसां बृहती ॥

गायत्र्यादिजगत्यन्ते मध्यतो बृहती स्थिता ।
मध्यतश्च स्थितः कायः शिरःपादकरादिषु ॥

अनुष्टुप्सम्पत्तिफलमप्यत्रास्तीत्याह—

॥ स ईश्वरो यशस्वी कल्याणकीर्तिर्भवितोः ॥

---

* पा० सू० ४. ३. १२०.

बृहत्या(म)नुष्टुभः सत्त्वात् ।

॥ ईश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह ॥

इति तत्रोक्तदोषोऽपि नास्तीति शेषः ।

कथं,

॥ कृत्स्नो ह्येष आत्मा यद्बृहती ॥

यत् या । बृहत्याः कात्स्न्र्येन ह्यायुषोऽपि कात्स्न्र्यमिति भावः ।

॥ तस्माद्बृहतीमेवाभिसम्पादयेत् ॥

यत एवं तस्माद्बृहतीमेव अभि प्रति सहस्रं सम्पादयेत् ।

छन्दोभिस्सम्पदा कुर्याद्बृहतीनां सहस्रकम् ।

इति पञ्चमः खण्डः ।

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम् ॥

पूर्ववत् ।

॥ तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्यैकादशा-
नुष्टुभां शतानि भवन्ति पञ्चविंशतिश्चानुष्टुभः ॥

बृहत्योऽष्टावनुष्टुभोऽत्र नव स्युरति संख्यया ।

---

१. 'वा' Mss.

सहस्रेऽष्टांशाधिकेऽत्र पञ्चविंशतियुक्छतम् ॥

सहस्रादधिकं जातं स्तुत्वैवं बृहती खलु ।

कुत एतत्,

॥ आप्तं वै भूयसा कनीयः ॥

षट्त्रिंशदक्षरेणात्र व्याप्तं द्वात्रिंशदक्षरम् ।
यस्य पुत्रशतं त्वस्ति सन्त्यस्य दश सूनवः ।
अल्पस्य कनीयसुनि लोप ईतश्च भू बहोः ॥

अर्थस्तु— कनीयः भूय इति । ईयसुनि[1] कृते अल्पशब्दस्य कन् आदेशः *'युवाल्पयोः कनन्यतरस्याम्' इति । बहुशब्दस्य भूभावः । ईयसुन ईकारस्य च लोपः §'बहोर्लोपो भू च बहोः' इति ।

॥ तदुक्तमृषिणा ॥

मन्त्रेण तद्दर्शिना वा कुरुसुतिना ।

‡वाचम् अनुष्टुभम् । अष्टापदीं छन्दोवृद्धिस्थानभूतचतुरक्षरत्वेनाष्टविधाम् । अहं, नवस्रक्तिं चतुर्नवका बृहतीति नवभिश्चतुष्कैः स्रक्तयोंऽशा यस्यास्तां बृहतीम् । ऋतस्पृशम् ऋतस्य सत्यस्य स्पृष्टिम् । इन्द्रात् । ङसो ङसिः । इन्द्रस्य । परि साधु । तन्वं रूपम् । ममे निर्मितवानस्मि ।

---

१. 'नि बहुश' ख.

---

* पा० सू० ५. ३. ६४. § पा० सू० ६. ४. १५८.

‡ वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् ।
इन्द्रात् परि तन्वं ममे ॥ (ऋक्सं० ८ ७६. १२.)

द्वात्रिंशदक्षराऽनुष्टुप्षट्त्रिंशद्बृहती मता ।
चतुर्वर्णाधिकाम्मन्ये बृहतीमप्यनुष्टुभम् ॥

इत्यर्थं मत्वा आदायादाय व्याचष्टे—

॥ वाचमष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवन्ति ॥

अनुष्टुभ इति शेषः ।

॥ नवस्रक्तिमिति बृहतीसम्पद्यमाना नवस्रक्ति ॥

स्रक्तेर्ऽपि *स्रक्तिरंशा(?) नव चतुरक्षराः ।

॥ ऋतस्पृशमिति सत्यं वै वागृचा स्पृष्टा ॥

$सत्यमृग्रूपिणी वाक् तां बृहती स्पृश(ती ? ति)स्फुटम् ।
अतो ह्यृचाश्चोक्तमर्थं द्वय(न्तु ? न्त्यु)पलभ्यते ॥

॥ इन्द्रात्परि तन्वं मम इति तद्यदेवैतद्बृहती सहस्र-मनुष्टुप्सम्पन्नं भवति तस्मात्तदैन्द्रात्प्राणाद्बृहत्यै वाच-मनुष्टुभं तन्वं सन्निर्मिमीते ॥

बृहत्यनुष्टुभोरित्यामर्थे सु । बृहतीनां सहस्रमनुष्टु(भं ? भां) सम्पन्न-मिति

१. 'नम' ट.   २. 'त्यमर्थे सु' क.

* 'बृहती सम्पद्यमाना सती नवस्रक्तिभिश्चतुरक्षरपादरूपैः कोणैरुपेता भवति'। इति सायणः । $ 'येयमनुष्टुब्रूपा वागस्ति सेयमृचा स्पृष्टा संयुक्ता सती सत्यं कदाचिदपि बाधारहितं प्राणदेवं बृहतीरूपत्वेन ध्यातव्यं स्पृशतीति शेषः ।' इति सायणः

यदेतत्तदत्र भवति। अधिकश्च पञ्चविंशत्यधिकशतम्। यस्मादेवं तस्मात्। तत् तत्र। प्राणात्। ङसो ङसि। बृहत्यै। ङसो ङे। प्राणस्य बृहत्याः। वाचमनुष्टुभम्। तन्वं देहम्। ऐन्द्राद् ऐन्द्रीम्। ईन्मोरात्तौ। सं सम्यक्। निर्मिमीते सम्पादयति। होता भगवान् कुरुसुतिः।

कुर्वन्सहस्रं बृहती(:) करोत्येव ह्यनुष्टुभः।
अधिकश्च करोत्यस्मात्पञ्चविंशतियुक्छतम्॥

॥ स वा एष वाचः परमो विकारो यदेतन्महदुक्थम्॥

यन्महाव्रतसंज्ञेऽह्नि निष्केवल्यन्तु शस्त्रकम्।
तदेतत्स्थूलवाचस्तु परमो वै समुद्गतः॥

छन्दोभिः सम्पदा जातं बृहतीनां सहस्रकम्।

॥ तदेतत्पञ्चविधम्॥

एतद् वाङ्मयम्।

कथं,

॥ मितममितं स्वरः सत्यानृते इति॥

मितादिपञ्चकं सम्यग्व्याचष्ट स्वयमेव तु—

॥ ऋग्गाथा कुम्ब्या तन्मितम्॥

ऋक्पादबद्धा गाथाः स्युरपदक्रमिता ऋचः।
कुम्ब्याच्छादन इत्यस्मात्करणे न्यत्तुगाच नुम्॥

---

१. 'कुम्बि छादन इ' क, ख. 'कुबि छादन ऋत्यस्मात्करणे न्यत्तुगार्थं' ग.

छादयित्र्यस्तु सूक्तानां कुम्ब्या *निविद ईरिताः ।
एकैकं वै निविद इत्यृग्भ्यो निविद उच्छ्रितैः ।
वाङ्मयन्त्वङ्निविद्गाथारूपं त्विह मितोच्यते ॥

॥ यजुर्निगदो वृथा वाक्तदमितम् ॥

यजु(गद्यस्तु[2]गद्यन्तु) निगदः प्रैषेळासूक्तवाककम् ।
वृथा वागनिबद्धस्तु प्रलापोऽप्यमितं मतम् ।

॥ सामाथो यः कश्च गेष्णः स स्वरः ॥

स्वराख्यं वाङ्मयं साम यच्चान्यद्गीति सम्भवेत् ।
गेष्णेति गी[3]तिनामाहुर्गायतेरेष्णका पदम् ॥

॥ ओमिति सत्यम् ॥

तथा

॥ नेत्यनृतम् । तदेतत्पुष्पं फलं वाचो यत्सत्यम् ॥

वाग्वृक्षस्य ज्ञानकर्मरूपं पुष्पं यथा[4]मति ।
इष्टलाभः फलमिति सत्यवादी भवेद्द्वयम् ॥

किञ्च,

॥ स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः ॥

---

१. 'च्छि' क. २. 'यजगद्यस्तु निगदः' क, ख. 'यजुगद्यस्तु' घ.
३. 'गीतीना' ख. ४. 'थामिति' क, ख.

---

* 'आचारशिक्षारूपा कुम्ब्या । तद्यथा – ब्रह्मचार्यस्यपोशान कर्म कुरु मा सुषुप्थाः इत्यादिः' । इति सायणः ।

उक्तार्थम् ।

॥ पुष्पं हि फलं वाचः सत्यं वदति ॥

यः सत्यं वदति स वाचः पुष्पं च फलश्च । भजत इति शेषः ।

॥ अथैतन्मूलं वाचो यदनृतम् ॥

छद्मरूपत्वात् ।

॥ तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते ॥

आविर्मूलः प्रकाशभूतमूलः । शुष्यति नीरसकत्वात्काष्ठं स्यात् । सः प्रसिद्धः । उद्वर्तते शीतोष्णाभ्यां शीर्यते ।[1]

॥ तस्मादनृतं न वदेत् ॥

तस्मादात्मशोषोद्वृत्तिनिवृत्त्यर्थम् ।

किञ्च,

॥ दयेत त्वेनेन ॥

रक्षणार्थोऽनुदात्तेच्च दयी रक्षेल्लिङा पदम् ।

एनेनात्मानमनृतवाक्त्यागेन समृद्धयेत् ।

1. 'शुष्यते' ख. 'शीर्यते' घ.

अथ सत्यानृतमिश्रणमाह—

॥ पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति ॥

परं ब्रह्माञ्चतीति पराक्[1]। रिक्तं शुद्धम्।

॥ तद्यत्किञ्चोमित्याहात्रैवास्मै तद्रिच्यते ॥

तत् तत्र। यद् यदि। किञ्च सर्वं याचित ओं ददामीत्याह। अत्र। तस्त्रैल्[2]। अतः। अस्मै याचित्रे। दीयमानं तद् अन्नगृहादि। रिच्यते पृथक्क्रियते दातृसकाशत्। ओमिति पररूपम्।

एवञ्च सति—

॥ स यत्सर्वमोङ्कुर्याद्रिञ्च्यादात्मानम् ॥

यत् यदि। ओङ्कुर्याद्दद्यात्। रिञ्च्याद्रिक्तं कुर्यात्।

रिचे रुधादेर्लिङ्यासुट् *'श्नसोरल्लोप' एव तिप्।

ततश्च,

॥ स कामेभ्यो नालं स्यात् ॥

दारिद्र्येण सर्वान्कामाननुभवितुं न शक्तः स्यादित्यर्थः[3]।

॥ अथैतत्पूर्णमभ्यात्मं यन्नेति[4] ॥

---

१. 'कू शुद्धं' क. २. 'स्त' क. ३. 'यथै' झ.
४. 'भ्यात्मं नेति' ट.

---

* पा० सू० ६. ४. १११.

याचितो यदि नेत्येवं कुर्यात्तत्पूर्णमेव तु।
आत्मानं प्रति सर्वं हि तिष्ठ(न्ते? त्ये)वाप्रदानतः॥

तत्र,

॥ स यत्सर्वं नेति ब्रूयात्पापिकास्य कीर्तिर्जायेत ॥

पापिका कीर्तिः। अहो मूर्खो न ददाति।

॥ सैनं तत्रैव हन्यात् ॥

एनं सर्वस्य प्रत्याख्यातारम्। तत्र गृहादौ। *'यो मा न ददाति स[1] इदेव मा[2] वा[2] [3]अहमन्नमन्नमदन्तमद्मी'ति श्रुतेः।

॥ तस्मात्काल एव दद्यात् काले न दद्यात्तत्सत्यानृते मिथुनीकरोति ॥

तस्मात्तयोरेकानुरोधस्य दुःशकत्वात्। तत् तत्र। सत्यानृते मिथुनीकरोति द्वयं मिलितं कुर्यात्।

दानस्य कालाकालौ तु शास्त्रोक्तौ समवेक्षताम्।

ततश्च,

॥ तयोर्मिथुनात्प्रजायते भूयान्भवति ॥

---

१. 'स इदेव मा वा' क. 'स एवमेव हन्यात् अ' ख. 'स इदेव मा वाः' घ.
२. 'मा ३ वा ३ अ' इति चेन्नपुरीये इन्दियामुद्रायन्त्रे मुद्रितोपनिषत्पाठोऽत्र स्वीकृतः। ३. 'अहमन्नमन्नमन्नमदन्तमद्मि' घ.

---

* तैत्तिरीयोपनिषत् ३. १०. ६.

मिथुनान्मिश्रात् । प्रजायते इत्यस्यार्थमाचष्टे भूयान्भवतीति । बहुभिः सर्वसमृद्धः स्यात् ।

वाग्विदं स्तौति—

॥ यो वै तां वाचं वेद यस्यां एष विकारः स सम्प्रतिवित् ॥

यस्या वाचः । एष बृहतीसहस्ररूपो विकारः । सम्प्रतिवित्सम्यग्दर्शी ।

वाक्तत्त्वमाह—

॥ अकारो वै सर्वा वाक् ॥

* 'अः इति ब्रह्म' इति वक्ष्यति । उक्तश्च स्वयं साक्षाद्भगवता गीतासु § 'अक्षराणामकारोऽस्मि' इति ।

सर्वा वागकारश्चेत्कथं नानात्वमित्याह—

॥ सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति ॥

अकाररूपा सैषा वाक्स्पर्शाख्यैः कादिमान्तकैः ।
तथोष्मभिः शषसहैर्व्यज्यमानस्वरूपिका ॥

बहुरूपा विरूपा च साधु सम्पद्य सम्पदा ।
एषां व्यञ्जनानामपि त(स्यैस्या) व्यञ्जनकत्वतः ॥

---

१. 'स्वां ए' ज. २. 'तो गी' क. ३. 'यु' Mss.
४. 'मापि' Mss.

---

* ऐ० आ० २. ३. ८ § भगवद्गीता १०. ३३.

अन्ये स्वरास्तथान्तस्थाश्चाप्यवर्णस्य विस्तृतिः
साङ्गोपाङ्गो वेदराशिरन्यद्यच्चापि वाङ्मयम् ॥
सर्वमस्य विभूतिर्हि सर्वव्यापारसाधिका ।

अथ वाचः प्राणदेहावाह—

॥ तस्यै यदुपांशु स प्राणः ॥

ङसो ङे । तस्य यदुपांशूच्चारणम् । अन्तर्वर्तित्वसाम्यात्प्राणत्वम् ।

॥ अथ यदुच्चैस्तच्छरीरम ॥

यदुच्चैरुच्चारणं स देहः ।

॥ तस्मात्तत्तिर इव ॥

तस्मात् तथाहि । तद् उपांशुत्वम् । तिरः उपलब्धुमशक्यम् ।

॥ तिर इव ह्यशरीरम् ॥

यस्य शरीरं न विद्यते तत्तिर इव भवति हि ।

॥ अशरीरो हि प्राणः ॥

प्राणस्यापि शरीरं न विद्यते ।

॥ अथ यदुच्चैस्तच्छरीरम ॥

---

१. 'अन्यै स्वरास्तथान्तास्था' क, ख. 'अन्यै रास्तथान्तस्थाप्यवर्णस्य' ग.

उक्तार्थोऽनुवादः ।

॥ तस्मात्तदाविः ॥

तद् उच्चैरुच्चारणम् । आविः प्रकाशम् ।

॥ आविर्हि शरीरम् ॥

मूर्तित्वात् ।

इति षष्ठः खण्डः ।

अथान्यथा बृहतीसहस्रं स्तौति—

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम् ॥

पूर्ववत् ।

॥ तद्यशः ॥

तद्यश इत्युपासीत । *'तस्य नाम महद्यश' इति श्रुत्यन्तरम् ।

॥ स इन्द्रः ॥

इन्द्रप्रतिपादकत्वात् ।

॥ स भूतानामधिपतिः ॥

---

* तै० आ० प्र० १० अ० १.

भूतानां चराचराणामधिपतिः ।

॥ स य एवमेतमिन्द्रं भूतानामधिपतिं वेद विस्रसा हैवास्माल्लोकात्प्रैतीति ह स्माह महिदास ऐतरेयः ॥

*विस्रसा जरा । टालुक् । तथा युक्त एवोत्तरं वयोऽपि प्राप्यैव प्रैति प्रकर्षेण गच्छति । महिदास ऐतरेय आह स्म । अहमेवेति भावः ।

किञ्च,

॥ प्रेत्येन्द्रो भूत्वैषु लोकेषु राजति ॥

न केवलं प्रेत्यैव, अपि तु इन्द्र ईश्वरो भूत्वा एषु लोकेषु राजति दीप्यते ।

॥ तदाहुः ॥

तत् तत्र ब्रह्मवादिनश्चोद्यमाहुः ।

॥ यदनेन रूपेणामुँल्लोकमभिसंभवतीऽ३ँ
अथ केन रूपेणेमँल्लोकमाभवतीऽ३ँ ॥

यत् साधु । केनानेनप्रश्नौ प्लुतौ सानुनासिकौ । सम्भवः संवर्गः ।

---

१. 'चराणामधि' क, ख. २. 'भूतेषु' ट. ३. 'वती' छ, 'वती ३' ज, 'वती' झ. ४. 'वँती' छ. 'वती ३' ज, 'वती' झ. ५. 'वः समवर्गः' क, ख.

---

* 'स पुमान्विस्रसा हैव जीवन्नेव विस्रस्य मनुष्यत्वाद्यभिमानं सर्वात्मना परित्यज्य प्राणदेवो हिरण्यगर्भोऽस्मीत्याभिमानिकं साक्षात्कारं प्राप्यास्माल्लोकाद्दृश्यमानात्प्रैति' इति सायणः ।

आभवोऽभिव्याप्तिः । अस्माल्लोकद्वयप्राप्तिश्रुताध्यात्मम् । सा केन रूपेणेत्यर्थः ।

परिहरति—

॥ तद्यदेतत्स्त्रियाँल्लोहितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्न बीभत्सेताथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात्तस्मान्न बीभत्सेत ॥

विवाहेऽस्ति[1] वरेणोक्तो मन्त्रो गृह्ये स पठ्यते ।
*'द्यौरहं पृथिवी त्व'मिति ब्राह्मणे चाध्यगीष्महि ॥

§'अग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिव' इति च । तेन वधूवरगतशुक्लशोणितयोः अग्न्यादित्यदृष्टिरुच्यते । शुचित्वबुद्ध्या या जुगुप्सा च निषिध्यते एकस्माद्धातोः । अपरेण लोहितशुक्लयोः प्रत्यवमर्शः । जुगुप्सार्थत्वादपादानत्वम् ।

अग्निसूर्यरसोक्तिश्च शुद्ध्यै देहस्य वर्ण्यते ।
ज्ञानकर्मान्वितस्यास्य सम्यक्सम्पूजनाय च ॥

तत्र च,

॥ सोऽयमात्मेममात्मानममुष्मा आत्मने सम्प्रयच्छ-त्यसावात्मामुमात्मानमिमस्मा आत्मने सम्प्रयच्छति तावन्योन्यमभिसम्भवतः ॥

---

१. 'हेऽस्ति परे' क, 'विवस्ति परे' ब.

---

* आश्वलायनगृह्यसूत्रम् १. ५. ५. § ऐ० ब्रा० २५. ७.

इदमदोभ्यां मातापित्रोर्निर्देशः। आत्मेति च शुक्रशोणितयोः। इदमेवमित्यर्थः।

सम्भोगकाले स्त्रीपुंसावन्योन्यस्नेहसंयुतौ।
अन्योन्यं स्वरसं दत्त इति लोकद्वयान्वयः॥

निगमयति—

॥ अनेनाह रूपेणामुँल्लोकमभिसम्भवत्यमुनो रूपेणेमँल्लोकमाभवति॥

*अह खलु। रूपेण प्रकारेण। अमुना। $उ पुनः।

इति सप्तमः खण्डः।

॥ तत्रैते श्लोकाः ३॥

अत्रोक्तेऽर्थे भवन्त्येता ह्यपदक्रमिता ऋचः।
अपदक्रमितगाथा श्लोक इत्यपि कथ्यते॥

¶यदक्षरं पञ्चविधं समेति युजो युक्ता अभि यत्संवहन्ति।

---

१. 'रूपेणामुं' ङ.

---

* 'अहशब्द एवकारार्थः' इति सायणः।

$ 'उकारोऽपिशब्दार्थः' इति सायणः।

¶ 'न क्षरति न विनश्यतीत्यक्षरं प्राणदेवतातत्त्वम्। सोऽयं प्राणदेवः पञ्चभूतकार्यत्वेन पञ्चविधं यच्छरीरं समेति सम्यक्प्राप्नोति। उपासकस्य शरीरमध्ये वर्तत इत्यर्थः। युज्यन्ते शरीराख्यरथे बध्यन्त इति युज इन्द्रियाश्वाः

सत्यस्य सत्यमनु यत्र युज्यते तत्र देवास्सर्व एकं
भवन्ति ॥

यत् शरीरं कर्म। अक्षरं क्षररहितं, पञ्चविधं पृथिव्यप्तेजोवाय्वाकाशात्मकं कर्तृ। समेति प्राप्नोति। किञ्च, युजः समाहिता वागाद्या युक्तास्संबद्धाः अभि[1] प्रति यत् संवहन्ति, सुखदुःखादि प्रापयन्ति। किञ्च, सत्यस्य सत्यमतिपरमार्थरूपं ब्रह्म अनु सदा यत्र शरीरे युज्यते उपास्यते तत्र शरीरे देवास्सर्वे इन्द्रादय एकमात्मानमेकत्वं वा भवन्ति प्राप्नुवन्ति।

यदक्षरादक्षरमेति युक्तं युजो युक्ता अभि यत्संवहन्ति[2] ।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवास्सर्व
एकं भवन्ति ॥

*अक्षरभूतभूतेभ्योऽक्षरं ब्रह्म कर्तृ। यत् शरीरम्। स्थानत्वेन एति परिगृह्णाति। युक्तं सुष्ठु। शेषं पूर्ववत्।

---

१. 'भि यत्प्रति' क, घ. २. 'यत्संभवन्ति' घ.

"इन्द्रियाणि हयानाहुः" [का० ३-४] इति च श्रुत्यन्तरम्। ते चेन्द्रियाश्वा युक्ताः परमेश्वरेण शरीररथे संयोजिताः सन्तो यच्छरीरमभिसंवहन्ति अभितः सर्वासु दिक्षु सम्यङ्नयन्ति। किञ्च यत्र शरीरे सत्यस्य सत्यं परब्रह्मस्वरूपमनु युज्यते प्राणदेवतामनु शरीरेऽवस्थाप्यते' इति सायणः।

* 'पञ्चम्यन्तेनाक्षरशब्देन कदाचिदपि विनाशरहितो द्वितीयसत्यशब्दवाच्यः परमात्मोच्यते। प्रथमान्तेनाक्षरशब्देन व्यवहारकाले बाधरहितः प्रथमसत्यशब्दवाच्यः प्राणोऽभिधीयते। सोऽयं परमात्मन उत्पन्नः प्राण इन्द्रियैर्युक्तमुपासकसंबन्धि यच्छरीरमेति प्राप्नोति। युजो युक्ता इत्यादि पूर्ववत्।' इति सायणः।

किञ्च,

यद्वाच ओमिति यच्च नेति यच्चास्याः क्रूरं यदु
चोल्बणिष्णु ।
तद्वियूया कवयो अन्वविन्दन्नामायत्ता समतृप्यञ्छृतेऽधि ॥

ओमिति यत्सत्यरूपममृतरूपं नेति च यत् यच्चास्या[1] वाचः क्रूरं छिन्धि[2] भिन्धि जहीत्यादिरूपं[3] यद् उ पुनः उल्बणिष्णु आक्रोशपरुषादिरूपं तत्सर्वं[1] वियूय त्यक्त्वा । दार्घः संहितः । कवयो मेधाविनः । *अनु सदा । अविन्दन्नुपलब्धवन्तः । किं नाम । अकारादिवाङ्मयम् । आयत्ताः यत्नवन्तः । जसो डा[4] । किञ्च, समतृप्यन् तृप्ता अभवन् । कस्मिन् कृते । (श्रु ? शृ)ते अधि परिपक्के ज्ञाने । अधिगम्य वस्त्विति शेषः ।

किञ्च,

§यस्मिन्नामा समतृप्यञ्छृतेऽधि तत्र देवास्सर्वयुजो
भवन्ति ।

---

१. ' स्या क्रूरं ' क. २. ' न्धि जहीत्या ' ख, घ. ३. ' जि ' घ.
४. ' डाः ' घ.

---

* ' प्राणतत्त्वमन्वविन्दन्ध्यात्वा लब्धवन्तः । ते च कवयो नामायत्ताः प्राणदेवतानाम्नोऽकारस्याधीनाः सन्तोऽकारो वै सर्वा वागित्याद्युक्तप्रकारेण प्राणरूपमकारमेव ध्यायन्तः श्रुते यथोक्तश्रुतिप्रोक्ते प्राणतत्त्वेऽभि समतृप्यन् । आधिक्यं यथा भवति तथा तृप्तिं प्राप्ताः ' । इति सायणः । अत्र मोक्षप्रदानुसारेण समतृप्यञ्छृतेऽधि इति मूलपाठः । सायणभाष्यानुरोधेन समतृप्यञ्छ्रुतेऽधि इति मूलपाठेन भवितव्यम् इति प्रतिभाति । ' समतृप्यञ्छृतेऽधि ' Mss.

§ ' श्रुते श्रुतिप्रोक्ते यस्मिन्प्राणतत्त्वे नामा पूर्वोक्तस्य नाम्नोऽकाररूपस्याधीनाः कवयोऽधिसमतृप्यन्, तत्र तस्मिन्प्राणतत्त्वे देवा अग्न्यादयः सर्वयुजः सर्वेणापि प्रकारेण युक्ता भवन्ति । सर्वेऽपि देवा [अ] विशेषेण प्राणस्वरूपा

तेन पाप्मानमपहत्य ब्रह्मणा स्वर्गँल्लोकमप्येति विद्वान् ॥

नामा वाङ्मयाभ्यासेन भृते ज्ञाने यस्मिन्नधिगते समतृप्यन् तत्र ब्रह्मणि देवाः सर्वयुजः सर्वात्मना युक्ता भवन्ति । किञ्च, तेन ब्रह्मणा पाप्मानमुपद्रवमपहत्य स्वर्गं स्वरिति सर्वाख्या, तद्गतं स्वर्गं सर्वगमिति । लोकम् । कर्मणि घञ् । सर्वैर्द्रष्टव्यम् । अप्येति प्राप्नोति विद्वान् ज्ञानयुक्तः ।

किञ्च,

> नैनं वाचा स्त्रियं ब्रुवन्नैनमस्त्रीपुमान्ब्रुवन् ।
> पुमांसं न ब्रुवन्नेनं वदन्वदति कश्चन ॥

एनं वाचा वदन् स्त्रियं ब्रुवन् न स्यात् । अस्त्रीपुमान् । नपुंसकमित्यर्थः । अमर्थे सुः । नपुंसकं ब्रुवंश्च न स्यात् । तथा पुमांसं ब्रुवंश्च न स्यात् ।

> नैव स्त्री न पुमानात्मा नैव चैतन्नपुंसकम् ।

इत्युक्तं भवति । समामनन्ति चाथर्वणिकाः—

> *'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
> वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्' ॥

इति ।

इत्येवमुपासकेन चिन्त्यमानत्वात् । तेन प्राणोपाधिकेन ब्रह्मणा पाप्मानं हिरण्यगर्भप्राप्तिप्रतिबन्धकं सर्वं कर्मजातमपहत्य विनाश्य विद्वानुपासकः स्वर्गं लोकं हिरण्यगर्भस्वरूपभूतमप्येति प्राप्नोति' इति सायणः । अत्रापि श्रुतेऽधि इति सायणभाष्यानुरोधिपाठेन भाव्यम् । श्रुतेऽधीति मोक्षप्रदानुरोधी पाठ एव मूलपुस्तकेषु दृश्यत इति ज्ञेयम् । * गोपथब्राह्मणम् १. १. २६.

। अः[1] इति ब्रह्म तत्रागतमहमिति ॥

सर्वैश्शब्दैरवाच्यश्चेत्केन तर्हि तदुच्यताम् ।
इति चोद्य(न्नि ? नि)रासाय त्रिष्टुबेकपदोदिता ॥

अ इति शब्देन ब्रह्मोच्यताम् । *विसर्जनीयः छान्दसः । कुत इत्याह– तत्र ब्रह्मणि । आगतं सङ्गतम् । तदपि कुतः– अहम् । शब्दो यस्मादिति शेषः ।

अहमित्युच्यते जीवस्तस्माद् ब्रह्मवाचकः ।
अं[2] ब्रह्म यज्जिहीते यं पुण्यैः पापैर्जहाति च ॥

भिन्नस्ततस्त्वभिन्नो वा भिन्नाभिन्नो हि वा ततः ।
अस्य दासस्स एवायं स्यान्निरणाय न कैश्चन(?) ॥

अशब्दोपपदा[3] घो ष्टो हैंको[4] वानुपसर्गकः (?) ।
इति श्लोकसमाप्त्यर्थः पञ्च श्लोकास्सपादकाः ॥

॥ तद्वा इदं बृहतीसहस्रं सम्पन्नम् ॥

पूर्ववत् ।

---

१. 'आ इति ब्रह्म तत्रागतम' ङ २. 'अं' घ.
३. 'दान्घोष्टो' घ. ४ 'हा' घ.

---

* 'प्रथमाविभक्त्यन्तो योऽयमकारः सोऽयं प्राणोपाधिकस्य ब्रह्मणो वाचक- नामत्वेन निर्दिश्यते । यथा हिरण्यगर्भः सर्वप्राणिष्वनुगतः "सर्वाहंमानी हिरण्यगर्भः" [नृसिं० उत्त० ५] इति श्रुतेः । तथैवायमकारः सर्वेषु कका- रादिष्वनुगतत्वेन हिरण्यगर्भवद्वक्तुं योग्यस्तस्मादकारेण प्राणोपाधिकं ब्रह्मानु- सन्धाय तत्र तस्मिन्ब्रह्मण्यहमित्येतदुपासकस्वरूपवाचकं पदमागतं प्राप्तं यथा भवति तथा प्राणदेवं व्यवहरेत् ।' इति सायणः ।

॥ तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशत-मक्षराणां सहस्राणि भवन्ति । तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति ॥

पुरुषायुषश्च तावन्त्यह्नां सहस्राणि भवन्ति, षट्त्रिंशत्सहस्राणि ।

॥ जीवाक्षरेणैव जीवाहृशाप्नोति । जीवाह्ना जीवाक्षरमिति ॥

*जीवाक्षरमकारम् । जीवप्रतिपादकाहंशब्दतः उपलब्धत्वात् । जीवाहं महाव्रतमिदमाहुरिति सिद्धम् ।

॥ $अनकाममारोऽथ देवरथः ॥

उच्यत इति शेषः ।

अर्थ देवैस्तु वागाद्यैर्निर्मितो रथ उच्यते ।

अनकाममारः कामेन इच्छया मृतिर्मारो यस्य ज्ञानवतां स[2] काममारः

१ 'थ दै' क. २. 'स काममारः ततोऽन्योऽनकाममारः । नलोपो' क, 'स कममर इ काममारोऽकाममारः ततोऽन्योऽनकाममारः । नलोपो' घ

* 'एवं सत्यकाररूपेणैव जीवाक्षरेणैव महाव्रताख्यं जीवाहः प्राप्नोति । महाव्रताङ्गभूतबृहतीसहस्ररूपप्राणस्याकाररूपत्वेनोपासितत्वात् । तेन च जीवाह्ना महाव्रताहर्गतबृहतीसहस्ररूपप्राणोपासनेन जीवाक्षरं सर्वप्राणि-जीवनहेतुभूतमविनश्वरं प्राणतत्त्वं प्राप्नोति' इति सायणः । $ 'देवस्य प्राणस्य हिरण्यगर्भस्य रथो देवरथः । स च कीदृशोऽनकाममारो हिरण्यगर्भ-पदादर्वाचीनानिन्द्रलोकचन्द्रलोकभूलोकादिगतान्कामान्मारयतीति काममारो न काममारोऽकाममारः । कामप्रसादक इत्यर्थः । तद्विपरीतोऽनकाममारः । सर्वथा नाशयत्येव कामानित्यर्थः । न खलु हिरण्यगर्भं प्राप्तः कश्चिदप्यर्वाचीनं लोकं कामयते' इति सायणः ।

कामतो मरणयुक्तत्वात्, न काममारोऽकाममारः ततोऽन्योऽनकाममारः । *'नलोपो नञः' । a'तस्मान्नुडचि' । काममार एवेत्यर्थः ।

॥ तस्य वाग्धुद्धिः ॥

अग्रतो दीर्घकाष्ठमुद्धिः यत्राश्वा[1] बलीवर्दा वा युज्यन्ते । उत्र b'उप[2]सर्गे घोः किः' । कयन्तो घुः पुमान् । स वाक् ।

॥ श्रोत्रे पक्षसी ॥

पक्षौ चक्रे ।

॥ चक्षुषी युक्ते ॥

अश्वौ ।

॥ मनः संग्रहीता ॥

सारथिः । †'हृग्रहोर्भश्छन्दसि' इति न भवति, छन्दस्त्वादेव ।

॥ तदयं प्राणोऽधितिष्ठति ॥

तत् । अमो लुक् । लिङ्गव्यत्ययो वा । तम् ।

॥ तदुक्तमृषिणा ॥

---

१. 'श्वा वा युज्यन्ते' क, 'श्वा वा बलीवर्दा युज्यन्ते' घ.
२. 'उत्सर्गे' क, घ.

---

* पा० सू० ६. ३. ७३. a पा० सू० ६. ३. ७४.
b पा०. सू० ३. ३. ९२. † पा० सू० वा० ३. १. ८४.

। *आ तेन यातं मनसो जवीयसा
+निमिषश्चिज्जवीयसेति जवीयसेति ॥

अत्र रथवर्णने द्वे ऋचावाकृष्टे । ऋषिरत्र मन्त्रः । तद्दर्शिनी घोषा वा काक्षीवती गोपवनश्च ।

आ तेनेति जगत्यास्तौद्घोषा नामाश्विनावृषिः ।
तमेवास्तौद्गोपवनो गायत्र्या निमिषाद्यया ॥

अनयोस्त्वर्थः हे अश्विना अश्विनौ । औङ आ । मनसो जवीयसा वेगवत्तरेण[1] यं रथं युवयोः ऋभवः शिल्पकाराश्चक्रुः । यस्य रथस्य योजने सति दिवो दुहिता उषा जायते । किञ्च उभे रात्र्यहनी सुदिने कल्याणे । जायत इति प्रकृतमर्थाद्विपरिणम्यते । जायेते । तेन रथेन आयातमिति । निमिषश्चिद् । हे अश्विना । पूर्ववदश्विनौ । निमिषश्चिज्जवीयसा निमेषादपि वेगवता रथेनायातम् । वां युवयोः

---

१ 'ओङ् आ' घ २. 'ण तेन रथेनायातमिति । निमिषश्चित् । हे अश्विना । पूर्ववदश्विनौ । निमिषश्चिज्जवीयसा निमेषादपि वे योजने सति दैवो दुहिता उषा जायते । किञ्च सुदिन्वे कल्याणे । जायत इति प्रकृतमर्थाद्विपरिणम्यते । जायेयते । तेन रथे' इति यं रथमित्यारभ्य आयातमित्यन्तस्य स्थाने कघपाठयोर्दृश्यते । कपाठस्थदैवो दुहितेत्यस्य स्थाने दवो इति, सुदिन्वे इत्यस्य स्थाने सुदिने इति, जायेयते इत्यस्य स्थाने जायते इति च घपाठे व्यत्यासः ।

---

* 'आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना । यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥ (ऋक्सं० १० ३९ १२) + निमिषश्चिज्जवीयसा रथेना यातमश्विना अन्ति षद्भूतु वामवः । (ऋक्सं ८. ७३. २)

(क १ * अवः) समृद्धिरस्माकमन्तिषत् समीपवर्ति भूतु । शब्लुक् । [§] 'भूसुवोस्तिङि' । द्विरुक्तिरुक्तार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायामात्मोपनिषदि
तृतीयोऽध्यायः ॥

अथात्मोपासनार्थाय स्वात्मवृत्तान्तमाह ह—

॥ आत्मा वा इदमेक एवाग्र आसीन्नान्य-
त्किञ्चन मिषत् ॥

£ आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि ।
यत्नेऽर्केऽग्नौ मतौ वातेऽपीति नैघण्टुका विदुः ॥

दशार्थमात्मशब्दं तु परमात्मात्र कथ्यते ।

अग्रे सृष्टेः प्राक् । इदं सर्वमात्मैवासीत् । ¶ नान्यत्किञ्चन मिषत्

---

१. 'स' घ.   २. 'पावेपोति' ब.

---

* 'अवो रक्षणम्' इति सायणः ।   § पा० सू० ७. ३. ८८.

£ वैजयन्त्यां व्यक्षरकाण्डे पुंलिङ्गाध्याये ६.   ¶ 'नान्यत् प्रकृता-दात्मनो विलक्षणं किञ्चन किञ्चिदपि वस्तु न मिषत् । धातूनामनेकार्थत्वात्ना-सीदित्युक्तं भवति' इति सायणः । 'नान्यत् किञ्चन किञ्चिदपि मिषत् निमिषद्व्यापारवद् इतरद्वा यथा सांख्यानामात्मपक्षपाति स्वतन्त्रं प्रधानं, यथा

निमेषवत् प्राणिजातं न, नासीत्। उपलक्षणमिदम्। स्थावरश्च नासीत्।

॥ स ईक्षत लोकान्नु सृजा इति ॥

स एक आत्मा लोकान्नु सृजा इति ईक्षत । नु क्षिप्रम्। सृजे। मिप इट्। छन्दस्त्वादाण्न। लोकसृष्टिं करवाणीत्यैक्षतेत्यर्थः।

॥ स इमाँल्लोकानसृजत अम्भो मरीचीर्मरमापः ॥

असृजत। तिपस्तः। सृष्टवान्। इमानम्भआदीन् लोकान्। आपः। शसो जस्।

तानम्भआदीन्विविच्य व्याचष्टे—

॥ अदोऽम्भः परेण दिवं द्यौः प्रतिष्ठा ॥

महर्जनस्तपरस्सत्यमिति यत्तु दिवः परम्।

* सुकर्मणां प्रतिष्ठा द्यौश्चेदमम्भःप्रतिष्ठितम् ॥

॥ अन्तरिक्षं मरीचयः ॥

१. 'द्योः प्र' ठ.

च काणादानामणवः, न तद्वदिहान्यदात्मनः किंचिदपि वस्तु विद्यते। किन्तर्ह्यात्मैवैक आसीदित्यभिप्रायः'। इति श्रीशङ्करः।

* 'एतत्सर्वमम्भश्शब्दवाच्यम्। लोकेषु पञ्चभूतानां साधारणत्वेऽपि जलस्यास्मदुपलब्धियोग्यत्वेन प्राधान्यमभिप्रेत्यादोऽम्भ इत्युक्तम्। उपरितनलोकाद्वृष्टिद्वारेणागतमम्भ एवास्माभिः साक्षादुपलभ्यते, न तु भूतान्तरम्' इति सायणः।

निशाकरदिनकृता युक्तं खं तु मरीचयः ।

॥ पृथिवी मरः ॥

अस्यां म्रियन्त इत्येव पृथिवी *मर उच्यते ।

मृङोऽधिकरणेऽच् ।

॥ या अधस्तात्ता आपः ॥

भुवोऽधस्तात्तु पातालास्समोक्ता आप इत्युत ।

¶ 'निष्कलं निष्क्रियं शान्तम्' इति निष्क्रियत्वश्रुतिर्वदेव a'एषं[1] देवो विश्वकर्मा महात्मा' b'द्यावाभूमी जनयन्देव एकः' 'यथावशं[2] चरति देव एष' इति[3] तस्य च विक्रियत्वश्रुतेः सृष्ट्युपपत्तिः ।

॥ स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति ॥

स सृष्टलोक एवमीक्षत । आण्न । ऐक्षत । इमे नु तावल्लोकाः सृष्टा नुं[4] अथ लोकपालान्सृजै ।

निर्णाय(का) विनश्येयुः क्षिप्रं स्रक्ष्यामि नायकम् ।

इति ।

---

१. 'वदेष देवो वि' क　　२. 'शो विश्व' ख, घ.
३. 'ति स च विक्रि' क, घ.　　४. 'नु अधि लोक' घ.

---

* 'भूलोकवर्तिनां प्राणिनां सहसा म्रियमाणत्वान्मरशब्देन पृथिव्युपलक्ष्यते' इति सायणः । 'पृथिवी मरः म्रियन्तेऽस्मिन् भूतानीति' इति श्रीशङ्करः ।

¶ श्वेताश्वतरोपनिषत् ६. १९.　　a श्वेता० उ० ४. १७.

b श्वेता० उ० ३. ३.

ततः,

॥ सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत ॥

अद्भ्यः। आप्नोतेः क्विप् ह्रस्वश्च। व्याप्तृभ्यो महाभूतेभ्य एव *पुरुष देवताश्रयं सम्यगुद्धृत्यामूर्च्छयत् मूर्तिमकरोत्।

॥ $तमभ्यतपत् ॥

पुरुषं शकुनाण्डाभं पाणिना सोऽभ्यताडयत्।

॥ तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डम् ॥

मुखं पाणिहतं तस्य निर्भिन्नं शकुनाण्डवत्।

॥ +मुखाद्वाक् ॥

अजायतेति शेषः।

---

१. 'श्रयरूपं' ख.

---

* 'पुरुषं पुरुषाकारं विराट्पिण्डं समुद्धृत्यामूर्च्छयन्मूर्तं कठिनमकरोत्' इति सायणः। $ 'तं विराट्पुरुषदेहमभ्यतपदभितः तत्तच्छिद्रतद्गतेन्द्रियतदभिमानिदेवतासृष्ट्यर्थं स परमेश्वरः पर्यालोचितवान्। पर्यालोचनमेव तप इति पूर्वमुक्तम्।' अभितः पर्यालोचितस्य विराट्पिण्डस्य मुखं छिद्रं निरभिद्यत' इति सायणः। 'तं पिण्डं पुरुषविधमुद्दिश्य अभ्यतपत् अभिध्यानं सङ्कल्पं कृतवानित्यर्थः' 'यस्य ज्ञानमयं तपः' इति श्रुतेः। तस्याभितप्तस्येश्वरसङ्कल्पेन तपसाभितप्तस्य मुखान्निरभिद्यत मुखाकारसुषिरमजायत' इति श्रीशङ्करः। + 'तस्मान्मुखच्छिद्राद्वागिन्द्रियं निष्पन्नम्' इति सायणः। 'मुखाद्वाक्करणमिन्द्रियं निरवर्तत' इति श्रीशङ्करः।

॥ *वाचोऽग्निः ॥

अजायत ।

॥ नासिके निरभिद्येताम् ॥

बिलापेक्षं द्वित्वम् ।

॥ नासिकाभ्यां प्राणः ॥

अजायत ।

॥ प्राणाद्वायुः । अक्षिणी निरभिद्येताम् ॥

अक्षि नेत्रस्थानम् ।

॥ अक्षीभ्यां चक्षुः ॥

इन्द्रियम् । §'ई च द्विवचने' ।

॥ चक्षुष आदित्यः । कर्णौ निरभिद्येताम् ॥

स्थानद्वयम् । शीर्ष्णः[1] अभवताम् ।

॥ कर्णाभ्यां श्रोत्रम् ॥

इन्द्रियम् ।

॥ श्रोत्राद्दिशः ॥

---

१. 'र्ष्णे' क, घ.

---

* 'अग्निर्देवता निष्पन्ना' इति सायणः । 'तदधिष्ठाताग्निस्ततो वाचो लोकपालः' इति श्रीशङ्करः ।　　§ पा० सू० ७. १. ७७.

अभवन् ।

॥ त्वङ्निरभिद्यत । त्वचो *लोमानि ॥

अजायन्त ।

। लोमभ्य ओषधिवनस्पतयः ॥

अभिद्यन्त ।

॥ हृदयं निरभिद्यत ॥

§ उरः ।

॥ हृदयान्मनो । मनसश्चन्द्रमाः । नाभिर्निरभिद्यत ।
नाभ्या अपानः । अपानान्मृत्युः । शिश्नं
निरभिद्यत । शिश्नाद्रेतः ॥

अजायत ।

॥ रेतस आपः ॥

अजायन्त ।

सृष्टा क्रमेण सम्प्रोक्ता गोलकेन्द्रियदेवताः ।

प्रथमः खण्डः ।

---

* 'लोमशब्देन तदाधारभूतत्वङ्निष्ठं स्पर्शनेन्द्रियमुच्यते' इति सायणः ।

§ 'हृदयमन्तःकरणाधिष्ठानम्' इति श्रीशङ्करः । 'हृदयमष्टदलं कमलम्' इति सायणः ।

॥ ता एता देवतास्सृष्टा *अस्मिन्महत्यर्णवे प्रापतन् ॥

अग्न्याद्या देवता एतास्सृष्टास्संसारसागरे ।
महत्यस्मिन्प्रपतिताः स्वव्यापारप्रवृत्तये ॥
प्राणिजातानुग्रहाय महाविभवसंयुताः ।

॥ तमशनापिपासाभ्यामन्ववार्जत् ॥

आत्मा तं पुरुषं सृष्टं क्षुधा वै समयोजयत् ।
पिपासया चाशनेति त्वशनायैकदेशगीः ॥

अर्जतेः संसर्गार्थादन्तर्णीतण्यर्थाल्लङ्याट्[1] ।

तत्रान्तरे,

॥ ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मि-
न्प्रतिष्ठिता अन्नमदामेति ॥

एनं स्रष्टारमात्मानमग्न्याद्या अब्रुवन् खलु ।
स्थानं नश्चिन्तय विभो! यस्मिन्सम्यक्प्रतिष्ठिताः ॥
वयमन्नभुजः स्यामेत्येतच्छ्रुत्वा स ईश्वरः—

॥ ताभ्यो गामानयत् ॥

भोगायतनत्वेन ।

---

१. 'त्' Mss.

---

* 'महत्यर्णवे समुद्रवदत्यन्तविस्तृते विराड्देहे प्रापतन्प्रकर्षेण पतिता अभ-
वन्' इति सायणः ।

॥ ता अब्रुवन्न वै नोऽयमलमिति ॥

अयं नालं न पर्याप्तः । न इत्यलंयोगे चतुर्थी ।

॥ ताभ्योऽश्वमानयत् ॥

पूर्ववत् ।

स पुनः,

॥ ताभ्यः पुरुषमानयत् ॥

अथ,

॥ ता अब्रुवन्सुकृतं बतेति ॥

अहो त्वया सुष्ठु कृतं पुरुषायतनं शुभम् ।

॥ पुरुषो वाव सुकृतम् ॥

शोभनकर्मणामनुष्ठातृत्वात् ।

॥ ता अब्रवीद्यथायतनं प्रविशतेति ॥

यूयं यथास्थानं प्रविशतेति ता देवताः प्रत्यब्रवीत् । आत्मेत्यर्थः ।

ततः,

॥ अग्निर्वाग्भूत्वा मुखं प्राविशत् ॥

विशिस्तुदादिः ।

॥ वायुः प्राणो भूत्वा नासिके प्राविशत् ॥

घ्राणं प्राणः ।

---

१. ' अयमलपर्याप्तः ' क, ग.

॥ आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशदोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशत् ॥

सङ्कल्पविकल्पात्मकं मनः।

॥ मृत्युरपानो भूत्वा नाभिं प्राविशत् ॥

बहिर्वर्ती अन्तःप्रविष्टो वायुरपानः।

॥ आपो रेतो भूत्वा शिश्नं प्राविशन् ॥

प्रविष्टवत्यः।

गोलेष्विन्द्रियदेवानां प्रवेश उपवर्णितः।

॥ तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ॥

क्षुत्पिपासे तमब्रूतामात्मानं नावपि प्रभो।
अभि सम्यक्प्रजानीहि स्थानं चिन्तय देहि च ॥

स च,

॥ ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति ॥

ते क्षुत्पिपासे प्रत्युक्तवान् एतास्वग्न्यादिषु देवतास्वेव वां युवाभ्यामाभजामि। उक्तमर्थं स्पष्टयति -- एतासु भागिन्यौ करोमीति।

॥ तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्या-

वेवास्यामशनापिपासे [1]भवतः ॥

यत्र कापीति शेषः। तत्र सर्वत्र। अभ्यागतभोजनवदिति भावः।

द्वितीयः खण्डः।

॥ स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥

स आत्मा। आण्न। ऐक्षत। नु अथ। अन्नमेभ्य एषामर्थाय सृजै सम्पादयामि।

एवमीक्षित्वा,

॥ *सोऽपोऽभ्यतपत् ॥

ता भूततन्मात्रा अभ्यतपत् अताडयत्।

॥ ताभ्योऽभितप्ताभ्यो मूर्तिरजायत। या वै सा मूर्तिरजायतान्नं वै तत्। §तदे[2]नत्सृष्टं परा[3]ङत्यजिघांसत् ॥

---

१. 'भवतम्' ट. २. 'त' घ. ३. 'रात्य' ट.

---

* 'अभ्यतपत् सर्वतः पर्यालोचनमकरोत्'। इति सायणः। 'अप उद्दिश्याभ्यतपत्' इति श्रीशङ्करः। § 'यन्नु मूषकादिरूपं तदन्नं तदेतन्मार्जारादीनां भोक्तॄणां स्ववधहेतुत्वं निश्चित्य तेभ्यः पराङ्मुखं सदत्यजिघांसदतिशयेन हन्तुं गन्तुमैच्छत् पलायितुं प्रारभतेत्यर्थः'। इति सायणः। 'तदेनदन्नं लोकलोकपालानामर्थेऽभिमुखे सृष्टं तद्यथा मूषकादि मार्जारादिगोचरं सन्मृत्युरस्मादिति मत्वा परागञ्चति इति पराङ् सदत्यजिघांसत् अतिगन्तुमैच्छत्। पलायितुं प्रारभत इत्यर्थः' इति श्रीशङ्करः।

नपुंसकैकवचनमे(त ? न)त्सोरमि वै पदम् ।
पलायनप्रवृत्तं तदन्नश्चाभूत्पराङ्मुखम् ॥

*'अभ्यासाच्चे'ति कुत्वं स्याद्दीर्घो[1]'ऽज्झनगमां सनि'।
हन्तिर्गतौ हन्तुमैच्छन् उकारः छान्दसः पराङ् ॥

॥ तद्वाचाजिघृक्षत ॥

तत् पराङ्मुखान्नं कर्म । वाचा वागिन्द्रियेण ।

§'सनि ग्रहगुहोश्चानिड्' ¶'ग्रहिज्या' संरुदे निकित्(?) ।

॥ तन्नाशक्नोद्वाचा ग्रहीतुम् । स यद्धैनद्वाचाग्रहैष्य-
दभिव्याहृत्य हैवान्नमत्रप्स्यत् ॥

यत् यदि । ह खलु । अभिव्याहृत्य उक्त्वा । तृप्तो भवेत्सर्वो लोकः ।

तु[3]मुनीह ग्रहे[4] (दी ? दी)र्घ एत्वं स्ये (छ ? छा)[5]न्दसत्वतः ।
हेतौ भूते लिङ्निमित्तेऽग्रहैष्यल्लङि वै पदम् ॥

अत्रप्स्यदनुदात्तस्य[6] हेतुमत्यत्र लङ् भवेत् ।

---

१. 'दीर्घोज्झ' Mss.
२. 'निति' क.
३. 'मुनी हो ग्र' क, घ.
४. 'हे दीर्घ एत्वं' क.
५. एत्वन्तस्ये छ' ख.
६. 'स्यदं हेतु' Mss.

---

* पा० सू० ७. ३. ५५.
‡ पा० सू० ६. ४. १६.
§ पा० सू० ७. २. १२.
¶ पा० सू० ६. १. १६.

॥ तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुम्। स यद्धैन-
त्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत ॥

अभिप्राण्य घ्रात्वा ।

॥ तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रहीतुम् । स यद्धै-
नच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत । तच्छ्रोत्रेणाजिघृ-
क्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम् । स यद्धैनच्छ्रोत्रेणाग्र-
हैष्यत श्रुत्वा हैवान्नमत्रप्स्यत । तत्त्वचाजिघृक्षत्तन्नाश-
क्नोत्त्वचा ग्रहीतुम् । स यद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वा
हैवान्नमत्रप्स्यत । तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसा
ग्रहीतुम् । स यद्धैनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्र-
प्स्यत। तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुम्।
स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत ॥

विसृज्य मूत्रयित्वा ।

अथ,

॥ तदपानेनाजिघृक्षत ॥

अन्तःप्रविशन्वायुरपानः ।

॥ तदावयत ॥

तत् तेन अन्नं गृहीतवान् । वायिर्ग्रहणार्थः[1]।

---

१. ' वयि ग्र ' Mss.

॥ सैषोऽन्नस्य ग्रहो यद्वायुः ॥

सोर्लुक्छान्दसः । स एषोऽन्नग्रहणे हेतुः । ग्रहेः करणेऽप् । यत् यः । वायुः अपानाख्यः ।

व्याचष्टे—

॥ अन्नायुर्वा एष यद्वायुः ॥

[*] 'छन्द (सि गुण ? सीणः') इत्युण्करणे । यत् यः वायुः ।

॥ [§] स ईक्षत कथं न्विदं मदृते स्यादिति ॥

आद् न । इदं जगत् । मत् मत्तः । ऋते विना । कथं स्यात्, न किञ्चित्स्यादिति । तस्मादत्र मया प्रवेष्टव्यमिति भावः ।

॥ [§] स ईक्षत कतरेण प्रपद्या इति ॥

केन पथा प्रविशानीति ।

अहमेव प्रविश्येदं यदि नोपलभे फलम् ।

---

१. 'सो लु' Mss.

---

* उणा० सू० २. [§] 'यदिदं देहेन्द्रियतदभिमानिदेवतदीयान्नतत्स्वीकाररूपं व्यवहारजातमस्ति तदिदं सर्वं मदृते भोगस्वामिनं जीवरूपं मां विना कथं नु नाम स्यान्न कथञ्चिदुपपद्यते । न हि नगरस्वामिनं राजानं विहाय पुरस्य वा पौरजनानां वा रचना शोभते । तस्माद्भोगस्वामिना मया जीवरूपधारिणा देहे प्रवेष्टव्यमित्यर्थः' । इति सायणः । [§] 'द्वावत्र प्रवेशमार्गौ पादाग्रं मूर्ध्नि ब्रह्मरन्ध्रञ्च । तयोर्मध्ये कतरेण केन मार्गेण प्रपद्यै प्रविशानि' इति सायणः ।

अनर्थकमिदं सर्वं स्यादित्यैक्षत स प्रभुः ॥

पुनरपि,

॥ स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति ॥

यदि वागादिशिश्नान्तैरष्टाभिर्वचनादिकम् ।
कृतं तथापि मद्दते कोऽहम्प्रत्ययगोचरः ॥

कर्ता भोक्ताहमिति वै स्यादित्यैक्षत स प्रभुः ।

॥ स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत ॥

एतम्मस्तकमध्यस्थं सीमानं शङ्खयोर्द्वयोः ।
देशं विदार्य सङ्क्रम्य देहद्वारं तयाविशत् ॥

सुषुम्नाख्या तु या नाडी तया सा प्रथिता श्रुतौ ।

*शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥

इति ।

---

* कठोपनिषत् ६. १६.

॥ *सैषा विदृतिर्नाम द्वाः ॥

अस्या द्वारः श्रुतौ नाम प्रसिद्धं विदृतिस्त्विति।

॥ तदेतन्नान्दनम् ॥

न (न्दा? न्द्या)दिभ्यो ल्युः। दीर्घश्छान्दसः। तत् नन्दनं सुखकरं परमात्ममार्गत्वात्।

॥ †तस्य त्रय आवसथास्त्रयः स्वप्नाः ॥

तस्य प्रविष्टस्यावसथाः स्थानानि। आवस(थेरसुन्? तेरथः)।

सुषुप्तिजागरौ चात्र स्वप्नौ तत्साहचर्यतः।
निद्राहीनोऽप्यनात्मज्ञः सुप्त एवेति वै विदुः॥

ते च

---

* 'अक्षिश्रोत्रादिगोलकानां भृत्यादिस्थानीयैश्चक्षुरादीन्द्रियैरधिष्ठितत्वात्स्वामिनः स्वस्य प्रवेशार्थमसाधारणं किञ्चिद्द्वारमपेक्षितमित्यभिप्रेत्य प्रीतिपूर्वकं विदारितत्वादिकमुत्कर्षं प्रकटयितुं तस्य द्वारस्य विदृतिरिति नाम सम्पन्नम्। तेन द्वारेण निर्गतस्य ब्रह्मलोकप्राप्तिद्वारा सुखप्रमानत्वादानन्दहेतुत्वेन तदेतद्द्वारं नान्दनमित्युच्यते' इति सायणः। 'मूर्ध्नि तैलादिधारणकाले अन्तस्तद्रसादिसंवेदनात् सैषा विदृतिर्विदारितत्वाद्विदृतिर्नाम प्रसिद्धा द्वाः। इतराणि तु श्रोत्रादिद्वाराणि भृत्यादिस्थानीयसाधारणमार्गत्वान्न समृद्धीनि नानन्दहेतूनि प्रसिद्धानि संवेदनहेतूनि। इदन्तु द्वारं परमेश्वरस्यैव केवलस्येति तदेतन्नान्दनम्। नन्दनमेव नान्दनमिति दैर्घ्यं छान्दसम्। नन्दत्यनेन द्वारेण गत्वा परस्मिन् ब्रह्मणीति।' इति श्रीशङ्करः।

† तस्यैवं सृष्ट्वा प्रविष्टस्य जीवेनात्मना राज इव पुरं त्रय आवसथाः जागरणकाले इन्द्रियस्थानं दक्षिणं चक्षुः स्वप्नकालेऽन्तर्मनः सुषुप्तिकाले हृदयाकाश इत्येते। वक्ष्यमाणा वा त्रय आवसथाः— पितृशरीरं मातृगर्भाशयः स्वञ्च शरीरमिति' इति श्रीशङ्करः।

॥ *अयमावसथोऽयमावसथोऽयमावसथ इति ॥

प्रसिद्धाः ।

॥ §स जातो भूतान्यभिव्यैख्यत् ॥

सः प्रभुः । जातः शोभनः[1] । भूतान्यभिव्यैख्यत् । विविधं प्राप्य सम्यक्स्थितवान् । ख्यातिः स्थानार्थः । व्यख्यदिति प्राप्ते ऐदतः छान्दसः ।

निगमयति—

॥ †किमिहान्यं वावदिषदिति[2] ॥

एवं स्थिते[3] इह लोके आत्मनोऽन्यं किं वावदिषत् । अत्यर्थं वदेदित्यर्थः । आत्मानमेव सर्वं सर्वो वदेत् । वदेर्यङ्लुगन्ताल्लेटि सिब्बहुलम्[4] ।

---

१. शोभन इत्यारभ्य छान्दस इत्यन्तं कपाठे न दृश्यते ।
२. 'ति ॥ इति । एवं' घ. ३. 'तं' ख. ४. 'ल्लोटि' Mss.

---

* अयमावसथ इत्यादिना नेत्रकण्ठहृदयाख्यानि स्थानानि हस्ताग्रेण प्रदर्श्यन्ते । तेषु हि जागरणाद्यवस्थानां निष्पत्तिः । त्रय आवसथा इत्यनेन पितृशरीरमातृशरीरस्वशरीररूपाणि वा त्रीणि स्थानानि लक्ष्यन्ते ' इति सायणः ।

§ 'स परमात्मा जातो देहप्रवेशेन जन्ममरणजागरणस्वप्नसुषुप्तिभिः संसारीभूतः सन्कदाचिदीश्वरानुग्रहाद्गुरुशास्त्रप्रसादेन स भूतान्याकाशादीनि प्राणिनश्चाभिव्यैख्यत् विवेकेन ज्ञातवान् ' इति सायणः । ' स जातश्शरीरे प्रविष्टो जीवात्मना भूतान्यभिव्यैख्यत व्याकरोत् ' इति श्रीशङ्करः ।

† 'दृश्यमानान्याकाशादीनि भूतानि प्राणदेहाश्च कुत उत्पद्यन्ते केन वा रक्ष्यन्ते कस्मिन्वा प्रलीयन्त इत्येवं शास्त्रं विविच्य सर्वस्य संसारस्य मायाकल्पितत्वाद्ब्रह्मैव सर्वस्यापि वस्तुतत्त्वम् । तस्मादिह जगति किं वा वस्तु ब्रह्मणोऽन्यद्वावदिषत् वदिष्यामि ' इति सायणः ।

॥ स एतमेव पुरुषं ब्रह्मततममपश्यत् ॥

एतं पुरुषमेव स्वाधिष्ठितत्वाद्ब्रह्मापश्यत् । कीदृशम् । *ततमं व्याप्तत्वेन मीयमानम् । माङः कर्मणि कः ।

प्रसङ्गादिन्द्रशब्दं निराह—

॥ इदमदर्शमितीँ३ तस्मादिदन्द्रो नाम ॥

§ आख्याने प्लुतः सानुनासिकः । इदन्द्र इति पृषोदरादि । इति यस्मात् ।

स्पष्टयति—

॥ इदन्द्रो ह वै नाम ॥

ततश्च ।

॥ तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण ॥

आत्मविदः । परोक्षमप्रत्यक्षम् ।

किमितीदं नाम तिरोहितम् ।

---

१. 'एतत्पुरु' क, ख. २. 'ङ्क' क, ख.
३. 'तीँ त' छ. 'ती ३ त' ज. 'ती त' झ.

---

* 'ततमम् । एकस्तकारो लुप्तः । अतिशयेन ततं विस्तृतं ततमम्' इति सायणः । ततमं तकारेणैकेन लुप्तेन तततमं व्याप्ततमं परिपूर्णमाकाशवत्प्रत्यबुध्यत अपश्यत् ।' इति श्रीशङ्करः । § 'शरीरे प्रविष्टः स जीवात्मा ब्रह्मात्मतत्त्वं साक्षात्कृत्येदमदर्शमिति वाक्येन स्वकीयमपरोक्षानुभवं प्रकटयन्परितुतोष । परितोषद्योतनार्था प्लुतिः' इति सायणः ।

॥ *परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥

¶ 'प्रत्यक्षद्विष' इति श्रुत्यन्तरम्[1] अप्रकाशरूपं नाम कर्मणोऽग्न्यादि देवता इति चाहुः । द्विरुक्तिरुक्तार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायामात्मोपनिषदि
चतुर्थोऽध्यायः ॥

उक्तात्मोपासनासिद्ध्यै वैराग्यस्य प्रसिद्धये ।
असारत्वोद्घाटनाय संसारगतिरुच्यते ॥

गर्भोपनिषदि व्यक्तं वेदे त्वाथर्वणे शुभे ।
तेजोरूपेण पुरुषो गर्भ आदौ तु तिष्ठति ॥

शुक्लशोणितसंयोगात्संभवोऽथ स्त्रियां भवेत् ।
मासत्रये तु पादादिप्रदेशाश्च भवन्ति हि ॥

मासे चतुर्थे जायन्ते कट्यङ्गुल्युदरादयः ।
गर्भस्य पञ्चमे मासि पृष्ठवंशश्च जायते ॥

---

१. 'म् । प्रकाश' क, ख.

---

* 'देवाः पूज्याः सर्वे स्वकीयं नाम गूढं कृत्वोपाध्याया आचार्या इत्यादिके परोक्षनामन्येव प्रीतिं कुर्वन्ति' इति सायणः । परोक्षप्रियाः परोक्षनामग्रहणप्रिया इव ह्येव हि यस्माद्देवाः' इति श्रीशङ्करः ।

¶ बृहदार० उ० ४. २. २.

षष्ठे नासाश्रोत्रनेत्रनखरोमाणि चैव हि ।
प्राप्ते तु सप्तमे मासि जीवात्मा गर्भ आवि (श ? शे)त् ॥

अष्टमे सर्वाङ्गपूर्तिरत्र जातो न जीवति ।
नवमे मासि त्रिज्ञानपूर्णो गर्भो भवेद्ध्रुवम् ॥

पूर्वा जातीः स्मरत्येष शतशो दुःखसंयुताः ।
नानायोनिसहस्रेषु प्रवेशं निर्गमं तथा ॥

नारकश्च महद्दुःखं स्वर्गात्पतनजं भयम् ।
दृष्टसर्वोपद्रवस्तु स्वात्मानमनुशोचति ॥

आहारा त्रिविधा भुक्ताः पीताश्च विविधा स्तनाः ।
दैवात्कचित्सुखं लब्धं दुःखं प्राप्तमनन्तरम् ॥

यदि योन्याः प्रमुच्येय सांख्यं वा पञ्चविंशकम् ।
योगं वाभिप्रपद्येय मोक्षार्थं यच्च सेव्यते ॥

यदि योन्याः प्रमुच्येय देवं नारायणं प्रभुम् ।
भगवन्तं प्रपद्ये (यं ? य) षड्विंशं पुरुषोत्तमम् ।

यन्मे परिजनस्यार्थे कृतं कर्म शुभाशुभम् ।
एकाकी तेन दह्यामि गतास्ते फलभोगिनः ॥

सर्वज्ञानाभिसम्पूर्णो दशमे मासि चागते ।
उल्बसंवेष्टितो गर्भः प्राजापत्येन वायुना ॥

प्रच्यावितः स्वकात्स्थानाद्योन्यागच्छति पीडितः ।
सूतिप्राणान्निपतितो धरण्यां कृमिको यथा ॥

---

१. 'श्र' ख, घ.

बाह्यवाताभिसंस्पृष्टो मूढो भवति मानुषः ।
न वेदयति तत्रैव शृणोति न करोति च ॥

इति ।

अत्रापि संसारगतिरुच्यते—

॥ पुरुषे[1] ह वा अयमादितो गर्भो[2] भवति यदेतद्रेतः तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजस्सम्भूतम्[3] ॥

उत्पन्नम् ।

ततश्च पिता

॥ आत्मन्येवात्मानं बिभर्ति[4] ॥

धारयति ।

॥ तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति ॥

तत् अन्नरसभूतं रेतः (तदा ? यदा) स्त्रियां सिञ्चति स्थापयति अथै-नत् जनयति । एनत् रेतः ।

॥ तदस्य[5] प्रथमं जन्म ॥

तत् तदा । अस्य गर्भस्य प्रथमं जन्म ।

॥ तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा ॥

---

१. ' कषो ' ख.
२. ' गर्भे ' ङ.
३. ' म्भूय तं ' ङ.
४. ' र्ति ॥ तद्य ' क.
५. ' यदस्य ' ङ.

आत्मभूयमात्मत्वम् । * 'भुवो भावे' इति क्यप् । उदरवदैक्यं प्रतिपद्यते ।

॥ § तस्मादेनां न हिनस्ति ॥

वाचापि ।

॥ सास्यैतमात्मानमत्र गतं भावयति ॥

अस्य पितुः । अत्र स्वकुक्षौ । आत्मानं रूपं † भावयति सम्मन्यते ।

ततश्च,

॥ सा भावयित्री भावयितव्या भवति ॥

वंशस्य भावयित्री सा गर्भिणी सर्वबन्धुभिः ।
रसवद्भोजनाद्यैस्तु पूजनीया प्रयत्नतः ॥

॥ तं स्त्री गर्भं बिभर्ति ॥

एवं हीति शेषः । तं भर्तारम् ।

॥ ¶ सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति ॥

---

* पा० सू० ३. १. १०७. § 'तस्मात्स्वशरीरत्वेनैकीभावात्कारणादेनां न हिनस्ति, उदरलग्नबाणवद्धिंसां न करोति' इति सायणः । 'तस्माद्धेतोरेनाम्मातरं स गर्भो न हिनस्ति पिटकादिवत् । यस्मात्स्तनादिस्वाङ्गवदात्मभूयं गतं तस्मान्न हिनस्ति न सम्बाधत इत्यर्थः' इति श्रीशङ्करः ।

† 'भावयति परिपालयति' इति श्रीशङ्करसायणौ ।

¶ 'स च पिताग्र एव प्रसवात्प्रागेव निष्पन्नं कुमारं जन्मनोऽग्रे प्रसवादूर्ध्वमधिभावयति अधिकत्वेन शास्त्रीयजातकर्मादिना संस्करोति' इति सायणः । श्रीशङ्करेणाप्येवमर्थवर्णनं कृतम् ।

स भार्यां पूजयन्भर्ता जन्मनोऽग्रे पूर्वमेव । कुमारम(थ ? धि)सम्यग् भावयति पुंसवनादिभिः संस्करोति ।

॥ स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येषां लोकानां सन्तत्यै ॥

कुमारपूजात्मपूजैवेत्यर्थः । सन्तत्यै अविच्छेदाय ।

॥ एवं सन्तता हीमे लोकाः ॥

कर्मणा जायते पूर्वममुं लोकं च गच्छति ।
अमुतः पुनरागत्य जायते म्रियतेऽपि च ॥

इत्यनादिर्हि संसारः सदा लोकोऽवलोक्यते ।

अतो यन्मातुरुदरात्प्रादुर्भावः

॥ तदस्य द्वितीयं जन्म ॥

तत्[1] तदा । अस्य पितुः ।

॥ सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते[2] ॥

*अस्य अनेन पित्रा । टार्थे ङस् । सोऽयमात्मा पुत्राख्यः । पुण्यकर्मार्थं प्रति, प्रतिनिधित्वेन । धीयते स्थाप्यते ।

---

१. 'तत् तदा' इति कखयोर्नास्ति । २. 'तिविधीयते' ङ.

---

* 'अस्य पितुः द्वावात्मानौ देहौ । तयोर्मध्येऽयमात्मा पुत्ररूपो देहः' इति सायणः । 'अस्य पितुः सोऽयं पुत्र आत्मा' इति श्रीशङ्करः ।

अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति ॥

इतर आत्मा प्रैति म्रियते ।

॥ स इतः प्रयन्नेव पुनर्जायते ॥

अमुष्मिन्निति शेषः । इतः अस्माल्लोकात् । प्रयन् म्रियमाणः ।

॥ तदस्य तृतीयं जन्म ॥

निषेक उदराज्जन्म परलोकगतिस्तथा ।
इति त्रिजन्मा पुरुषस्तत्पुत्रादिश्च वै तथा ॥

॥ तदुक्तमृषिणा ॥

वामदेवेन । कथम् ।

पठति—

॥ गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।
शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति ॥

गर्भे मातुरुदरे । *नु साधु । सन् विद्यमानः । अनु आनुपूर्व्या । एषां देवानाम् इन्द्रियाणाम् । विश्वा सर्वाणि । जनिमानि जन्मानि । आयसीः । जसः शस् । लोहमय्य इव दुर्गरूपाः । शतं पुरः शरीराणि । मा माम् । अरक्षन् निरुद्धवत्यः । £ अधः श्येन इव जवसा वेगेन । निरदीयं

---

* 'गर्भे नु मातुर्गर्भ एवात्रस्थितः सन् एषामग्निवाय्वादित्यादीनां देवानाम्' इति सायणः । 'गर्भे नु मातुर्गर्भाशय एव सन् । नु वितर्के देवानां वागग्न्यादीनाम्' इति श्रीशङ्करः ।

£ अध एतस्मादात्मज्ञानोदयादधस्तान्मौ

निर्गतवानस्मि। दीयतिर्गत्यर्थः।

> संसारी बहुभिर्देहैः बद्धो रूढ इवाभवम्।
> त्रिजन्मविद्गर्भ एव श्येनवन्निर्गतस्ततः॥

इति मत्वा व्याचष्टे—

॥ गर्भ एवैतच्छयानो वामदेव एवमुवाच ॥

कथं श्येनवत्स निर्गत इत्यत आह—

॥ स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मि-
न्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः
समभवत्समभवत् ॥

*भेदो विशेषः। सर्वान्कामानाप्त्वा प्राप्य। अमृतः मरणाद्युप-द्रवरहितः। द्विरुक्तिरुक्तार्था।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायामात्मोपनिषदि
पञ्चमोऽध्यायः॥

वामदेवमायसीर्लोहनिर्मितशृङ्खलासमानाः शतं पुरः शतसंख्याकानि शरीराण्यरक्षन्' इति सायणः। 'संसारपाशनिर्भेदनादधोऽधः श्येन इव जालं भित्त्वा जवसा आत्मज्ञानकृतसामर्थ्येन निरर्दाशं निर्गतोऽस्मि' इति श्रीशङ्करः।

* 'शरीरभेदाद्देहविनाशादूर्ध्वम्' इति सायणः। 'शरीरभेदात्......शरीरविनाशादित्यर्थः। ऊर्ध्वः परमात्मभूतः सन्' इति श्रीशङ्करः।

येन ज्ञानेन मुक्तोऽभूद्वामदेवो महामुनिः ।
तदाहासारसंसारदुःखमूलनिवृत्तये ॥

॥ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा ॥

उपास्तिं तु करिष्यामो वयं वै वामदेववत् ।
अत्र प्रकृतयो(रात्मा) कतरश्च भवेत्स तु ॥

॥ येन वा पश्यति येन वा शृणोति येन वा गन्धाना-
जिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु
चास्वादु च विजानाति ॥

स च कः कः स चेत्येवं शेषः स्याद्वाक्यपञ्चके ।
द्रष्टा श्रोता तथाघ्राता वक्ता ज्ञाता च कोऽन्विति ॥

इति प्रश्नं वदेयुश्चेद्वक्ष्यामस्तत उत्तरम् ।

॥ यदेतद्धृदयम् ॥

*हृदयं ब्रह्मणो नाम प्रसिद्धेर्हृदयन्निति ।
यत्तु ब्रह्मादि प्रसिद्धं तदेतत्सर्वमिष्यताम् ॥

॥ मनश्चेतत् ॥

मनः कर्तर्यसुत्रत्र दर्शनादि करोति तत् ।

---

* 'हृदयं बुद्धिः । सा चात्मनि कर्तृत्वादिधर्मारोपसाधनत्वादन्तःकरण-मित्युच्यते । तस्य बुद्धिविशिष्टस्य कर्तुरात्मनो रूपादिविषयसङ्कल्पविकल्पादि-साधनं मन इत्युच्यते । ' इति सायणः ।

॥ संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मति-
र्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश
इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥

संज्ञानं सङ्कतज्ञानमाज्ञा सम्यक्प्रशासनम् ।
*व्याप्तिज्ञानं तु विज्ञानं प्रज्ञानं शास्त्रबोधनम् ॥

ग्रन्थस्य धारणं मेधा दृष्टिरिन्द्रियतो ग्रहः ।
धृतिर्धाष्टर्यम् $ मतिर्युक्त्या वस्तुतत्त्वनिरूपणम् ॥

मनीषा विप्रकीर्णस्य ग्रन्थादेः सारसंग्रहः ।
¶ जूतिर्विचारसामर्थ्यं स्मृतिः पूर्वानुभूतधीः ॥

‡ सङ्कल्पोऽवश्यवक्तव्यं ममेदमिति धीर्मता ।
क्रतुरध्यवसायः स्यादसुः प्राणादिपञ्चकम् ॥

£ काम इच्छा वैषयिकी A वशः सर्ववशीकृतिः ।
इति षोडशनाम्नां तु निरुक्तं वै प्रचक्षते ॥

---

१. 'मात्मा' छ.   १. 'कर्त' क.

---

* 'विज्ञानमिदमस्माद्विशिष्टमित्येवमादिविवेकः' इति सायणः । 'विज्ञानं कलादिपरिज्ञानम्' इति श्रीशङ्करः । $ 'मतिर्मननं राजकार्याद्यालोचनम् । मनीषा तत्र स्वातन्त्र्यम्' इति सायणः । 'मतिर्मननं मनीषा तत्र स्वातन्त्र्यम्' इति श्रीशङ्करः । ¶ 'जूतिर्जवः आवश्यकार्येषु मनसो व्यग्रता । यद्वा जूतिर्मनसो रागादिजनितदुःखित्वम्' इति सायणः । 'जूतिश्चेतसो रुजादिदुःखित्वभावः' इति श्रीशङ्करः । ‡ 'सङ्कल्पोऽसमीचीनेऽपि वस्तुनि सम्यक्त्वेन कल्पनम्' इति सायणः । 'सङ्कल्पः शुक्लकृष्णादिभावेन सङ्कल्पनं रूपादीनाम्' इति श्रीशङ्करः । £ 'कामोऽसंनिहितविषयाकाङ्क्षा' इति सायणः । 'कामोऽसंनिहितविषयाकाङ्क्षा तृष्णा' इति श्रीशङ्करः । A 'वशः स्त्रीव्यतिकराद्यभिलाषः' इति श्रीशङ्करसायणौ ।

किञ्च,

॥ [B]एष ब्रह्मा ॥

स्रष्टा ।

॥ एष इन्द्रः ॥

वृष्टिकारी ।

॥ एष प्रजापतिः ॥

अण्डोद्भवो विराण्नाम दक्षादिदशकं तु वा ।

॥ एते सर्वे देवाः ॥

एष इत्येव ।

देवताकाण्डपठिता भूमिस्थस्वर्गवर्तिनः ।
एष एव सर्वे देवा मरुदादिप्रभेदिनः ॥

अग्न्याद्या देवपत्न्यन्ता न ह्यतोऽन्योऽस्ति कश्चन ।

तथा—

॥ इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानि ॥

महाभूतानि पञ्चापि ह्येष एवेति निश्चयः ।

B एष ब्रह्मेत्यनेन पुंलिङ्गेन ब्रह्मशब्देन 'हिरण्यगर्भः समवर्तताग्रे' [ऋक्सं० १०. १२१. १] इत्यादिशास्त्रप्रसिद्धः प्रथमशरीरी विवक्षितः । तस्य शास्त्रप्रसिद्धिं द्योतयितुमेषच्छन्दः' इति सायणः ।

॥ इमानि च क्षुद्रमिश्राणीव बीजानि ॥

इमानि प्रत्यक्षमाणानि आरम्भकाणि व्रीह्यादीनि । *इवेति । खल्वित्यर्थः ।

॥ इतराणि च ॥

क्षुद्राणि जातीनि ।

॥ इतराणि च ॥

भेतव्यानि व्याघ्रादीनि ।

॥ अण्डजा[1]नि च ॥

कुक्कुटादीनि ।

॥ जारुजानि च ॥

जरायु जारु तज्जादीनि मनुष्यादीनि ।

॥ स्वेदजानि च ॥

मत्कुणादीनि ।

उद्भिज्जानि च ॥

एकजलोपः । उद्भिज्जानि उद्भिद्यमानाज्जातानि वृश्चिकतृण-जलूकादीनि ।

---

१. 'जानि । जारु' ट. 'जातीनि' क.

---

* 'इवशब्दोऽनर्थकः' इति श्रीशङ्करसायणौ ।

तथा,

॥ अश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रम् ॥

नेत्रं प्रवृत्तिहेतुः प्रज्ञा[1] ब्रह्म यस्य तत्सर्वं प्राणि नासिकासञ्चारिवायुयुक्तम् । *पतत्रि पक्षः । स्थावरं वृक्षादि ।

॥ §प्रज्ञाने प्रतिष्ठितम् ॥

कार्यं हि कारणे तिष्ठति ।

ततश्च,

॥ ¶प्रज्ञानेत्रो लोकः ॥

लोक्यत इति प्रपञ्चो लोकः ब्रह्मकारणकः ।

ततश्च,

॥ ‡प्रज्ञा प्रतिष्ठा[2] ॥

सर्वस्य ।

---

१ ' प्रज्ञा यस्य ' क.　　२. ' प्रतिष्ठिता ' छ, ट.

---

* ' पतत्रि आकाशे पतनशीलम् ' इति श्रीशङ्करः ।

§ ' प्रज्ञाने निरुपाधिकचैतन्ये पूर्वोक्तं सर्वं जगत्प्रतिष्ठितं रज्ज्वां सर्पवदारोपितम् । अनेनोत्पत्तिहेतुत्वमुक्तम् ' इति सायणः ।　¶ ' प्रज्ञा चैतन्यमेव नेत्रं व्यवहारकारणं यस्यासौ प्रज्ञानेत्रः । अनेन स्थितिहेतुत्वमुक्तम् ' इति सायणः ।　‡ प्रज्ञा चैतन्यं प्रतिष्ठा लयस्थानम् । प्रतितिष्ठति विलीयतेऽत्रेति व्युत्पत्तेः । अनेन संहारहेतुत्वमुक्तम् ' इति सायणः ।

प्रज्ञानं ब्रह्मनामेत्याह—

॥प्रज्ञानं ब्रह्म। स एतेन प्रज्ञेनात्मनास्माँल्लोकादुत्क्रम्या- मुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभवत्सम- भवत्[1] ॥

वामदेवादिना येन तद्ब्रह्मोपासितं ह्यभूत् ।
स प्रज्ञेनात्मना युक्त इतोऽमुं लोकमेत्य च ॥

अमुष्मिन्स्वर्गलोके तु परमानन्दसंयुते ।
समवाप्य सर्वान्कामानमृतो दुःखवर्जितः ॥

अभूत्रेति प्रज्ञ इति प्रतिरेति(?) तु कः कृतः ।

द्विरुक्तिरुक्तार्था ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायामात्मोपनिषदि
षष्ठोऽध्यायः ॥

षट्खण्ट चत्वारोऽष्टौ च त्रय एकस्तथैककः ।
द्वितीयारण्यकन्त्वेवं पञ्चविंशतिखण्डकम् ॥

इत्यात्मोपनिषत्संज्ञं द्वितीयं पर्व मोक्षदम् ।
आरण्यकस्य व्याख्याय षडध्यायं महर्द्धिमत् ॥

संहितोपनिषत्संज्ञं तृतीयं पर्व यत्परम् ।

---

1. 'वेत्' ज.

तद्विघ्नशान्तये वाङ्म इत्यादिर्मन्त्र उच्यते ॥

अतस्तृतीयशेषोऽयं न तु द्वैतीयशेषकः ।
*अन्यमन्यस्मिन्निति हि देशभेदोऽस्ति पर्वणाम् ॥

वाङ्म इत्यादिमन्त्रस्य वामदेव ऋषिः स्मृतः ।
संहितोपनिषद्विघ्नशान्तिरेवात्र देवता ॥

अस्मिंस्तृचे षडर्धर्चा आद्यस्त्वष्टादशाक्षरः ।
चतुर्दशाक्षरोऽथेति प्रथमानुष्टुबक्षरैः ॥

त्रयोदशाक्षरोऽर्धर्चोऽथान्य एकान्नविंशतिः ।
द्वितीयाप्यक्षरानुष्टुबर्धर्चो द्वादशाक्षरः ॥

दशकश्चेति गायत्री विराट् तन्मात्रिका मता ।
आवृत्तिरध्यायान्तार्था रूपं मन्त्रस्य सापि चेत् ॥

षोडशी चेत्यक्षरोष्णिक् तृतीयेति हि शुश्रुम ।
शिष्यायमाणो ददर्श वाङ्मादिं वामदेवकः ॥

हे,

॥ वाङ्मे[1] मनसि प्रतिष्ठिता ॥

एधीत्यपकर्षः । भव ।

तथा हे,

---

१. 'वाङ्मनसि' छ.

---

* 'षष्ठे तत्त्वविद्यां परिसमाप्य सप्तमे शान्तिकं मन्त्रं पठति' इति, अवतु वक्तारमित्यभ्यासोऽध्यायसमाप्त्यर्थो द्वितीयारण्यकसमाप्त्यर्थश्च इति च वदतः श्रीसायणस्य मते वाङ्मे इत्याद्यवतुवक्तारमित्यन्तो ग्रन्थः द्वितीयारण्यकस्य सप्तमाध्यायरूपः ।

॥ मनो मे वाचि प्रतिष्ठितम ॥

भव ।

॥ *आविरावीर्म एधि ॥

मन इत्येव । आविः प्रकाशभूतम् । हे मनः मे मम आविरेधि । दीर्घश्छान्दसः । ममाविर्भव ।

हे वाक् च मनश्च युवां मे मम,

॥ वेदस्य ॥

§ अधीतस्य ।

॥ आणी स्थः ॥

कीलस्थानी । स्थः । लोटो लट् । स्तं भवतम् ।

किञ्च हे,

॥ श्रुतम् ॥

श्रुत! सम्बुद्ध्यलोपः छान्दसः ।

॥ मे ॥

---

* 'आविःशब्देन स्वप्रकाशं ब्रह्मचैतन्यमुच्यते । प्रज्ञानशब्देन व्यवहृतत्वात्तस्याविर्भूतरूपत्वम् । तथाविध हे आत्मन् मे मदर्थमावीरेधि अविद्यावरणापनयनेन प्रकटीभव ' इति सायणः । § 'वेदस्य यथोक्ततत्त्वविद्याप्रतिपादकस्य ग्रन्थस्य आणी स्थः । विद्याया आनयनसमर्थौ भवतम् । मे श्रुतं मया श्रोत्रेणावगतं ग्रन्थार्थजातं मा प्रहासीर्मां परित्यजतु । विस्मृतं मा भूदित्यर्थः ' इति सायणः ।

माम् ।

॥ मा प्रहासीः ॥

मा परित्यक्षीः ।

॥ अनेनाधीतेन ॥

वेदेन ।

॥ अहोरात्रान् ॥

शताब्दवर्तिनः ।

॥ सन्दधामि ॥

*सम्यग् धारयामि वेदाभ्यासेन ।

॥ §ऋतम् ॥

अधिगतं वेदम् ।

॥ वदिष्यामि ॥

सदाभ्यस्यामि ।

॥ ¶सत्यम् ॥

सत्सु साधु । स्वरवर्णाक्षरमात्राप्रयोगार्थज्ञानयुक्तम् ।

---

* 'सन्दधामि संयोजयामि । अहनि रात्रौ चालस्यं परित्यज्य निरन्तरं पठामीत्यर्थः' इति सायणः । § 'तस्मिन्पठिते ग्रन्थे ऋतं परमात्मभूतं वस्तु' इति सायणः । ¶ 'ऋतं मानसं सत्यं वाचिकम् । मनसा वस्तुतत्त्वं विचार्य वाचा वदिष्यामीत्यर्थः' इति सायणः ।

॥ वदिष्यामि । *तत् ॥

अधीतं श्रुतं च वेदरूपम् ।

॥ माम् ॥

शिष्यम् ।

॥ अवतु ॥

समृद्धिं गमयतु ।

॥ तद्वक्तारम् ॥

आचार्यम् ।

॥ अवतु ॥

रक्षतु ।

विपर्यासेन तदेवाहादरात्—

॥ अवतु मामवतु वक्तारमवतु वक्तारम् ॥

अभ्यासः ।

आवृत्तिरध्यायान्तार्थं मन्त्रो वाभ्यस्त आदरात् ।
तृचो[1]ऽयं सर्वदा जप्यः शिष्येणाचार्यसिद्धये ॥
इति शिष्यायमाणेन वामदेवेन कीर्तितः ।

---

१. ' यः सर्वदा ' घ.

---

* ' तन्मया वक्ष्यमाणं ब्रह्मतत्त्वं मां शिष्यमवतु सम्यग्बोधेन पालयतु ' इति सायणः ।

संहितोपनिषद्भिन्नशान्त्यर्थो वर्णितस्तृचः ॥

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां संहितोपनिषदि
प्रथमोऽध्यायः ।

॥ अथातः संहिताया उपनिषत् ॥

उच्यत इति शेषः ।

महाव्रतं पूर्वमुक्त्वाथात्मोपनिषदीरिता ।
संहिताया उपनिषदुच्यतेऽतः परं शुभा ॥

अक्षराणां तु संश्लेषः संहिता तत्र दृष्टिभिः ।
*उपासनं तूपनिषदतिगुह्यं तदुच्यते ॥

॥ पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेयः ॥

[1]वेदाभ्यासस्तु मण्डः स ऊको यस्याभिरक्षकः ।
स मण्डूकस्तस्य पुत्रो माण्डूकेय इतीर्यते ॥

मण्डान्त्यलोपः संज्ञात्वाङ्कू च मण्डूकतः पदम् ।
ऊकोऽवतेः कभूर्यः स्यात्स खल्वेवं स्म मन्यते ॥

---

१. 'वेदानन्दस्तु' घ.

---

* 'उपनिषण्णमस्यां विद्यायां प्रजापश्वादिफलमुपनिषत्' इति सायणः।

अग्निमित्यादिके शब्दे पूर्वरूपं तु भूर्मता ।
उत्तरं द्यौस्तयोस्सन्धिरवकाशोऽनिलास्त्विति ॥

अग्नि पूर्वत्रादिसन्धौ दृष्टित्रितयमुच्यते ।
अत्रैकः पूर्वपरयोः स्यादृच्सन्धिर्यणादि न ॥

स्वन्ते गुरुर्मन्यते स्म ङसन्ते मतमित्यपि ।
वाक्यशेषो भवेद्वेद सदातिङ्क टापाङ्गसंयुते(?) ॥

मतान्तरमाह—

॥ आकाशः संहितेत्यस्य माक्षव्यो वेदयाञ्चक्रे ॥

गर्गादिमक्षोस्तु सुतो वेदयाञ्चक्र उक्तवान् ।
अस्य वायोः स्थानभूतं खं भवेत्संहितेति वै ॥

आख्यानार्थाच्चुरादेर्णिज्विदेराम्लिट्परोऽनुकृञ् ।
*अस्येति माण्डूकेयोक्तिस्तत्पुत्रस्य सुहृत्त्वयम् ॥

माण्डूकेयमते वायुः संहिता त्वन्मते तु खम् ।
माण्डूकेयपुत्रसुहृत्त्वं ताभ्यां विरुणत्सि किम् ॥

इति पृष्टस्तु माक्षव्यो द्वे मते समजीगमत् ।

---

१. 'दृस्सन्धि' घ. २. 'गुरो मन्य' घ.
३. 'ङ्क भावाङ्गसुयुते' घ. ४. 'ता' घ.

---

* 'मक्षुनाम्नः कस्यचिन्महर्षेः पुत्रो माक्षव्यः । स चास्योपासनस्य सम्बन्धिन्यां संहितायामाकाशदृष्टिः कर्तव्येति वेदयाञ्चक्रे विज्ञातवान्' इति सायणः ।

॥ *स ह्याविपरिहृतो मे ॥

स वायुः । ह अविपरिहृतः न त्यज्यते । मे मया । †'क्तस्य च वर्तमाने' इति षष्ठी ।

खवादिना मया वायुः स्वस्थो गृह्यत एव हि ।

किञ्च,

॥ अनेन मेऽस्य पुत्रेण समगादिति ॥

माण्डूकेयपुत्रधिया समा ह्यत्र ममापि धीः ।
अत्रापि तत्पितुर्धीर्मे धिया भिन्ना न चाभवत् ॥

पितृतुल्या धीर्ममेयं तत्पुत्रं प्रीणयेदिह ।
इति माण्डूकेयबुद्ध्या मद्बुद्धिं समजीगमम् ॥

इत्यर्थः ।

मतान्तरमाह—

---

* 'स ह सोऽपि वायुरविपरिहृतो विशेषेण परिहृतो न भवति वायोराकाशवर्तित्वेनाकाश एवान्तर्भावात् । आकाशस्तु न वायावन्तर्भवति । वायुकारणत्वादधिकव्याप्तित्वाच्च । अतोऽस्य मण्डूकस्य पुत्रेण सह मे मम न समगात् । दर्शनं न संगतं मदीयमतं नैकविधं भवति । मन्मते वायोरन्तर्भावेन वाय्वाकाशोभयदृष्टिः संहितायां सिद्ध्यति । तन्मते त्वाकाशस्यानन्तर्भूतत्वाद्वायुमात्रदृष्टिरतो मन्मतमेव श्रेष्ठमिति मेने निश्चितवान् । ततो वाय्वाकाशयोर्विकल्पेन ध्यानं न भवति । किन्तु वायुध्यानं पूर्वपक्ष आकाशध्यानं सिद्धान्त इत्यर्थः ' इति सायणः । † पा० सू० २. ३. ६७.

॥ *समाने वै तत्परिहृतो मेन इत्यागस्त्यः । समानं ह्येतद्भवति वायुश्चाकाशश्च ॥

वायौ न संग्रहः खस्य खे वायोर्नापि संग्रहः ।
तुल्यते सहिते स्यातां नान्योन्यग्रहतत्परे ॥

निरपेक्षतया तुल्यं वायुः खं चेति हि द्वयम् ।
औलुक्तत्वे परिहृतस्तत एवेति निश्चयः ॥

इत्यगस्त्यसुतो मेने मन्यते स्मेति वै विदुः ।

॥ इत्यधिदैवतम् ॥

अवोचाम देवतासु संहितोपासनन्त्विदम् ।

॥ अथाध्यात्मम् ॥

उच्यते—

॥ वाक्पूर्वरूपं मन उत्तररूपं प्राणः संहितेति शूरवीरो माण्डूकेयः ॥

---

१. 'स्तूक्त' घ.

---

* 'समाने वै यदेतद्वायुः संहितेति माण्डूकेयस्य मतं यच्चाकाशः संहितेति माक्षव्यस्य मतं ते उभे अपि तुल्यबले एव । वायोराकाशवर्तित्वमप्रयोजकम् । न हि वस्तूनां स्वभावानुसारेण किञ्चिदुपासनं प्रवर्तते, किन्तु वचनानुसारेण । वचनं तु वायुः संहितेति पक्ष आकाशः संहितेति पक्षे च समानम् । तस्मात्कारणात्परिहृत आकाशपक्षे वायोरन्तर्भावाद्वायुः परित्यक्तश्च । तथा सति वायुश्चाकाशश्चेत्येतन्मतद्वयं समानमेव भवति । तस्माद्विकल्पेन संहितायां वाय्वाकाशयोर्दृष्टिः कर्तव्येति तत्र मुख्यः सिद्धान्तः' इति सायणः ।

*शूरोऽनुष्ठानदक्षत्वाद्वा[1]ग्जयाद्वीर एव च।
श्रुत्वा वाचं मन्यतेऽर्थ इति वाङ्मनसः क्रमः॥

प्राणे वाङ्मनस[2]योर्योगात् प्राणोऽत्र संहिता।

॥ अथ हास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपम्॥

अस्य शूरवीरस्य।

कथमित्याह—

॥ [3]मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति॥

'यद्धि मनसा ध्यायति त[4]द्वाचा वदति' इति श्रुत्यन्तरम्।

॥ तस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राणस्त्वेव संहितेति समानमेनयोरत्र पितुश्च पुत्रस्य च॥

अत्र अध्यात्मसंहितायाम्। पितुश्च शूरवीरस्य। पुत्रस्य च ज्येष्ठस्यैव। §तयोः प्राणस्त्वेव संहितेति समानं तुल्यम्। न विरुध्यते।

---

१. 'द्वाञ्छया वी' घ. २. 'मनसोर्यो' ब.
३. 'मनो वा अ' घ. ४. 'तदेव वा वदति' ख.

---

* 'उपासनायां निरन्तरं प्रवर्तमानाश्शूराः तैः पुरुषैः बहिः प्रवर्तमानानामिन्द्रियाणां जितत्वात्। तेषु शूरेषु वीरोऽत्यन्तपराक्रमयुक्तः। उपास्यवस्तुसाक्षात्कारवानित्यर्थः' इति सायणः।

§ न ह्युपासना वस्तुतत्त्वमपेक्षते किं तर्हि यथावचनमनुष्ठेयेति न्यायः पूर्वमेवोक्तः। तस्माद्यः पिता माण्डूकेयो यश्च तदीयो ज्येष्ठः पुत्रः तयोरुभयोर्मतं समानम्। तस्मान्मनोदृष्टिवाग्दृष्ट्योः पूर्वोत्तरभावित्वं विकल्प्यते' इति सायणः।

प्राणस्य संहितात्वे धीस्तुल्याभूत्तातपुत्रयोः ।

॥ *स एषोऽश्वरथः प्राष्टिवाहनो मनोवाक्प्राणसंहितः ॥

वाहनं तु वहेर्ण्यन्ताद् [2]नेन्धादिभ्यो ल्युरिष्यते ।
रथे मुखगतावश्वौ पृ(ष्टि ? ष्टी) पार्श्व[1]गतौ हयौ ॥

संहिताध्यानमार्गो यश्चतु(र्थ्य ? र्ह)यरथोपमः ।
उपासकमभीष्टार्थं प्रापयेद्रथवत्सदा ॥

॥ स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभि-
र्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन ॥

एतां संहितां यो वेद वेत्ति सः प्रजया पुत्रपौत्रनप्तृदुहितृदौहित्रादि-
कया पशुभिर्गोमहिष्यादिभिः यशसा ब्रह्मवर्चसेन स्वाध्यायवृत्त-
सम्पत्त्या स्वर्गेण लोकेन $सन्धीयते समवेषध्यते(?) । लोक्यत इति
लोको द्रष्टव्यः ।

---

१. 'गतः' घ. २. 'नन्दादि' क. नस्यादभ्यो' घ.

---

* 'यः पूर्वोक्तपृथिव्यादिध्यानरूपः फलहेतुः स एषोऽश्वयुक्तरथसमानः । स च प्राष्टिवाहनः । प्रष्टयोः पार्श्वयोर्युज्यमानौ द्वावश्वौ वाहनं यस्य रथस्य सोऽयं प्राष्टिवाहनः । ईषयोर्दीर्घकाष्ठयोर्मध्ये कञ्चित्प्रबलमश्वं संयोज्य तयोरीषयोर्बहिरुभयोः पार्श्वयोर्द्वावश्वौ मध्यमाश्वस्योद्दान्तस्य नियामकौ संयोज्येते । सोऽयमश्वत्रयोपेतो देवानां रथः । तथा तैत्तिरीया वाजपेयप्रकरणे समामनन्ति– "प्राष्टिवाहिनं युनक्ति । प्राष्टिवाही वै देवरथः । देवरथमेवास्मै युनक्ति" इति । यथा देवरथोऽश्वत्रयेण युक्त एवमयमप्युपास्तिरथो मनोवाक्प्राणैस्त्रिभिर्ध्येयविशेषैः संयुक्तस्तस्मात्प्राष्टिवाहिरथवत्सहसा फलप्रापणे समर्थ इत्यर्थः' इति सायणः । $ 'सन्धीयते संयोज्यते' इति सायणः ।

किञ्च,

॥ सर्वमायुरेति ॥

शताब्दलक्षणं चायुः सम्प्राप्नोति ह्युपासकः ।

॥ इति नु माण्डूकेयानाम् ॥

नु साधु । मधुमत्तममिति शेषः ।

माक्षव्यागस्त्यपुत्रौ च माण्डूकेयसुहृत्तमौ ।

प्रथमः खण्डः ।

॥ अथ शाकल्यस्य ॥

मतेन संहितोपनिषदुच्यत इति शेषः ।

कथम्,

॥ पृथिवी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः सन्धिः पर्जन्यः *सन्धाता ॥

सन्धीयते द्युभूम्यौ हि वृष्ट्येत्येषात्र संहिता ।
पर्जन्यदृष्टिः कर्तव्या सन्धेरुच्चारके नरे ॥

---

* 'संहिताया हेतुः सन्धाता । तद्यथा "इको यणचि" [पा० सू० ६. १. ७७.] इति सूत्र इकारस्य स्थाने यकारादेशविधावच्परत्वं निमित्तम् । तादृशे सन्धिनिमित्ते पर्जन्यध्यानं कर्तव्यम्' इति सायणः ।

सन्धाजः किः पुमान्सन्धिः कयन्तो घुरिति वै विदुः ।

उपपादयति—

॥ *तदुतापि यत्रैतद्बलवदनूद्गृह्णन्संदधदहोरात्रे वर्षति
द्यावापृथिव्यौ[1] समधातामित्युताप्याहुः ॥

तत् तत्र । उत साधु । अपि सम्भावने । उतापि खलु । एतद् मेघजालम् । बलवद् दृढम् । &अनूद्गृह्णन् प्रेरयन् । समधातां संश्लिष्टे अभूताम् । §'गातिस्था' इति सिचो लुक् ।

पालयन्मेघजालानि दिनरात्रिं तिरोदधत् ।
दृढं वर्षति पर्जन्यो यत्र काले हि तत्र च ॥
भूश्च द्यौश्चाद्य संश्लिष्टे अभूतामिति वै जनाः ।
वदन्ति वृष्टिपर्जन्यौ सन्धिसन्धातृकौ ततः ॥

॥ ¶इतीन्वधिदैवतम् ॥

इतेर्दीर्घः छान्दसोऽयमिच्छब्दो वैवमर्थकः ।
नु साधु शाकल्यसन्धिर्देवताख्यमीरितः ॥

॥ अथाध्यात्मम् ॥

---

१. 'वी द्यौ स' ज.

---

* 'उतापीति निपातसमुदायः समुच्चयवाची लोकप्रसिद्धिं समुच्चिनोति । तत्तस्मिन्वृष्टिः सन्धिः पर्जन्यः सन्धातेत्यस्मिन्नर्थे लोकप्रसिद्धिरपि विद्यत इत्यर्थः । कासौ प्रसिद्धिरिति साभिधीयते – यत्र' इति सायणः ।

& 'अनूद्गृह्णन्नुद्ग्रहणं वृष्ट्युपसंहारमकुर्वन्' इति सायणः ।

§ पा॰ सू॰ २. ४. ७७. ¶ 'इति नूक्तप्रकारमेव पृथिव्यादिकमित्यर्थः' इति सायणः ।

उच्यते ।

कथम् ।

॥ पुरुषो ह्वा अयं सर्वं आन्दम्[1] ॥

*अण्डमित्यर्थः ।

कायः पादादिकेशान्तस्त्वण्डमेकमिवैष हि ।

अत्र

॥ द्वे बिदले भवत इत्याहुः ॥

बिदलं खण्डम् ।

इदमण्डं विधातादौ स्वनखेन द्विधाकरोत् ।
ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे ॥

अण्डोपमे चात्र काये द्वे खण्डे भवतः खलु ।

कथम्,

॥ तस्येदमेव पृथिव्या रूपम् ॥

---

१. 'आनन्दम्' ज.

---

* 'आन्दमण्डसदृशम् । वर्णविकारः छान्दसः यथा ब्रह्माण्डस्याधःकपालमूर्ध्वं कपालं चेति द्वे बिदले द्वौ परस्परविपरीतभागौ तथा पुरुषेऽपि पादावारभ्याधरोष्ठपर्यन्तमेकं विदलमुत्तरोष्ठमारभ्य पूर्वपर्यन्तमपरं विदलम् । यथा भिन्नस्य वेणोर्दलद्वयं तद्वत् । बिदले इति बकारश्छान्दसः । इत्येवमण्डसादृश्यमभिज्ञाः पुरुषा आहुः । तस्य दलद्वयोपेतस्य शरीरस्येदमेवाधरोष्ठपर्यन्तं पृथिव्याः स्वरूपम् । इदन्तूत्तरोष्ठादिकं दिवः स्वरूपम्' इति सायणः ।

अभिनयतीदमिति ।

देहे दक्षिणभागस्तु पृथिवीरूपमुच्यते ।

॥ इदं दिवः ॥

रूपमित्येव ।

नाभेरुत्तरपार्श्वं यत्तद्दिवो रूपमुच्यते ।

॥ *तत्रायमन्तरेणाकाशो[1] यथासौ द्यावापृथिव्यो-
रन्तरेणाकाशः ॥

तत्र पार्श्वयोर्मध्ये ।

॥ $तस्मिन्हस्मिन्नाकाशे प्राण आयत्तो यथा
अमुष्मिन्नाकाशे वायुरायत्तः ॥

आ साधु । यत्तः । यतते व्याप्नोति । हस्मिन् पररूपं[2] कृतन्त्रवत् (?)

खे वायुवत्पश्चवृत्तिर्वायुर्देहेऽपि वर्तते ।

॥ यथामूनि त्रीणि ज्योतींष्येवमिमानि पुरुषे
त्रीणि ज्योतींषि ॥

---

१. 'शः । तत्र पार्श्वयोर्मध्ये । तस्मि' ख.   २. 'रूपं कत' ख.

---

* 'तत्र तयोरधरोत्तरदलयोरन्तरेण मध्येऽयमाकाशोऽस्माभिर्मुखे दृश्यमानं छिद्रं वर्तते' इति सायणः । $ 'तस्मिन्हास्मिन्पूर्वोक्त एव दृश्यमाने मुखच्छिद्रे प्राण आश्रितः' इति सायणः ।

विविच्याह—

॥ यथासौ दिव्यादित्य एवमिदं शिरसि चक्षुः । यथा-
सावन्तरिक्षे विद्युदेवमिदमात्मनि हृदयम् । यथायमग्निः
पृथिव्यामेवमिदमुपस्थे रेतः । एवमु ह स्म सर्वलोक-
मात्मानमनुविधायाह[1] ॥

आत्मानं देहं सर्वलोकमेवमनुविधायानुसृत्याह उक्तवान् ।

किमाह—

॥ इदमेव पृथिव्या रूपमिदं दिवः ॥

इत्यादि शाकल्य इति शेषः ।

॥ स य एवमेतां संहितां वेद सन्धीयते प्रजया पशु-
भिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन ॥

उक्तार्थम् ।

किञ्च,

॥ सर्वमायुरेति ॥

इति द्वितीयः खण्डः ।

---

१. ‘ धाय इदमेव ’ ट.

॥ अथातो निर्भुजप्रवादाः ॥

प्रतृण्णोभययोरुक्तेर्निर्भुजेति प्रदर्शनम् ।
निर्भुजादिगता वादा वक्ष्यन्ते यज्ञु कर्मणि ॥

पदपाठक्रमगतो वक्तव्योऽर्थोऽथ कथ्यते—

॥ पृथिव्यायतनं निर्भुजम् ॥

पाठरूपमध्ययनं निर्भुजाख्यं प्रचक्षते ।

॥ दिव्यायतनं प्रतृण्णम् ॥

पदरूपश्चाध्ययनं प्रतृण्णाख्यं वदन्ति हि ।
स्वर्गः पदस्यायतनं छन्दःस्वान्तेऽलुग्दिवः ॥

॥ अन्तरिक्षायतनमुभयमन्तरेण ॥

संपाठपदसाम्येन क्रमस्याख्योभयं[1] खगम् ।
पाठे पदे[2] क्रमे दृष्टिर्भूद्युखाख्या भवेत्क्रमात् ॥

॥ अथ यद्येनं निर्भुजं ब्रुवन्तमुपवदेत् ॥

*सम्पाठाध्यायि[3]नं त्वे (त्वं ? नं) स्वाभिगर्त्रेण चेत्परः ।

१. ' भयं वगः ' घ. २. ' पदक्रमे ' ख.
३. ' ध्यायनन्तेन वामो गर्वेण चेत्परम् ' घ.

* ' उपासकेन पठ्यमानायां संहितायां स्वरवर्णादिवैकल्यदोषमुद्भावयेत्तदानीमेनं दोषोद्भावकमयमुपासक एवं ब्रूयात्- हे उपवादिन्नक्षराभ्यामधोवर्तिभ्यां स्थानाभ्यां पृथिव्यन्तरिक्षलोकाभ्यामच्योष्टा " इति सायणः ।

संपाठे रमसे किं त्वं न जानासि पदक्रमौ ॥

पदक्रमाभिज्ञतया वयं त्वत्र रमामहे ।
पाठाध्यायी त्वधिक्षिप्तः क्षमेताक्षेपमञ्जसा ॥

क्षमेतैनं दहेत्क्षन्तुमशक्तश्चेदिदं वदेत् ।

इत्याह—

॥ अच्योष्टा वराभ्यां स्थानाभ्यामित्येनं ब्रूयात् ॥

अच्योष्टाः । थासः थस्य तः । अच्योष्टा(ः) पतितवानसि । वराभ्या-मुत्कृष्टाभ्यां भूस्थाभ्याम् । तदाश्रयेण जनापवादात् ।

उक्तमुत्तरयायाते ह्येतत्संभवपर्वणि—

*अधीयानः पण्डितम्मन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
तस्यान्तवन्तश्च भवन्ति लोका
न चास्य तद्ब्रह्म फलं ददाति ॥

इति ।

॥ $अथ यद्येनं प्रतृण्णं वेदन्तमुपवदेत् ॥

किं त्वं पदे हि रमसे क्रमपा(ठे ? ठौ) न वेत्सि किम् ।
इत्यधिक्षेपवाक्येन क्षिप्तोऽथैनं वदेदिदम् ॥

---

१. ' पाठध्यायी ' घ. २. ' दाः ' घ.
३. ' ब्रवतमु ' ङ. ४. ' पाठो न ' घ. ५. ' अत्यधि ' घ.

---

* महाभारते आदिपर्वणि संभवपर्वणि चतुरशीतितमाध्याये २१ तमं पद्यम् ।
$ ' अधीयमाने पदे दोषोद्भावनमुपवादः ' इति सायणः ।

इत्याह—

॥ अच्योष्टा[1] उत्तराभ्यां स्थानाभ्यामित्येनं ब्रूयात् ॥

उत्तराभ्यां खद्युभ्याम् ।

॥ * यस्त्वेवोभयमन्तरेणाह तस्य नास्त्युपवादः ॥

यः क्रममधीने तस्य गर्हा नास्ति पदपाठावज्ञात्वा[2] क्रमस्याध्येतुमशक्यत्वात् । क्रमस्य हीदं लक्षणम्— संहितावत्पूर्वं पदवदुत्तरम् इति । क्रमो[3] द्विपदशब्देन तयोरुत्तरेणोत्तरं सन्दध्यात् । इति च ।

तदाह—

॥ यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपम् ॥

---

१ ' ष्टा वराभ्यां स्था ' घ. २. ' ठवज्ञात्वा क्र ' घ.
३. क्रमाद्वि ' घ.

---

* ' क्रमविषये दोषो नास्त्येव । संहितायां पदे च भ्रान्तदृष्ट्या दोषः संभाव्यते । तथाहि- " अग्निमीळे [ऋक्सं १. १. १.] इत्यस्यां संहितायामुत्तरपदगत ईकारः स्वरितः । एकारः प्रचयः । पदकाले तु तदुभयमनुदात्तम् । तथा सति पदपाठमात्राभ्यासिनस्य कस्यचिच्छूद्राजडस्य संहितायां स्वरान्यथात्वभ्रान्तिरुदियात् । तथा संहितामात्राभ्यासितस्य अद्वाजडस्य पदच्छेदकाले स्वरान्यथात्वभ्रान्तिः । क्रमकाले तु नोक्तभ्रमद्वयमस्ति । द्विविधस्वरस्य पठ्यमानत्वात् । अग्निमित्यनेन पूर्वपदेन सह संहितायामीळ इति पदे स्वरितप्रचयौ पठ्येते । पुरोहितमित्यनेनोत्तरपदेन सह संहितायामनुदात्तद्वयं पठ्यते । तस्मात्क्रमे स्वरान्यथात्वभ्रमो नोदेति । कथञ्चिदन्यथात्वेऽपि देवताध्यानेन दोषः समाधीयते ' इति सायणः ।

टार्थे । सन्धिं विवर्तयति संश्लेषयति रज्जुं कुर्वन्निव तत् सम्पाठस्य रूपम् ।

॥ अथ यच्छुद्धे अक्षरे[1] अभिव्याहरति तत्प्रतृण्णस्य ॥

रूपमित्येव । शुद्धे असंसृष्टे[2] । अभिव्याहरति वदति ।

क्रमपाठेन तु,

॥ अग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवति ॥

*अग्रे प्रकाशम् । उ साधु । उभयमन्तरेण पदपाठक्रमाध्ययनेन उभयं व्याप्तं संगृहीतं भवति । पदपाठव्यतिरेकेण क्रमो हि नास्तीत्यर्थः ।

अथात्माध्ययनस्य त्रयस्य फलान्याह—

॥ अन्नाद्यकामो निर्भुजं ब्रूयात् स्वर्गकामः प्रतृण्णम् ॥

ब्रूयादित्येव ।

॥ उभयकाम उभयमन्तरेण ॥

ब्रूयादित्येव ।

अभ्यस्येत्त्रिविधं वेदमन्नस्वर्गोभयाप्तये[3] ।
तत्पञ्चधा स्वीकरणं विचाराऽभ्यसनं जपः ॥

---

१. ' रेण अभि ' ङ.   २. ' स्पृष्टे ' घ.
३. ' रोऽध्ययनं ' घ.

---

* ' यदेतत्प्रतृण्णस्य स्वरूपं तदेतदग्र उ प्रथमभाव्येव ' इति सायणः ।

तद्दानं चैव शिष्येभ्य इत्यत्राध्ययनं भवेत् ।

॥ अथ यद्येनं निर्भुजं ब्रुवन्तं पर उपवदेत् ॥

यदि क्षिपेदधीयानं पण्डितम्मन्यकः परः ।

तदा तं,

*पृथिवीं देवतामारः पृथिवी त्वा देवता
रिष्यतीत्येनं ब्रूयात् ॥

आरः प्राप्नुहि ।

लोटो लुङ्[1] [$]'सर्तिशास्ती'त्यङाट् सिब्[¶]'ऋदृशोऽङि' च ।

मृङ्[2]व । रिष्यति हनिष्यति ।

तथा,

॥ अथ यद्येनं प्रतृण्णं ब्रुवन्तं पर उपवदेद्दिवं[3]
देवतामारो द्यौस्त्वा देवता रिष्यतीत्येनं ब्रूयात् ॥

---

१. 'लुक्' ब. २. 'ङि मृङ्ग' ब. ३. 'दिवमेव दे' ब.

---

* 'अयमुपासकोऽन्नाद्यकामः सन्यदा संहितामधीते तदानीं परः शत्रुरेतस्य फलविघ्नार्थमेनमुपवदेदधीयमानायां संहितायां विद्यमानमविद्यमानं वा दोषमुद्भावयेत्तदानीमुपासकः पृथिवीमित्यादिमन्त्रेण तं शत्रुं शपेत् । मन्त्रस्य चायमर्थः— हे शत्रो त्वं संहितारूपां पृथिवीं देवतां दूषयितुमारः प्राप्तवानसि । अतः सा पृथिवी देवता त्वां रिष्यति हिनस्तीति । एवमुत्तरयोरपि पर्याययोर्योज्यम' इति सायणः । $ पा० सू० ३. १. ५६.

¶ पा० सू० ७. ४. १६.

उक्तार्थम् ।

॥ अथ यद्येनमुभयमन्तरेण ब्रुवन्तं पर उपवदेत् ॥

तदैनम्,

॥ अन्तरिक्षं देवतामारोऽन्तरिक्षं त्वा देवता रिष्यतीत्येनं ब्रूयात्। यथा तु कथा च ब्रुवन्वा ब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यात् ॥

वेदं येन केनचित्प्रकारेण ब्रुवन्तमभ्यस्यन्तम् आत्मानं ब्रुवन्तमधिक्षिपन्तं यद्ब्रूयात् शपेत् । अभ्याशं क्षिप्रमेव । क्षिप्रमेव तत् तथा स्यात् ।

साध्वर्थः पूर्ववाशब्दो गर्हार्थस्त्वपरो मतः ।

ततश्च,

॥ न त्वेवान्यत्कुशलाद्ब्राह्मणं ब्रूयात् ॥

श्रद्धया वेदमभ्यस्यन्कल्याणं प्रकरोषि हि ।

इत्येव ब्रूयात् । नान्यदनिष्टं किञ्चिदित्यर्थः ।

॥ *अतिद्युम्न एव ब्राह्मणं ब्रूयात् ॥

---

१. 'न्तमात्मानं ब्रु' घ. २. 'लान्वा' ट.

---

* 'क्वचिद्ब्राह्मणेऽपि शापमभ्यनुजानाति- अतिद्युम्न एव ब्राह्मणं ब्रूयात् इति । अतिशयितं द्युम्नं धनमतिद्युम्नं तस्मिन्नेव विषये विघातकं शत्रुं ब्राह्मणं शपेत्, न त्वल्पे विषये । इदानीं माण्डूकेयस्य महर्षेर्मतं दर्शयति- नाति इति सायणः ।

आत्मन्यतिद्युम्ने अपहृतसुवर्णादिधने सत्यपि महत्तरं ब्राह्मणं परुषं वदेत् ।

एतदपि नेत्याह—

॥ नातिद्युंम्ने चन[2] ब्राह्मणं ब्रूयात् ॥

चेन अपि ।

विप्रं स्वर्णापहर्तारमपि नो परुषं वदेत् ।

ब्राह्मणविषये सदा नमस्कार एवेति वक्तुमृषिसमाचारमाह—

॥ नमो[3] अस्तु ब्राह्मणेभ्य इति ह स्माह शूरवीरो माण्डूकेयः ॥

अतिद्युम्नेऽप्यात्मनीति शेषः ।

ब्राह्मणः संभवेनैव देवानामपि दैवतम् ।

इति हि स्मरति वसिष्ठः ।

तृतीयः खण्डः ।

॥ अथातोऽनुव्याहाराः ॥

उच्यन्ते ।

---

१. 'द्युम्न एव वचनं ब्राह्मणं' ब. २. 'नच' ब.
३. 'नमोऽस्तु' ब.

निकृष्टं प्रति यः शापः सोऽनुव्याहार उच्यते ।
अनु पश्चादुच्यमानो व्याहृतो यत्तु कर्मणि ॥

विषयमाह—

। प्राणो वंश इति विद्यात् ।

पञ्चवृत्त्यात्मको वायुः प्राणः सर्वशरीरगः ।
छदिराश्रयान्यवंशाश्रितवंशोपमस्त्विह ॥

॥ स य एनं प्राणवंशमुपवदेच्छक्नुवञ्चेन्मन्येत प्राणं वंशं समधा ३ म् प्राणं मा वंशं सन्दधतं न शक्नोषी- त्याह प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयात् ॥

चिन्तयन्तमिति शेषः ।

प्राणं वंशं चिन्तयन्तं योगिनं यो निन्दको वदेत् ।
प्राणस्य नास्ति वंशत्वं नोपास्तिः क्रियतामिति ॥

सन्निन्दतः स्वमात्मानं वंशचिन्ताक्षमं सुखम् ।
मन्यते चेदथो ब्रूयात्प्राणवंशस्य निन्दकम् ॥

समधां प्राणवंशं तु शक्तं कुर्वाणमेव माम् ।
न शक्नोषीत्यवादीस्त्वं त्वां प्राणो हास्यतीति वै ॥

शक्नुवन् । अमः सुः । समधा३म् । अभिपूजिते प्लुतः । शकेः श्नुः । आह आत्थ ।

---

१. 'धा ३ः' ङ. २. 'प्राणं वंशं' ज.

॥ अथ चेदशक्नुवन्तं मन्येत ॥

प्राणवंशोपासकः स मन्येतात्मानमञ्जसा ।
उपासितुं न शक्नोमीत्यथैनं गर्हकं वदेत् ॥

॥ प्राणं वंशं समधित्सिषन्तं नाशकः सन्धातुं प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयात् ॥

सन्धातुमैच्छन्तं प्राणं वंशं तु समधित्सिषम् ।
संधाञः *'सनि मीमे'ति लुङ् सिजल्लोप इण्मिपोऽम् ॥

सन्धातुं संप्रवृत्तं मां मा बाधिष्ठास्तु नाशकः ।
सन्धातुमित्यतः प्राणो हास्यति त्वामितीरयेत् ॥

अशकः । लुङ् । सिच् । ऌदित्वादङ् ।

इतश्च,

यथा तु कथा च ब्रुवन्वा ब्रुवन्तं वा ब्रूयादभ्याशमेव यत्तथा स्यात् । न त्वेवान्यत्कुशलाद्ब्राह्मणं ब्रूयात् । अतिद्युम्न एव ब्राह्मणं ब्रूयात् । नातिद्युम्ने चन ब्राह्मणं ब्रूयात् । नमो अस्तु ब्राह्मणेभ्य इति ह स्माह शूरवीरो माण्डूकेयः ॥

चतुर्थः खण्डः ।

---

१. 'प्राणवं' घ. २. 'मा श' घ. ३. 'कम्' ख.

* पा० सू० ७. ४. ५४.

॥ अथ खल्वाहुर्निर्भुजवक्त्राः ॥

येषां मुखेऽस्ति सम्पाठस्ते स्युर्निर्भुजवक्त्रकाः ।
ब्रह्मवादिन इत्याहुः संहितोपासनं त्विह ॥

॥ पूर्वमक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपो-
त्तररूपे[1] अन्तरेण सा संहितेति ॥

संहितात्रार्धमात्राह कालव्यवधिरूपिका ।
देवतारूपदृष्टिर्न स्वरूपन्त्वेव चिन्त्यताम् ॥

स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभि-
र्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

उक्तार्थम् ।

॥ अथ वयं ब्रूमो निर्भुजवक्त्रा इति ह स्माह
ह्रस्वो माण्डूकेयः ॥

हे निर्भुजवक्त्रा, इति भ्रातॄन् सम्बोधयति । ह्रस्वः वामनः ।

कथम् ।

॥ पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपम् ॥

नात्र वाच्यमस्ति किञ्चित् ।

॥ योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण ॥

---

१. 'पेणान्तरेण' ज.

अत्र वाच्यमस्ति ।

॥ यॅन सन्धिं विवर्तयति येन स्वरास्वरं विजानाति येन मात्रामात्रां विभजते सा संहितेति ॥

सन्धिं संश्लेषं विवर्तयति निष्पादयति । स्वर*'एकादेश उदात्तेनोदात्त' इत्यादि । अस्वरः प्रकृतिस्वरः । मात्रा ह्रस्वदीर्घप्लुताः । अमात्रा हलः । येनेति §'अमि पूर्वः' इत्यादिसन्धिकार्यं व्याकरणप्रातिशाख्योक्तमुच्यते ।

॥ स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥ अथ हास्य पुत्र आह मध्यमः प्रातीबोधीपुत्रः ॥

अस्य ह्रस्वमाण्डूकेयस्य बहुपुत्रस्य ।

प्रतिबोधादण्यणो ङीप्प्रतिबोधर्षिपुत्रिका ।
बुधेर्घञि प्रतेर्दीर्घ उपसर्गस्य घञ्यतः ॥

बोधो यस्य प्रतिगतः पूर्णः स प्रतिबोधकः ।
प्रातीबोध्याः पुत्र आह माण्डूकेयस्य मध्यमः ।

प्रख्यातपितृकत्वेन न मात्रोक्तेस्तु गर्ह्यता ।
यथा सौमित्रिकौन्तेयदेवकीनन्दनादिषु ॥

॥ अक्षरे खल्विमे अविकर्षन्ननेकीकुर्वन्यथावर्णमाह ॥

विकर्षणं शीघ्रोक्तिः । आह कश्चिदुक्ता ।

---

* पा० सू० ८. २. ५. § पा० सू० ६. १. १०७.

॥ तद्यासौ मात्रा पूर्वरूपोत्तररूपे अन्तरेण सन्धिविज्ञपनी ॥

तत् तत्र । मात्रा *'अभिपूर्व' इत्यादिकृता । सन्धिविज्ञपनी सन्धेः श्लेषस्य बोधयित्री ।

॥ साम तद्भवति ॥

तत् सा ।

सा चामश्चेति संश्लेषात्सामवत्संहिता भवेत् ।

ततश्च,

॥ सामैवाहं संहितां मन्य इति ॥

सामबुद्ध्या संहिता तु ध्येयेत्येव मतिर्मम ।

॥ तदप्येतदृषिणोक्तम् ॥

मन्त्रेण [1]गृत्समदेन वा ।

॥ बृहस्पते न परः साम्नो विदुरिति ॥

§मानस्तेनेभ्यो जगत्याश्चतुर्थः पाद ईरितः ।

---

१. 'गृध्स' घ.

---

* पा० सू० ६. १. १०७.

§ मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः । आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥ (ऋक्सं० २. २३. १६.) 'हे बृहस्पते, नोऽस्मान्मन्त्ररूपान् स्तेनेभ्यो विद्याचौर्यपरेभ्यो मा । दा

विद्यारूपी गृ[1]त्समदः स्वेष्टं ब्रूते बृहस्पतिम् ॥

हे बृहस्पते, नः अस्मान् । स्तेनेभ्यः दुष्टकृष्टाशिष्टेभ्यः । ये शिष्याः अभि द्रुहः द्रोहस्य । पदे स्थाने वर्तन्ते । निरामिणः नित्यं क्रीडापहसनशीलाः । द्रुहः क्विप्[2] । रमेर्णिनिः । रिपवः शत्रुसमाः । अन्नेषु भक्ष्येषु निमित्तेषु जागृधुः । गृधेर्लटो लिट् । अभिकाङ्क्षन्ते । किन्तु तेभ्योऽस्मान्देहि । आ साधु । देवानाम् । भ्यस आम् । देवेभ्यः । ओहते वह[3]न्ति प्रयच्छन्ति ।

वहतेर्लट् झि वस्यो[4]त्वं व्यत्ययेनात्र झेश्च वः ।

विव्रयः । वृङः[5] क्विः । विपरीततराः । हृदि टार्थे[6] ङि । हृदयेन आदरेण । किञ्च, बृहस्पते, न विदुः न जानन्ति । साम्नः परः परम् । सर्वं सामतया बुध्यत इति ।

---

१. 'गृध्स' घ. २. 'पः' घ. ३. 'इति' घ.
४. 'स्येतांच्य' घ. ५. 'वृञः कः' ख.
६. 'टातो ङि' ख.

इत्यध्याहारः । तादृशेभ्यो मन्त्रोपदेशं मा कुर्वित्यर्थः । कीदृशा विद्याचोरा इत्याशङ्क्योच्यते- ये शिष्या अभिद्रुहस्पदे सर्वतो गुरुद्रोहस्य स्थाने वर्तमान निरामिणो मायया गुरुमभिमुखीकृत्य व्यवहारे बाह्ये नितरां रमयन्तीति निरामिणः । एतेऽनुकूला इत्येवं गुरोर्भ्रान्तिं जनयन्तीत्यर्थः । ते च स्वहृदये रिपवः शत्रवः सन्तोऽन्नेषु भोग्येषु दृष्टार्थेष्वेव जागृधुरभिकाङ्क्षां कुर्वन्ति । तादृशेभ्यः स्तेनेभ्यो मन्त्रात्मकानस्मान्मा देहि । इति मन्त्रद्रष्टॄणां वचनमेतत् । तर्हि केभ्यो मन्त्रा दातव्या इति चेदुच्यते- ये श्रद्धालवो विव्रयः संभजनकर्तारः सन्तो हृदि स्वचित्ते देवानामिन्द्रादीनां यागादिरूपं संबन्धमा समन्तादोहते वितर्कयन्ति सर्वदा यागं कर्तुं विचारयन्ति तादृशेभ्यो मन्त्रान्देहीत्यर्थः । ते च साम्नः समत्वादार्जवात्परः श्रेयोहेतुर्नास्तीत्येवं विदुर्जानन्ति । अतस्ते मन्त्रोपदेशयोग्याः । अत्र यथा शिष्याणां व्यवहारे समत्वं प्रशस्तमेवं संहितायामपि सममात्रोच्चारणं प्रशस्तमित्यर्थः ' इति सायणः ।

॥ स य एवमेतां संहितां वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

पञ्चमः खण्डः ।

॥ बृहद्रथन्तरयो रूपेण संहिता सन्धीयत इति तारुक्ष्यः ॥

रूपेण सादृश्येन । सन्धीयते । लोटो लट् । चिन्त्यताम् ।

संहिता चिन्त्यतामेवं रथन्तरबृहत्समा ।
क्षै क्षये तरुवत्क्षीणः तरुक्षस्तत्सुते तु यञ् ॥

उपपादयति—

॥ वाग्वै रथन्तरस्य रूपम् ॥

श्रुतिप्रसिद्धेः ।

॥ प्राणो बृहतः ॥

रूपमित्येव ।

॥ उभाभ्यामु खलु संहिता सन्धीयते वाचा च प्राणेन च ॥

उ पुनः ।

प्राणवाग्बलसम्पत्तौ संहिता ह्युच्यते सुखम् ।

---

१. 'वङ्गल' घ.

तारुक्ष्यस्यात्र तु ज्ञाने प्रसिद्धिं प्रब्रवीत्यथ ॥

॥ एतस्यां ह स्मोपनिषदि संवत्सरं गा रक्षयते तारुक्ष्यः ॥

लट् स्मे ।

रथन्तरबृहद्रूपसंहिताज्ञानगुह्यके ।
निमित्ते गोगणं त्वब्दमररक्षत्स्वशिष्यकैः ॥

रक्षेर्णिचश्चेति तङि भवेद्रक्षयतेपदम् ।

स्पष्टयति—

॥ एतस्यां ह स्म मात्रायां संवत्सरं गा रक्षयते तारुक्ष्यः ॥

मात्रायाम्[1] अल्पे ।

अल्पेऽपि फलबाहुल्याच्छुश्रूषाप्यधिकोचिता ।

॥ तदप्येतदृषिणोक्तम *रथन्तरमाजभारा वसिष्ठो भरद्वाजो बृहदाचक्रे अग्नेरिति ॥

ऋचोः[2] प्रथश्चाविन्दं ते पादावन्त्यौ त्विमौ खलु ।
वसिष्ठः प्रथ आद्यर्षिः[3] भारद्वाजोऽथ सप्रथः ॥

---

१. 'म् अल्पेऽपि फ' घ. २. 'ऋचो' घ. ३. 'अद्य ऋषि' घ.

---

* प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमाजभारा वसिष्ठः ॥
अविन्दन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥ (ऋक्सं० १०. १८१. १, २

अर्थस्तु – प्रथः अहं च यस्य । सप्रथः[1] । प्रथो यशः । दीर्घाभावः छान्दसः । यशस्वी च । नाम रूपम् । आनुष्टुभस्य वागनुष्टुप् तत्स्तुत्यस्य हविषः सकाशात् । हविर्यत् तद्वत् । धातुः प्रजापतेः । द्युतानात् दीप्तात् सवितुः च विष्णोः सकाशात् । रथन्तरमाजभार । *'हृग्रहोर्भः' । आनीतवान्[2] । स वसिष्ठः ।

वसिष्ठो धातृसवितृविष्णुभ्यस्तु रथन्तरम् ।
सर्वस्तुत्यं हविस्तुल्यमानिन्ये यस्य वै त्वहम् ॥

यशस्वी रूपमभवं स वसिष्ठ इति श्रुतिः ।

अविन्दन्ते अविन्दन् लब्धवन्तः । ते । जम् । अतिहितम् अतिगूढम् । यदासीद्यज्ञस्य धाम दीप्तिरूपं[3] परममुत्कृष्टम् । गुहा । ङ्यर्थे टा । गुहायाम् । यँच्च[4] । धातुर्द्युतानात् सवितुश्च विष्णोः । पूर्ववत् । भरद्वाजो बृहत्साम आचक्रे आनीतवान् । अग्नेश्च सकाशात् ।

धातृविष्णुसवित्रग्निदेवाः प्रापुँश्च[5] यत्पुरा ।
अतिगूढं गुहायां यन्निहितं बृहदाख्यकम् ॥

आनीतवान्भरद्वाजँस्तावदेषां[6] सकाशतः ।
¶ रथन्तरबृहत्साम ऋग्भ्यामाभ्यां प्रदर्शितः ॥

---

१. 'थः वः प्रथस यशः' घ.　　२. 'न् वसि' घ.
३. 'प्तिः रूपं' घ.　　४. 'यत् व धातुः' घ.
५. 'पुस्तु यत्पुना' घ.　　६. 'जस्तद्वदेषां' घ.

---

* पा० सू० वा० ३. १. ८४　　¶ तदेतन्मन्त्रद्वयं प्रवर्ग्याभिष्टवे सूक्ते समाम्नातम् । आनुष्टुभस्यानुष्टुप्छन्दोयुक्तैर्मन्त्रैः संस्तुतस्य यस्य प्रवर्ग्यहविषो नाम घर्म इत्यादिकं प्रथादयो जानन्तीति शेषः । प्रथसप्रथनामकावुभावृषी । चकारावनुक्तमहर्षिसमुच्चयार्थौ । ते सर्वेऽपि यस्य हविषः प्रसिद्धस्य नाम

॥ स य एवमेतां संहितां वेद संधीयते प्रजया पशुभि-
र्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

कौण्ठरव्यमहर्षेस्तु संहिताज्ञानमाह ह—

॥ वाक्प्राणेन संहितेति कौण्ठरव्यः ॥

कुण्ठं मृदु रवो यस्य मृदुभाषी स तत्सुतः ।
गोत्रतः[1] कौण्ठरव्यः स्यात्स उवाचात्र संहिताम् ॥

प्राणेन वाक्संबन्धे सति ।

॥ प्राणः पवमानेन ॥

प्रकृतं संहितेत्येतद्यथार्हमिति संहितः ।
प्राणेन वायुः संबद्धः पवमानस्तु संहितः ॥

---

१. 'त्रं तु कौ ख.

जानन्ति । यच्च प्रवर्ग्यार्थं द्रव्यं हविषोऽपि हविर्भवति । उत्तमं हविरित्यर्थः । यथा राज्ञोऽपि राजेत्यत्रोत्तमत्वमुक्तं भवति तद्वत् । तादृशं हविः स्तोतुं वसिष्ठाख्यो महर्षी रथन्तराख्यं सामाजभाराहृतवान् । तेन साम्ना तस्य हविषः स्तुतिरपि किंनिमित्तेत्याशङ्क्य धात्रादिदेवतानिमित्तेत्युच्यते । धात्रादिशब्देषु चतुर्थ्यर्थे पञ्चमी । धात्रादीनां परितोषाय हविःस्तुतिरित्यर्थः । ते प्रथादयो महर्षयः प्रवर्ग्यरूपं हविरतिहितं धात्रादिदेवेभ्योऽतिशयेनोपयुक्तमित्यविन्दन्लब्धवन्तो ज्ञातवन्त इत्यर्थः । यद्धविर्यज्ञस्य सोमयागस्य धाम स्थानमासीत् । सति हि प्रवर्ग्ये सोमयागस्तेजस्वीव भासते । तस्मादस्य हविषो धामत्वम् । तथा यद्धविः परमं गुहात्यन्तं गोप्यम् । यज्ञस्य शिरोरूपत्वात् । तथा चान्यत्र श्रूयते- "शिरो वा एतद्यज्ञस्य यत्प्रवर्ग्यः" [तै० आ० प्र० ५अ० १०] इति । अग्निसहितानां धात्रादीनां परितोषं निमित्तीकृत्य तद्धविः स्तोतुं भरद्वाजाख्यो महर्षिर्बृहदाख्यं सामाचक्र आनीतवान् । सर्वेषु सोमयागेषु प्रशस्तं यत्प्रवर्ग्यहविस्तादृशं हविः स्तोतुं वसिष्ठभरद्वाजौ महता प्रयासेन रथंतरं बृहच्च सम्पादितवन्तौ ' इति सायणः ।

॥ पवमानो विश्वैर्देवैः ॥

संहितः ।

॥ विश्वेदेवाः स्वर्गेण लोकेन ॥

संहिताः ।

॥ स्वर्गो लोको ब्रह्मणा ॥

*चतुर्मुखेन संहितः ।

॥ सैषावरपरा संहिता ॥

पूर्वः पूर्वो यस्यावरमुत्तरं च परस्त्विवति ।

स यो हैतामवरपरां संहितां वेदैवं हैव स प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन संधीयते यथैषा संहिता ॥

द्विः स आदरार्थः । संधीयते न कदाचिद्विच्छिद्यते संहितावत् ।

॥ £स यदि परेण वोपसृतः स्वेन वार्थेनाभिव्याहरेत्

---

१. ' विश्वेषां देवानां स्वर्गेण ' ट.

---

* ' स्वर्गो लोको ब्रह्मणा वेदेन संहितः ' इति सायणः ।

£ ' स उपासको यदि कदाचित् परकीयप्रयोजनेन वा स्वकीयप्रयोजनेन वोपसृतः प्रेरितः सन्नभिव्याहरेत्संहितां पठेत्तदानीमभिव्याहार्षमेव संहितां पठितुमिच्छन्नेव विद्यादेवं मनसा सङ्कल्पयेत् । कथमिति तदुच्यते– इयं मयोपास्यमाना संहिता दिवमगमत् द्युलोकपर्यन्तं पदार्थजातं प्राप्तवती " विश्वेदेवाः स्वर्गेण लोकेन स्वर्गो लोको ब्रह्मणा " इत्येवमुक्तत्वात् । तस्मात्कारणा-

अभिव्याहार्षन्नेव विद्यात् ॥

परेण शिष्येण उपसृतः अनुसृतः स्वेन आत्मीयेन अर्थेन प्रयोजनेन अध्यापयेदधीयीत चेत्यर्थः। उभयथा वदन्नपि विद्यात्। कथम्। अभिव्याहार्षमिति। वि- नाना। आ साधु। अहार्षं प्रच्छादितम्। अहं नाना वै प्राप्तवानिति।

हृञो लुङि मिपोऽम्लेः सिच् सिचि वृद्धावटा पदम्।
मश्च नः छान्दसोऽधीतौ फलमध्यापनेऽपि च ॥

प्ररोचयति—

॥ दिवं संहितागमद्विदुषां देवानामेवं भविष्यतीति शश्वत्तथा स्यात् ॥

देवानां विदुषां मध्ये दिवमागादियं पुरा।
संहिता फलपुञ्जेन[1] युक्तता देवता अपि ॥

एवं फलान्विता चेयं सम्यक्ख्याता महर्षिभिः।
भविष्यतीत्यरोचंस्तत्क्षिप्रमस्याः फलं भवेत् ॥

स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

पञ्चालचण्डनाम्नस्तु मुनेराहाथ संहिताम्—

---

१. 'पुण्येन' ब.

द्विदुषां संहितोपासकानामत एव देवानां देवतारूपाणामेतेषां पुरुषाणामेवं भविष्यत्यैहिकमामुष्मिकं वापेक्षितं श्रेयः सर्वदा भविष्यतीत्येवं मनसा सङ्कल्पिते सति शश्वत्तथा स्यादवश्यं तत्फलं सिध्येत्' इति सायणः।

॥ वाक्संहितेति पञ्चालचण्डः ॥

पञ्चालदेशवर्ती[1] तु चण्डो वाग्मी यशोऽन्वितः ।
स वाचं संहितामाह वाचि भूतिं प्रदर्शयन्[2] ॥

कथम्,

॥ वाचा वै वेदाः संधीयन्ते ॥

उच्यन्ते हि यजुःसामाथर्वबाह्वृच्यरूपकाः[3] ।
वेदा वाचैवानुयन्त्या[4] स्थानयत्नस्वरादिकम् ॥

॥ वाचा छन्दांसि ॥

संधीयन्त इत्येव ।

छन्दांसि गायत्र्यादीनि सप्तोक्तादीनि पञ्च च ।
तथैवातिजगत्यादिभ्योत्कृतेस्तु चतुर्दश ॥

इति षड्विंशतिश्चापि वाचैवोच्यन्त एव हि ।

॥ वाचा मित्राणि सन्दधति ॥

* 'अदभ्यस्तात्' ।

सर्वे वाचैव शत्रूंश्च मित्राण्येव प्रकुर्वते ।

॥ वाचा सर्वाणि भूतानि ॥

---

१. 'शवासी तु' ब. २. 'प्रकाशयन्' ब.
३. 'बांह्वृच रू' ब. ४. 'वानयन्त्या' ब.

---

* पा० सू० ७. १. ४.

संदधतीत्येव ।

[1]विश्लिष्टान्यपि वाचैव सुश्लिष्टानि प्रकुर्वते ।

॥ अथो ॥

ततश्च ।

॥ वागेवेदं सर्वमिति ॥

वाच्यवाचकरूपं हि जगत्सर्वं तु वाङ्मयम् ।

॥ *तद्यत्रैतदधीते वा भाषते वा वाचि तदा प्राणो भवति । वाक्तदा प्राणं रेळ्हि ॥

तदिति वाक्योपन्यासे । एतदु एतर्हि काले । वेदमधीते वा भाषते[2] वा ।

वाचो विवक्षितायास्तु प्राणो वै प्रेरको भवेत् ।
तं प्राणं रेळ्हि वाक्चेयमास्वादयति हर्षिता ॥

लिह आस्वादनेऽदादिर्लड्गुणस्तिपि लश्च रः ।

... ...

॥ अथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेळ्हि ॥

---

१. 'विशिष्टा' घ. २. 'षते । वाचो वि' घ.

---

* 'तत्तस्यां वाक्संहितायामियमुपपत्तिरुच्यत इति शेषः । यत्र यदा' इति सायणः ।

तूष्णींभावस्वापयोर्हि वाचं प्राणस्तु लेढि वै ।
स्वपितीति *'रुदादिभ्य' इडस्त(ः) छान्दसो भुवः(?) ॥[1]

॥ तावन्योन्यं रीळ्हः ॥

ढत्वधष्टुढ्लोपेति दीर्घो रीढःपदं तसि ।
लेह्नं कुरुतेऽन्योन्यं वाक्प्राणावेवमेव हि ॥

तत्र च,

॥ वाग्वै माता प्राणः पुत्रः । तदप्येतदृषिणोक्तम् ॥

मन्त्रेण सध्रिणा वा ।

॥ †एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे । तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरमिति ॥

एकः असहायः। सुपर्णः सुपतनः। समुद्रं संसारम्। आविवेश। स प्राण इदं विश्वं भुवनं जगत् §विचष्टे पश्यति। तं पाकेन पक्केन मनसा पश्यं दृष्टवानस्मि। अन्तितः समीपे। तं प्राणं माता वाक् लेळ्हि[2]। सः उ पुनः रेळ्हि रेढि मातरं वाचमिति।

---

१. 'इती ट्र सच्छान्द' ख. २. 'रेढि' ख. 'अत्र सर्वत्र ळिह्न इत्यस्य स्थाने ह्लि इति खपाठानन्दाश्रममुद्रितपाठौ।

---

* पा० सू० ७ २. ७६. † ऋक्सं १०. ११४. ४.

§ 'विचष्टे विशेषेण ख्यापयति। सति हि प्राणे जीवन्तः पुरुषा लोकं विख्यातं कुर्वन्ति न तु प्राणरहिता मृताः' इति सायणः।

॥ स य एवमेतां संहितां वेद संधीयते प्रजया पशुभि-
र्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥

उक्तार्थम् ।

॥ अथातः प्रजापतिसंहिता ॥

उच्यते ।

कथम्,

॥ जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः संधिः ॥

करणे किः ।

॥ प्रजननं संधानम् ॥

भावे ल्युट्द्वयम् ।

॥ सैषादितिः संहिता ॥

अदितिरूपोऽक्षीणत्वात्प्रजापतिः ।[1]

॥ अदितिर्हीदं सर्वम् ॥

व्याचष्टे—

॥ यदिदं किञ्च पिता च माता च पुत्रश्च प्रजननं च ॥

इत्वं *‘द्यतिस्यतीति’ क्ति ‘$दोऽवखण्डन’ इत्यतः ।

॥ तदप्येतदृषिणोक्तम् ।

---

१. ‘रूपः क्षो°’ घ.

---

* पा० सू० ७ ४. ४०. $ धातुपाठः ११४८

मन्त्रेण गोतमेन वा ।

॥ अदितिर्माता स पिता स पुत्र इति ॥

*अदितिर्द्यौरित्यृचोऽस्या द्वितीयः पाद ईरितः ।

अदितिः द्यौः स्वर्गः । अदितिरन्तरिक्षं खम् । अदितिर्माता पिता पुत्रश्च । विश्वे सर्वे देवा अदितिः । पञ्चजनाः

रक्षांसि पितरो देवा गन्धर्वा असुरास्तथा ।
एते पञ्चजना यद्वा वर्णाः स्युः सनिषादकाः ॥

अदितिर्जातम् उत्पन्नम् । अदितिर्जनित्वं जनिष्यमाणम् ।

भविष्यति जनेरित्वं क्ते चात्वे जातनिर्वचः ।

॥ स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति सर्वमायुरेति ॥

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां संहितोपनिषदि
द्वितीयोऽध्यायः ॥

---

१. 'गौ' ख. २. अदितिः इत्यारभ्य माता इति पर्यन्तं घपाठे नास्ति ।
३. 'स पिता स पु' घ. ४. जपाठे द्विर्वचनं नास्ति ।

---

* अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वेदेवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥
[ऋक्सं १. ८९. १०]

अथ संहिताया उपासनान्तरं[1] विधत्ते—

॥ प्राणो वंश इति स्थविरः शाकल्यः ॥

मन्यत इति शेषः ।

गर्गादिश्शाकलाद्गोत्रेऽपत्ये यञ्वृद्धिरादितः ।

उपपादयति —

॥ तद्यथा शालावंशे सर्वेऽन्ये वंशाः समाहिताः स्युः ॥

शाला गृहम् । सम् उपरि ।

॥ एवमस्मिन्प्राणे चक्षुः श्रोत्रं मनो वागिन्द्रियाणि शरीरम् ॥

पञ्चवृत्त्यात्मके प्रधाने चक्षुरादीनि समाहितानि इति शाकल्यमतम् ।

अत्र,

॥ सर्व आत्मा समाहितः ॥

सम्यङ्निविष्ट उक्तो निर्भुजादिरूप आत्मा ।

॥ तस्यैतस्यात्मनः प्राण ऊष्मरूपम् ।

निर्भुजाद्यात्मनः प्राण ऊष्मा शषसहा(द्या?)त्मकः ।

॥ अस्थीनि स्पर्शरूपम् ॥

१. 'नानन्तरं' घ.

कादयो मान्तकास्स्पर्शा अस्थास्थीन्यात्मनो भवेत्।

॥ मज्जानः स्वररूपम् ॥

अचः स्वराः।

॥ मांसं लोहितमित्येतदन्यच्चतुर्थमन्तस्था रूपम् ॥

यरलवा अन्तस्थाः।

॥ इति ह स्माह ह्रस्वो माण्डूकेयः ॥

माण्डूकेयमतं दूषयति—

॥ त्रयं त्वेव न एतत्प्रोक्तम् ॥

गुरुभिर्नस्त्रयं प्रोक्तमस्थि मज्जा च पर्व च।
अन्तस्था (ः) पर्व स्पर्शोष्ममध्यवर्तित्वसाम्यतः॥

स्पर्शा अस्थीनि मज्जानः स्वरा अन्यं तु पर्व च।

॥ तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति त्रीणीतः षष्टि शतानि त्रीणीतः ॥

अनोऽल्लोपे[1] कृते चुत्वं मज्ज्ञामस्थ्नां न पर्वणाम्[2]।
पृष्ठवंशे दण्डवस्तु पार्श्वे दक्षिणतः खलु॥

षष्ट्युत्तरं तु त्रिशतमस्थि सव्येऽपि वै तथा।

॥ तानि सप्तविंशतिशतानि भवन्ति ॥

---

१. 'आऽऽयल्लो' ख. २. 'चुत्वमस्थ्नाम्मज्ज्ञाम' ख.

पार्श्वद्वये सप्तशतं विंशत्यधिकमेव तत् ।

॥ सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः ॥

अब्दे दिनस्य रात्रेश्च संख्यानं मिलितं त्विदम् ।
शतानि सप्त प्रोक्तानि ततो विंशतिरेव च ॥

॥ स एषोऽहःसंमानश्चक्षुर्मयः[1] श्रोत्रमयश्छन्दोमयो
मनोमयो वाङ्मय आत्मा ॥

सम्मानो रूपमत्रोक्तं सम्यग्ज्ञन्तव्यमित्यतः ।

चक्षुःश्रोत्रेति प्रदर्शनम् । सर्वेन्द्रियरूपम् । छन्दो गायत्र्यादि मनो ज्ञानम् । वागिति पाणिपादपायूपस्थानामुपलक्षणम् । तस्मात्पुरुषोऽहोरात्रतुल्यपरिच्छेद इत्यर्थः ।

॥ स य एवमेतमहःसंमानं चक्षुर्मयं श्रोत्रमयं मनोमयं वाङ्मयमात्मानं वेदाह्नां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति ॥

सायुज्यमेकलाभ[2]भाक्त्वम् । रूपं बलम् । लोकं स्थानम् । पुत्री बहुशुभपुत्रकः । पशुमान् क्षीराढ्यबहुपशुकः । शताब्दं सर्वमायुः । वेद यः सोऽश्नुते ।

प्रथमः खण्डः ।

---

१. 'ह्र समानश्च' ज. २. 'लोभ' ब.

॥ अथ कौण्ठरव्यः ॥

मृदुभाषी कुण्ठरवस्तद्गोत्रं कौण्ठरव्यकः ।
यदुक्तवांस्तद्वक्ष्याम इति शेषोऽथ मङ्गले ॥

॥ त्रीणि षष्टिशतान्यक्षराणां त्रीणि षष्टिशतान्यूष्मणां त्रीणि षष्टिशतानि संधीनाम् ॥

विद्यादिति शेषः ।

यत्तु दक्षिणपार्श्वेऽभूत्षष्ट्युत्तरशतत्रयम् ।
अक्षरेऽज्दृष्टिरत्र (स्यात्) सव्ये हल्दृष्टिरेव च ॥

अज्झल्दृष्टिः संधिषु स्यादूष्मेति हल ईरिताः ॥

॥ यान्यक्षराण्यवोचामाहानि तानि यान्यूष्मणोऽवोचाम रात्रयस्ता यान्संधीनवोचामाहोरात्राणां ते संधयः ॥

वचेर्लुङ् च्लेर[*]स्यतीत्यङ् वच उम्यङ् गुणो मसि ।
स्वरेषु स्यादहर्दृष्टी रात्रिदृष्टिश्च हल्सु वै ॥

अन्तस्थासु [1]संधिदृष्टिरिति दृष्टित्रयं त्विदम् ।

॥ इत्यधिदैवतम् ॥

उक्तार्थम् ।

---

१. इतः आरभ्य 'वेदपुरुषो महापुरुष इति' इति पर्यन्तो भाग एकस्य ताल-पत्रस्य नष्टत्वात्खपाठे नष्टः ।

---

* पा० सू० ३. १. ५२.

॥ अथाध्यात्मम् ॥

उच्यते ।

॥ यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मम् ॥

अत्राक्षु अस्थिदृष्टिः ।

॥ यान्यूष्मणोऽधिदैवतमवोचाम मज्जानस्तेऽध्यात्मम् ॥

अहःसु मज्जदृष्टिः ।

ननु प्राण ऊष्मरूपमित्युक्तम् । कथं मज्जत्वमित्याह—

॥ एष ह वै सम्प्रति [1]प्राणो यन्मज्जा ॥

सम्प्रति युक्तम् । यत् यः ।

॥ एतद्रेतः ॥

प्राण इत्येव ।

कुतः—

॥ न ह वा ऋते प्राणाद्रेतः सिच्यते ॥

(लो ? यो) नौ ।

छन्दस्त्वा'*ह्रस्वक' इति प्रकृत्या ह्रस्वता न तु ।

॥ यद्वा ऋते प्राणाद्रेतः [2]सिच्यते पूयेन्न संभवेत् ॥

---

१. 'प्राणाः यन्मज्जे तद्रेतः मह' ज. २. 'सिच्येत' ज. ट.

---

* पा० सू० ६. १ १२८.

यद्वा यदि । पूयेत् पूयं स्यात् । न संभवेत् न वर्धते ।

॥ यान्संधीनधिदैवतमवोचाम पर्वाणि तान्यध्यात्मम् ॥

अन्तस्थासु पर्वदृष्टिः ।

॥ तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामिति
पञ्चेतश्चत्वारिंशच्छतानि पञ्चेतः ॥

एकपार्श्वे पञ्चशतं चत्वारिंशच्छतान्यतः ।

॥ तदशीतिसहस्रं भवति ॥

चत्वारिंशत्पञ्चशतद्वयमेलनतास्त्विदम् ।

॥ अशीतिसहस्रं वा अर्कलिनो बृहतीरहरभिसम्पादयन्ति ॥

अहरभि महाव्रतं प्रति । *अर्कलिनः अलिनः(?) केचिज्ज्ञातमहाव्रताः ।

---

* 'एवमशीत्यधिकसहस्रसम्पत्तौ सत्यां तत्संख्योपेतास्थ्यादिमतः पुरुषस्यादित्यरूपत्वं संपद्यते । अर्के लीयन्त इत्यर्कलिनः आदित्यस्य रश्मयः । ते चाशीत्यधिकं सहस्रं भवन्ति । अतः पुरुषस्य संख्यासाम्यादादित्यरूपत्वम् । आदित्यस्य रश्मीनां सहस्रसंख्या चाथर्वणिकैराम्नायते– "सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः" इति । तेन च सहस्रेणाशीतिरप्युपलक्ष्यते । किञ्चैता अस्थ्यादिगताः संख्या बृहतीच्छन्दस्का ऋचः संपाद्य महाव्रताख्यमहः सर्वतः संपादयन्ति । तस्मिंश्चाहनि बार्हती तृचाशीतिर्विद्यते । ताश्च बृहतीच्छन्दस्काः एवमत्र संपादनीयाः । षट्त्रिंशदक्षरा तावदेका बृहती । तथा सति षट्युत्तरशतत्रयसंख्यया दश बृहत्यः संपद्यन्ते । तदेवं बृहतीद्वारेण महाव्रताख्यस्याह्नः संपादनाद्यथोक्तसंख्योपेतमस्थ्यादिध्यानं प्रशस्तमित्यर्थः' इति सायणः ।

महाव्रते चितोऽर्कोऽग्निर्निष्केवल्यमथापि वा ।
बृहतीनामशीतिं ते विदू रूपं सहस्रतः ॥

॥ स एषोऽक्षरसंमानश्चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा ।

उक्तार्थम् ।

॥ स य एवमेतमक्षरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां सलोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति ॥

द्वितीयः खण्डः

मतान्तरमाह—

॥ चत्वारः पुरुषा इति बाध्वः ॥

चत्वारः पुरुषा ज्ञेया इति बाध्वस्तु मन्यते ।
व्यधीत्य विद्या ताः पाति हन्तीत्येवं तु बध्वगीः ॥

तस्य ऋष्याणि पुत्रः स्याद्बाध्वस्तन्मतमुच्यते ।

॥ शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुष इति ॥

यथोद्देशं लक्षणान्याह—

॥ शरीरपुरुष इति यमवोचाम[1] स एवायं दैहिक आत्मा ॥

अवयवेषु स्थितो वयस्वी ।

॥ तस्य योऽयमशरीरः प्रज्ञात्मा स रसः ॥

भोक्ता स्वामी ।

॥ छन्दःपुरुष इति यमवोचामाक्षरसमाम्नाय[2] एव ॥

स वेदः पठ्यमानोऽत्र गद्यपद्यात्मको मतः ।
*'म्ना अभ्यासे' कर्मणि घञ् युगित्याम्नायनिर्वचः ॥

॥ तस्यैतस्याकारो रसः ॥

†अकारो वै सर्वा वागिति प्रागध्यगीष्महि ।

॥ वेदपुरुष इति यमवोचाम[3] येन वेदान्वेद ऋग्वेदं यजुर्वेदं सामवेदम् ॥

विदेः कर्मणि घञ् वेदः प्राधान्यान्मन्त्र उच्यते ।
जानाति मनसा येन ऋग्यजुःसाममन्त्रकान् ॥

स वेदपुरुषो नाम चतुर्वेदसमन्वयी ।

---

1. 'यद्वो' ख, घ. 2. 'यदवो' घ. 3. 'यद्वो' घ.

---

* धातुपाठः ९२९. † ऐ० आ० २. ३. ६.

॥ तस्यैतस्य ब्रह्मा रसः ॥

ब्रह्मत्वकार्यृत्विग्ब्रह्मा ।

॥ तस्माद् ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो यज्ञस्योल्बणं पश्येत् ॥

उल्बणमूनातिरेकम् । तस्मात् साररूपत्वात् ।

विद्यावतः पुण्ययोगी ब्रह्मिष्ठ इति कथ्यते ।
अथर्वक्षेत्रवान्ब्रह्मा ह्यृग्यजुस्सामभागवान् ॥

पशुसोमेष्टिरूपस्य यज्ञस्य भिषगुच्यते ।

॥ महापुरुष इति यमवोचाम संवत्सर एव ॥[1]

कीदृशः,

॥ प्रध्वंसयन्नन्यानि भूतान्यैक्या भावयन्नन्यानि[2] ॥

कानिचिद् भूतजातानि भाग्यहीनानि नाशयन् ।
कानिचिद्भाग्ययुक्तानि भोगयुक्तानि कल्पयन् ॥

यैाति सोऽब्दाभिमानी तु महापुरुष उच्यते ।

॥ तस्यैतस्यासावादित्यो रसः । स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्यः एकमेतदिति विद्यात् ॥

---

१. 'यदवो' घ. २. 'यानि' घ.

य आत्मा वर्तते देहे यश्च मण्डलपूरुषः ।
एकत्वमनयोर्युक्तमेवमुक्तं यजुष्यपि ॥

*'स यश्चायं पुरुषे यश्चासावादित्ये स एक' इति ।

उपपादयति—

॥ [1]तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति ॥

वीक्षते सर्व एवं हि मामसावुदगादिति ।
तेन सूर्यदैहिकयोरैक्यं सुस्पष्टमेव च ॥

॥ तदप्येतदृषिणोक्तम् ॥

मन्त्रेण [2]कुत्सेन वा ।

कथम् । पठति—

॥ ¶चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्त-
स्थुषश्चेति ॥

अस्या ऋचोऽर्थो व्याख्यातः पूर्वमेव यथामति ।

॥ एतामनु[3]विधं संहितां संधीयमानां मन्य इति
ह स्माह बाध्वः ॥

---

१. 'यस्मात्पु' ज, 'तस्मात्पुरुषं प्रत्या' घ.
२. 'कुत्थ्सेन' घ. ३. 'विधां' ज.

---

* तैत्तिरीयोपनिषत् २. ८. ¶ ऋक्सं० १. ११५. १.

विधा प्रकारः। अनुविधम् उक्तानतिक्रमेण, संहितां संधीयमानां, चिन्त्यमानां, मन्ये, जानामीति[1] बाध्व ऋषिराह स्म।

उक्तमर्थं सर्ववेदसिद्धान्तैर्दृढयत्यथ।

॥ एवं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते ॥

विचार्य निर्णयः प्रोक्तो मीमांसन्तेपदेन तु।
मीमांसन्ते *'मान्बधेति' सनीत्वे दीर्घ उच्यते ॥

§ऋग्वेदाध्यायिनः सर्वे निष्केवल्ये महाव्रते।
प्रतिपाद्यं सर्वदृश्यं सूर्यमाहुर्न चापरम् ॥

॥ एतमग्नावध्वर्यवः ॥

मीमांसन्त इत्येव।

यजुर्विदोऽग्निचयने सूर्यं श्रेष्ठं वदन्ति च।

॥ एतं महाव्रते छन्दोगाः ॥

महाव्रतस्तोत्रविधौ सामगैरेष कथ्यते।

॥ एतमस्याम् ॥

आचक्षत इत्येवं[2]।

---

१. 'ति बह्वश्च ऋषिराह स्म' घ. २ 'व कथम्, पृ' घ.

---

* पा० सू० ३ १. ६. § 'बह्व्य ऋचो यागप्रयोगार्थं येषां होतृणां ते होतारो बह्वृचाः। ते च यथोक्तमध्यात्ममधिदैवतमेकमेव सन्तं परमात्मानं महत्युक्थे प्रौढे शस्त्रे मीमांसन्ते विचारयन्ति ध्यायन्तीत्यर्थः'। इति सायणः।

पृथिव्यामस्ति यद्वस्तु स एष इति निर्णयः।
उत्तरत्राप्येवमेव शेषः स्यादर्थ एव च॥

॥ एतं दिवि ॥

स्वर्गे।

॥ एतं वायौ। एतमाकाशे। एतमप्सु। एतमोषधीषु ॥

*'ओषधेश्च विभक्तौ' इति दीर्घः।

॥ एतं वनस्पतिषु। एतं चन्द्रमसि। एतं नक्षत्रेषु। एतं सर्वेषु भूतेषु ॥

किं बहुना,

॥ एतमेव ब्रह्मेत्याचक्षते ॥

सूर्योऽसौ परमं ब्रह्म विज्ञातव्यो न चापरः।
एतद्विभूतयोऽप्यन्या देवता इति निर्णयः॥
एकस्यास्य कर्मभेदात्स्तुतिर्नाम च भिद्यते।
न्यग्भूतान्यकर्मीशित्वमग्न्यादौ कथमन्यथा॥

॥ स एष संवत्सरसंमानश्चक्षुर्मयः श्रोत्रमयः छन्दोमयो मनोमयो वाङ्मय आत्मा। स य एवमेतं संवत्सरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं वाङ्मयमात्मानं परस्मै शंसति ॥

तृतीयः खण्डः।

* पा० सू० ६. ३. १३२.

॥ दुग्धदोहा अस्य वेदा भवन्ति ॥

य इत्युक्तोऽस्येत्युक्तः । पितुराचार्याद्वान्यः परः ।

महाव्रतेऽत्र योऽन्यस्मै निष्केवल्यं तु शंसति ।
संपद्यन्ते तस्य वेदा यथा निक्षीरधेनवः ॥

भरणोपद्रवायैव स्युर्न भोगप्रसिद्धये ।
वाक्यार्थमध्ये विच्छेदादनार्षं खण्डखण्डनम् ॥

किञ्च,

॥ न तस्यानूक्ते भागोऽस्ति ॥

वाङ्मये[1]ऽप्यनुवक्तव्ये नास्य भा[2]गोऽस्ति कश्चन ।

॥ न[3] वेद सुकृतस्य प[4]न्थामिति ॥

इतिश्चार्थे ।

पन्थानमिति शब्दे तु नशब्दो लुप्यतेऽत्र वै ।
न च मार्गं विजानाति सुकृतस्य सुकर्मणः ॥

॥ तदप्येतदृषिणोक्तम् ॥

मन्त्रेण बृहस्पतिना वा ।

कथम्,

---

१. ' ङ्मयेऽप्यनु ' घ. २. ' लाभो ' घ.
३. ' न हि प्रवेद सु ' व. ४. ' न्थानमि ' ज.

॥ *यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पन्थामिति ॥ ॥

यस्तित्याज सचिः संश्लेषः तद्विदं सखायं समानाख्यानं तुल्यलाभालाभं न तस्य वाचि वाङ्मये अपि भागो लाभः अस्ति । यत् यदि । ईम् अपि । शृणोति यद्यपि शृणुयात् । अलकम् अमुष्ठु शृणोति । न हि प्रवेद न जानाति सुकृतस्य सुकर्मणः पन्थानम् इत्यर्थं मत्वा किञ्चिद्व्याचष्टे—

॥ न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पन्थानमित्येतत्तदुक्तं भवति । तस्मादेवं विद्वान्न परस्मा अग्निं चिनुयात् ॥

अध्वर्युः ।

---

१. 'न्थानमिति' च, ज २. 'समाख्यानं तुल्यलाभलोभम्' घ.
३. 'यदीं शृणोति । अल' घ. ४. 'प' घ. ५. 'द सुकृ' ख.

---

* ऋक्सं १०. ७१. ६. 'योऽयं वेदः सोऽयं यथाशास्त्रमध्येतॄणां पुरुषाणां सखा । स्वार्थबोधनोपकारित्वात् । न केवलं सखा किंतु सचिविदपि । सचिशब्दः सखिवाची । अत एव शाखान्तरे– "साखिविदम्" [तै॰ आ॰ प्र॰ २ अ॰ १५] इति पठन्ति । यो माणवकोऽध्येता सोऽपि वेदस्य सखा संप्रदायोच्छेदनिवारकत्वेन वेदं प्रत्युपकारित्वात् । तादृशमुपकारिणमध्येतारं वेत्तीति सचिवित् । तमेतमभिज्ञं सखायं यः पुमांस्तित्याज परार्थे विनियोगेन परित्यजति तस्य पुरुषस्य वाच्यपि भागो नास्ति अध्ययननिमित्तमपि सुकृतं न विद्यते यदीं शृणोति यद्यपि वेदार्थश्रवणं तदप्यलकं शृणोत्यलीकश्रवणमेव' । इति सायणः ।

॥ न परस्मै महाव्रतेन स्तुवीत ॥

उद्गातापि ।

॥ न परस्मा एतदह्नः शंसेत् ॥

होता ।

तत्र च,

॥ कामं पित्रे वाचार्याय वा शंसेत् ॥

कामं यथेष्टम् ।

॥ आत्मन एवास्य तत्कृतं भवति ॥

पित्राचार्ययोरा[1]त्मत्वात् । तद् शंसनम् ।

॥ स यश्चायमशरीरः प्रज्ञात्मा[2] यश्चासावादित्य एकमेत-
दित्यवोचाम ॥

उक्तवन्तो वयं देही सूर्यश्चैक इति स्फुटम् ।

ततः किम्,

॥ तौ यत्र विहीयेते चन्द्रमा इवादित्यो दृश्यते ॥

तत्रेति शेषः ।

यत्र काले शरीरेण त्यज्येते सूर्यदे[3]हिकौ ।
तत्र कालेऽरिष्टमेतद्रविर्दृश्यत इन्दुवत् ॥

---

१. 'योरेकत्वात्त' ख. २. 'प्रज्ञ आत्मा' घ. ३. 'सूर्यदे' घ.

शीतलश्च सुदर्शश्च च्छायाव्यामिश्ररश्मिकः ।

किञ्च,

॥ न रश्मयः प्रादुर्भवन्ति ॥

प्रादुर्भावः प्रकाशः ।

॥ लोहिनी द्यौर्भवति यथा मञ्जिष्ठा ॥

रक्ता द्यौर्दृश्यतेऽनेन त्वलक्तकरसोपमा ।

॥ व्यस्तः पायुः ॥

व्यत्यस्तं स्याद् गुदद्वारं विवृतं सर्वदैव तु ।

॥ काककुलायगन्धिकमस्य शिरो वायति ॥

काकनीळगन्धयुक्तं शिरश्चास्योपलभ्यते ।

* 'उपमानाच्च' इतीत्वम् । कुत्सायां कन् । वायति । वातेर्गत्यर्थात् कर्मणि यकि लस्य तिः ।

॥ संपरेतोऽस्यात्मा न चिरमिव जीविष्यतीति विद्यात् ॥

इव एव ।

---

१. 'तस्य ति' ख.

---

* पा० सू० ५. ४. १३७.

एवं दृष्टारिष्टकस्य त्वात्मदेहस्य वै स्थितिः[1] ।
गमिष्यति परं लोकं[2] जीविष्यति चिरं न च ॥

जानीयाच्छास्त्रविद्विद्वान्दृष्टारिष्टः स्वयं तु वा ।

॥ स यत्करणीयं मन्येत तत्कुर्वीत ॥

दृष्टारिष्टस्य यच्छास्त्रे[3] कार्यमुक्तं तदाचरेत् ।

किं तत्करणीयमित्याह—

॥ *यदन्ति यच्च दूरक इति सप्त जपेत् ॥

प्रथमात्र वसिष्ठस्य पवित्रस्योत्तरा तु षट् ।
गायत्र्य[4] एता देवतात्र[5] पवमानस्तु सोमकः ॥

। $आदित् प्रत्नस्य रेतस इत्येका ॥

जपेदित्यत्र या ता(श्वीश्वे)त्यवं शेषो जपेदृचम् ।
गायत्र्यां[6] सूर्यमभ्यर्च्योद्वत्सो[7] नाम महामुनिः ॥

अपमृत्योर्विनाशाय कालमृत्योरसुखाय च ।

॥ £यत्र ब्रह्मा पवमानेति षट् ॥

---

१. ' तः ', घ. २. ' लोके ' घ. ३. ' स्त्रे यद्यदुक्तं तदा ' ख.
४. ' यत्र्येता ' ख. ५. ' देवात्र प ' घ. ६. ' त्र्यास्सूर्यं ' घ.
७. ' भ्यर्च्योद्वत्थसो ' ख.

---

* ऋक्सं० ९. ६७. २१. $ ऋक्सं० ८. ६. ३०.
£ ऋक्सं० ९. ११३. ६.

जपेदित्येव ।

पवमानं सोममस्तौत्पङ्क्तिभिः काश्यपो मुनिः ।

॥ *उद्वयं तमसस्परीत्येकाम् ॥

जपेदित्यत्र या ता[1]श्चेत्येवं शेषो जपेदिमाम् ।
अनुष्टुभा सूर्यमस्तौत्प्रस्कण्वः काण्व उत्तमः ॥

इति पञ्चदशर्चस्य जपेनाभ्युदयो भवेत् ।
कालमृ[2]त्योस्तथा नाशस्त्वपमृत्योर्भवेद्ध्रुवम् ॥

॥ अथापि यत्र छिद्र इवादित्यो दृश्यते रथनाभिरिवा[3]भिख्यायेत छिद्रां वा छायां पश्येत्तदप्येवमेव विद्यात् ॥

अथापि । किञ्चेत्यर्थः । छिद्रः छिद्रवान् । अभिख्यानमुपलम्भः । तत् तत्र ।

यत्र काले तु सच्छिद्रो रथनाभिनिभो रविः ।
[4]दृश्येत यदि वा छायां छिद्रां पश्येदथात्मनः ॥

विद्यात्तत्राप्येवमेव जप्यं पञ्चदशर्चकम् ।

॥ अथाप्यादर्शे वोदके वा जिह्माशिरसं वाशिरसं वात्मानं पश्येद्विपर्यस्ते वा कन्याके जिह्मेन वा दृश्येयातां तदप्येवमेव विद्यात् ॥

---

1. 'ताश्चे' ख. 2. 'मृत्युस्त' घ.
3. 'वाख्यायेत' घ. 4. 'दृश्यते' ख.

---

* ऋक्सं० १. ५०. १०.

कन्याका नेत्रतारा । जिह्मेन वक्ररूपेण ।

छायामादर्शजलयोः पश्येन्निशिरसं[1] यदि ।
अथवा वक्रमूर्धानं यदि वाप्यक्षितारके[2] ॥

दृश्येयातां वक्ररूपे यद्वा व्यत्यस्तदेहके ।
पादावूर्ध्वमधोमूर्धेत्यत्रापि जप एष तु ॥

दृशेर्लिङ्[3] कर्मणि यकि सीयुडातामि वै भवेत् ।

॥ अथाप्यपिधायाक्षिणी उपेक्षेत तद्यथा बटरकाणि संपतन्तीव दृश्यन्ते तानि यदा न पश्येत् तदप्येव-मेव विद्यात् ॥

पिधाय नासिकाद्वारमङ्गुल्यग्रेण चक्षुषी ।
पश्येत्तत्र तु दृश्यन्ते चन्द्रिकाकृतिकानि हि ॥

ज्योतिर्मण्डलकानीह सम्पतन्तीव सर्वतः ।
पतेश्शतुर्नुमि[4] जसि संपतन्तिपदं विदुः ॥

तानि पश्येद्यदा नैव तदाप्येष जपो भवेत् ।

॥ अथाप्यपिधाय कर्णौ उपशृणुयात्स एषोऽग्नेरिव प्रज्वलतः रथस्येवोपब्दिस्तं यदा न शृणुयात्तदप्येव मेव विद्यात् ॥

अङ्गुल्यग्रद्वयेनैव कर्णौ सम्यक्पिधाय तु ।
शृणोति ह्यान्तरं घोषं सदाग्नेर्जाठरस्य वै ॥

---

१. ' निशिर ' ख. २. ' वाप्याक्षि ' घ. ३. ' दृशेर्यल्लिङ्ङि कर्मणि यकि सीयुड्यामि वै भवेत् ' घ. ४. ' तन्नुमि जसिस्सश्प ' घ.

रथघोषोपमं तं वै यदा न शृणुयात्तदा ।
अस्मिन्नरिष्टे जानीयाज्जप्यं पञ्चदशर्चकम् ॥

॥ अथापि यत्र [1]नील इवाग्निर्दृश्यते यथा मयूरग्रीवामेघे वा विद्युतं पश्येत् मेघे वा विद्युतं न पश्येन्महामेघे वा मरीचीरिव पश्येत तदप्येवमेव विद्यात् ॥

मयूरकण्ठसदृशो नीलोऽग्निर्दृश्यते यदा ।
निर्मेघे विद्युतं पश्येत्समेघे खे यदा न ताम् ॥
मेघान्धकारे सत्येव रश्मीनप्यस्य वेक्षते ।

मरीची रश्मिः । *'रश्मिरङ्गी मरीचिवत्' इति स्त्रीत्वाच्छसो(न) नः । पश्येत । तिपस्तः ।

विद्यादस्मिन्नरिष्टेऽपि जप्यं पञ्चदशर्चकम् ।

॥ [2]अथापि यत्र भूमिं ज्वलन्तीमिव पश्येत तदप्येवमेव विद्यात् ॥

पृथिवीं वा यदा पश्येज्ज्वालामालाकुलामिव ।
तदापि कुर्यात्प्रोक्तन्तु जप्यं पञ्चदशर्चकम् ॥

॥ इति प्रत्यक्षदर्शनानि ॥

इतिशब्दः प्रकारार्थस्तेनान्योक्ति[3]स्तु सूच्यते ।
अरुन्धतीं ध्रुवं चैव सोमजायामहापथम् ॥

---

१ 'नीलरूपाग्निर्द' ट. २. 'तथापि' ज. ३. 'क्तस्तु' घ.

---

* वैजयन्त्याम् अन्तरिक्षकाण्डे ज्योतिरध्याये षोडशं पद्यम् ।

यो न पश्येत्स जीवेन्न नरः संवत्सरात्परम् ।
अरश्मियुक्तमादित्यं रश्मिमन्तं च पावकम् ॥

यः पश्यति स जीवेन्न मासादेकादशात्परम् ।
रश्मिशाखा[1]द्रुमं दृष्ट्वा गन्धर्वनगराणि च ॥

दृष्ट्वा प्रेतान्पिशाचांश्च दश मासान्स जीवति ।
[2]छर्दिं मूत्रपुरीषं वा सुवर्णरजतप्रभम् ॥

प्रत्यक्षं यदि वा स्वप्ने नव मासान्स जीवति ।
अकस्माद्वा भवेत्स्थूलोऽप्यकस्माद्वा भवेत्कृशः ॥

प्रकृतेर्विकृतै[3]श्चैव योऽष्टमासान्स जीवति ।
पांसुस्थं कर्दमस्थं वा यस्य खण्डं पदं भवेत् ॥

अग्रतः पृष्ठतो वापि सप्त मासान्स जीवति ।
काकः कपोतो गृध्रो वा निलीनो यस्य मूर्धनि ॥

क्रव्यादः पक्षिणश्चैव षण्मासान्हि स जीवति ।
मृदि[4]तो वायुमिश्रेण पांसुवर्षेण वा पुनः ॥

छायां वा विकृतां पश्येत्पञ्च मासान्स जीवति ।
अमेघां विद्युतं पश्येद्दक्षिणां दिशमाश्रिताम् ॥

स मासांश्चतुरो जीवेन्मेघे[5]ऽपश्यंश्च विद्युतम् ।
रक्तगन्धाम्बरः स्रग्वी गच्छेद्वा दक्षिणां दिशम् ॥

खरोष्ट्रमपि वारोहेत्रीन्मासान्नातिजीवति ।
जले शक्रधनुर्वापि यदि पश्येन्न रोहति ॥

---

१. 'खान्द्रु' घ. २. 'मलं मूत्र' ख. ३. 'तत्रैव' घ.
४. 'मृदुतो' घ. ५. 'घं प' घ.

मासद्वयेन म्रियते दृष्ट्वा चेन्द्रधनुर्निशि ।
अप्सु वा यदि वादर्शे छायां पश्यति नात्मनः ॥

छायां वा विकृतां पश्येन्मासमेकं स जीवति ।
यस्य वै स्नातमात्रस्य वक्षः पादौ च शुष्यतः ॥

मस्तके वा भवेद्धूमः सोऽर्धमासं तु जीवति ।
शवगन्धि भवेद्गात्रं दन्तघातोऽपि यस्य च ॥

दृष्ट्वात्मानं मृतं स्वप्ने द्वादशाहं स जीवति ।
यस्य कृष्णौ करौ जिह्वा गरुत्माभासं[1] च वै मुखम्(?) ॥

गण्डे च पिङ्गलाकारे[2] स जीवेत्तु चतुर्दिनम् ।
मारुतो यस्य गात्रेषु चरन्मर्माणि कृन्तति ॥

जीवति त्रीनहोरात्रानतीत्य न स कर्हिचित् ।
अद्भिः स्पृष्टो न हृष्येद्यः सोऽह्नी द्वे न जीवति ॥

घोषं न शृणुयात्कर्णौ ज्योतिर्नेत्रे[3] न पश्यति ।
सद्योमृत्युः स वै प्रोक्त इत्यायुर्वेदभाषितम् ॥

इत्यरिष्टेषु कुर्वीत जप्यं पञ्चदशर्चकम् ।

॥ अथ स्वप्नाः ॥

वक्ष्यन्तेऽतः परं स्वप्ना मरणस्याभिसूचकाः ।

॥ पुरुषं[4] कृष्णं कृष्णदन्तं पश्यति ॥

स्वप्नं पश्यन् ।

---

१. 'भासश्च' घ. २. 'का का' घ.
३. 'त्रौ च' घ. ४. 'अथ पुरु' ज.

॥ स एनं हन्ति ॥

कृष्णदन्तः कृष्णवर्णः ।

॥ वराह एनं हन्ति ॥

अङ्गारवर्णसदृशो वराह इति केचन ।

॥ मर्कट एनमास्कन्दयति[*] ॥

लङ्घयति ।

॥ [§]आशु वायुरेनं प्रवहति ॥

प्र[1]च्याvayati ।

॥ सुवर्णं खादित्वापगिरति ॥

छर्दयति । तृतीय [2]उपसर्गः ।

॥ मध्वश्नाति[3] माक्षिकं पिबति बिसानि भक्षयति ॥

[†]कमलमूलं बिसम् ।

॥ एकपुण्डरीकं धारयति ॥

रक्तपद्मं तु शुक्लं वा शिरआदिषु धारयेत् ।

---

१. 'प्रच्याव' ख. २. 'उत्स' घ

३. 'ति बिसानि' च. ज. ट.

---

* 'समन्तान्मूर्धपर्यन्तमारोहति' इति सायणः । § 'अतिशीघ्रगामी प्रौढो वायुरेनं गृहीत्वा निम्नदेशे जलवत्प्रवहति' इति सायणः ।

† 'बिसानि पद्मादीनां नालानि' इति सायणः ।

खरैर्वराहैर्युक्तैर्याति ॥

खरैर्याति वराहैर्वा तद्युक्तैर्वा रथादिभिः ।

॥ कृष्णां धेनुं कृष्णवत्सां *नलदमाली
दक्षिणामुखो व्राजयति ॥

कृष्णां धेनुं कृष्णवत्सां गां रक्तकरवीरवान् ।
गमयेद्दक्षिणायां तु दिशि शीघ्रमितस्ततः ॥

॥ स यद्येतेषां किञ्चित्पश्येत् ॥

तत्र कर्तव्यमुच्यत इति शेषः ।

किञ्चिदित्यन्यशास्त्रोक्तदुःस्वप्नानां तु सूचनम् ।
भस्माभ्यक्तशरीरस्तु करभान् व्याळगर्दभान् ॥

वराहान्महिषान् यायादारूढो दक्षिणां दिशम् ।
परिष्वजेयुर्ये चापि प्रेताः प्रव्रजितास्तथा ॥

कार्पासतिलपिण्याकलोहानि लभते च यत् ।
स्वस्थस्तु लभते व्याधिं व्याधितो मृत्युमृच्छति ॥

अन्यः सुस्वप्नकात्सर्वो दुःस्वप्न इति निर्णयः ।
देवान्द्विजान्गोवृषभान् श्रीमतः सुहृदो नृपम् ॥

---

१. इतः परं ' णा अपिदधति ॥ आच्छादयन् ' इति पर्यन्तो भागः तालीपत्र-द्वयाभावात् ख पाठे नष्टः ।

---

* ' नलदमाली रक्तकुसुमग्रथितस्रग्वी ' इति सायणः ।

समिद्धमग्निं साधूंश्च निर्मलानि जलानि च ।
मांसमत्स्यान्स्रजं चैतान्वासांसि शिथिलानि च ॥

फलानि चैव शाकं च प्रासादं फलवृक्षकम् ।
गजं च पर्वतं चैव तदारोहणमेव च ॥

नदीनदसमुद्राणां तरणं चातिशोभनम् ।
पूर्वरात्रे त्रिवर्षेण स्वप्नस्य फलमादिशेत् ॥

मध्यरात्रे द्विवर्षेण चैकवर्षेण चान्ततः ।
इत्युक्तसर्वदुःस्वप्ने परिहारं ब्रवीत्यथ ॥

॥ उपोष्य पायसम्[1] ॥

चरुम् ।

॥ स्थालीपाकं श्रपयित्वा *रात्रिसूक्तेन प्रत्यृचं हुत्वा-न्येनान्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयात् ॥

दुःस्वप्नारिष्टशान्त्यर्थं येन गृह्येण सर्वतः ।
तत्र ग्राह्यं न हि स्वप्नो बाह्वृच्याध्यायिदोषकृत् ॥

यत्तन्त्रमाज्यभागान्तं गोमयालेपनादिकम् ।
तत्कृत्वा सम्यगेवाथ रात्रीति जुहुयात्ततः ॥

रात्रीति रात्रिं गायत्र्या रात्रिरेवाभ्यलोषयत् ।
अष्टर्चेनाज्यहोमस्तु प्राक्चरोरुपदेशतः ॥

---

१. ' पायसं चरुं श्रपयित्वा ' ख. ट.

---

* ' रात्री व्यख्यदायती ' [ऋक्सं० १. १२७. १.] इति सूक्तं रात्रिसूक्तम् ।

पायसेनाथ चरुणा होमे स्विष्टकृता पुनः ।
तन्त्रान्ते त्र्यवरान्विप्रानन्येनान्नेन भोजयेत् ॥

श्रुत्वाशिषो भुक्तवद्भ्यः स्वयं भुञ्जीत पायसम् ।
उपवासस्त्वहोरात्रा भुक्तिः स्याद्यदि वा दिवा ॥

किञ्च सर्वारिष्टशान्तिर्देव्याः पञ्चसहस्रकम् ।
सहस्रभोजनं शक्तौ देवतानां च पूजनम् ॥

पञ्चविप्रभोजनं तु कृच्छ्रपादत्रयं च वा ।
तिलप्रदानं गोपूजा पानीयस्य प्रदापनम् ॥

अश्वत्थसेवा वेदस्य स्वस्याभ्यासो यथाबलम् ।

॥ स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः श्रोता मन्ता द्रष्टादेष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपूरुषः स म[1] आत्मेति विद्यात् ॥[1]

*अतः शान्तिकर्मण ऊर्ध्वम् । ¶अश्रुतः श्रवणेन्द्रियराहितः । ‡अगतः अपरिच्छिन्नमाहात्म्यः । A अमतः बुद्ध्या न कल्पितः

1. ‘ स आत्मेति ’ ज.

* ‘ अतोऽस्माद्देहेन्द्रियादिसंघाताद्विलक्षण इति शेषः ’ इति सायणः ।

¶ ‘ अश्रुत इत्यादिभिः सप्तभिर्विशेषणैरिन्द्रियजन्यक्रियाकर्मत्वं निवारयति । अकारादयो वर्णाः परैरुच्चार्यमाणा उदात्तादिस्वरा वा यथा श्रोत्रेन्द्रियेण श्रूयन्ते नैवमात्मा श्रोत्रेण श्रुतः ’ । इति सायणः । ‡ ‘ यथा पादेन्द्रियजन्यया गमनक्रियया ग्रामान्तरं गम्यते नैवमसौ गतः ’ इति सायणः ।

A ‘यथा चतुर्भुजाद्युपेता विष्णवादिमूर्तिर्जडत्वान्मनसा ध्यानकाले प्रकाश्यते नैवमसौ मतः । स्वप्रकाशत्वान्मनसोऽमतो न विस्फारितः ’ इति सायणः ।

अदृष्टश्चक्षुषा न ग्राह्यः। [B]अविज्ञातः शास्त्रागम्यः। अनादिष्टः आदेष्टुमशक्यः। स्वयं तु श्रोता। घोष्टा वागिन्द्रियस्य प्रवर्तकः। अन्तरपुरुषः अन्तर्वर्तिपुरुषः। [C]स मे मम आत्मेति विद्यात्। शरीरे चिरं तिष्ठेदिति विद्यात्। स इत्यादरार्थः।

जपेन चरुहोमेन चिरञ्जीवी भवत्विह।
आत्मा समस्त्वविकृत इति वा चिन्तयेत्सुखम्॥

इति चतुर्थः खण्डः।

॥ अथ खल्वियं सर्वस्यै वाच उपनिषत्॥

सर्वेति निर्भुजप्रतृण्णक्रमाद्यर्थम्। ङसो ङे। बुद्धिपरिवृत्तेरियमित्युक्तिः। उच्यत इति शेषः।

॥ सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषद
इमां त्वेवाचक्षते॥

ङसो ङे। सर्ववाक्संबन्धिन्यो याः संहिताः पूर्वमुक्ताः ता इमामेवाचक्षते। ... ...।

B 'यथा मनसा सन्दिह्यमानं वस्तु स्थाणुचोरादिकं विज्ञानशब्दवाच्यया बुद्ध्या निश्चीयते नैवमसौ विज्ञातः सन्देहरहितत्वाद् बुद्ध्या न निश्चेतव्यः' इति सासण:। C 'कृतविघ्नपरिहार: स पुमानिति विद्यादित्यन्वयः। कथं विद्यादित्युच्यते-यः सर्वेषां भूतानामन्तरपुरुषो ब्रह्मादिस्तम्बान्तानां सर्वप्राणिनां देहमध्ये तत्तद्देहसाक्षित्वेन भासमानः परिपूर्णः परमात्मास्ति सोऽयं परमात्मा मे मम मुमुक्षोः पुरुषस्यात्मा स्वरूपमित्येवं विद्यात्। प्रमाणेन साक्षात्कुर्यात्। तदशक्तावुपासीतेत्यपि द्रष्टव्यम्' इति सायणः।

॥ पृथिव्या रूपं स्पर्शाः ॥

कादिमान्तेषु पृथिवीदृष्टिः कार्येति होच्यते ।

॥ अन्तरिक्षस्योष्माणः ॥

रूपमित्येव । अर्थश्च पूर्ववत् ।

॥ दिवः स्वराः ॥

रूपमित्येव ।

॥ अग्ने रूपं स्पर्शाः ॥

स्पर्शेष्वग्निदृष्टिः ।

॥ वायोरूष्माणः । आदित्यस्य स्वराः । ऋग्वेदस्य रूपं स्पर्शाः ॥

मार्दवसाम्यात् ।

॥ यजुर्वेदस्योष्माणः ॥

शषसहेषु यजुर्दृष्टिः ।

॥ सामवेदस्य स्वराः ॥

अचो ह्याश्रयति गानम् ।

॥ चक्षुषो रूपं स्पर्शाः । श्रोत्रस्योष्माणः । मनसः स्वराः ॥

अक्षु मनोदृष्टिः ।

॥ प्राणस्य रूपं स्पर्शाः । अपानस्योष्माणः । व्यानस्य स्वराः ॥

रूपमित्येव ।

इत्युक्तोपनिषद्वाचः सर्वस्याः समवायिनी ।
तुल्यत्वं पुरुषस्येह वीणया दर्शयत्यथ—

॥ अथ खल्वियं दैवी वीणा भवति ॥

देवसंबन्धिनी दैवी ।

॥ तदनुकृतिरसौ मानुषी वीणा भवति ॥

तदस्यानुकृतिः सादृश्यं यत्र सा ।

कथम्,

॥ यथास्याः शिरः ॥

दैव्या वीणाया उत्तमाङ्गम् ।

॥ एवममुष्याः शिरः ॥

मानुष्याः ।

॥ यथास्या उदरमेवममुष्या अम्भणम् ॥

वीणाग्रीवास्त्वधस्ताद्यद्दृश्यतेऽलाबुदारुवत् ।
*तदम्भणमिति प्राहुर्वीणानिर्माणकारिणः ॥

॥ यथास्यै जिह्वा ॥

---

१. 'अंहसम्' ट.

---

* 'अम्भणं वीणादण्डमध्यवर्ति छिद्रम्' इति सायणः ।

ङसो ङे । अस्या दैव्याः ॥

॥ एवममुष्यै वादनम् ॥

वाद्यते येन तत् ।

॥ *यथास्यास्तन्त्रयः ॥

शिराः ।

॥ एवममुष्या अङ्गुलयः ॥

अमुष्या मानुष्याः ।

॥ यथास्याः स्वराः एवममुष्याः स्वराः ॥

ध्वनयः ।

॥ यथास्याः स्पर्शाः एवममुष्याः स्पर्शाः ॥

स्पर्शाः षड्जादयः ।

॥ यथा ह्येवेयं शब्दवती तर्द्मवती ॥

शब्दो ध्वनिः । $तर्द्मो निर्ह्लादः । ¶'उ तृदिर्' अमन् ।

॥ एवमसौ शब्दवती तर्द्मवती यथा ह्येवेयं लोमशेन चर्मणापिहिता भवति एवमसौ लोमशेन चर्मणापिहिता ॥

---

* 'तन्त्रयोऽङ्गुलय इति पदद्वयं व्यत्यासेन योजनीयम् । अस्याः शरीरवीणाया अङ्गुलयो यथा बहुविधा दीर्घा वर्तन्ते तथैवामुष्याः काष्ठवीणायास्तन्त्रयो दीर्घतन्तवः' इति सायणः ।

$ 'धमनीभिः शरीरावयवानां दृढबन्धनं तर्दनम्' इति सायणः ।

¶ धातुपाठे १४४७.

लोमादिभ्यः शः ।

ननु मानुषी वीणात्र पटेनैव पिधीयते । न चर्मणा लोमशेनेत्यत उत्तरमुच्यते—

॥ लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति ॥

आच्छादयन्पुरा वीणा लोमशेनैव चर्मणा ।
धाञो (लो ? ल)ट् *'झिरदभ्यस्ता'च्छपः श्लौ द्वे दधत्यथ ॥

॥ स यो हैतां दैवीं वीणां वेद $श्रुतवदनो भवति ॥

यो वेत्ति सः ।

वदनेऽस्य श्रुतं हि स्यात्साङ्गोपाङ्गा श्रुतिः श्रुतम् ।

किञ्च,

। भूमिप्रास्य कीर्तिर्भवति ॥

भूमिप्रा ।

भूमिं प्राति पूरयतीत्यातः को[1]ऽनुपसर्गकः ।
अस्य कीर्त्या पटेनैव छाद्यते सकला मही ॥

भूमिपूरणस्य तु रूपमाह—

॥ यत्र कचार्या वाचो भाषन्ते विदुरेनं तत्र ॥

---

१. 'केऽनु' घ.

---

* पा० सू० ७. १. ४. $ 'श्रुतवदनः सर्वजनश्रोत्रप्रियं वदनमुक्तिर्यस्यासौ श्रुतवदनो विद्वत्सभायां राजसभायाञ्च सर्वेषां प्रियतमैर्वचनैरत्यन्तं रञ्जको भवति' इति सायणः ।

विद्वांसो यत्र भाषन्ते तत्र स्मृतस्या वदन्त्यमुम् ।
साङ्गोपाङ्गवेदविद् आर्या निर्मत्सराश्शुभाः ॥

॥ अथातो वाग्रसः ॥

उच्यत इति शेषः ।

वाचो रसस्तु सारांशः प्राप्यो येन स वाग्रसः ।

कथम्,

॥ यस्यां संसद्यधीयानो वा भाषमाणो *वा[1] विरुरु-
चुषेत[2] तत्रैतामृचं जपेत् ॥

(उ ? रु)चेत्सनिट उत्वं च लिङः सीयुड् गुणो न च ।
वेदोक्त्या वान्यवागुक्त्या य इच्छेत्[3] प्रीतिमात्मनः ॥
विद्वत्सभायां स जपेद्वाग्रसाख्यामिमामृचम् ।

§ ओष्ठापिधाना नकुली दन्तैः परिवृता पविः ।
सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥

---

१. 'वा विविरुरुचुषेत' ट. २. 'चि' घ.
३. 'च्छेद्दीप्तिमा' घ.

---

* वा न विरुरुचुषेत इति नकारसहितः पाठश्च पाठे मुद्रितसायणभाष्यसहित-पुस्तके च दृश्यते । 'न विरुरुचुषेत विशेषेण रुचिकरः सर्वजनानां रञ्जको यदि न भवेत्' इति सायणः । § 'ओष्ठापिधाना न । उपमार्थो नकारः । ओष्ठमपिधानं वस्त्रवदाच्छादनं यस्या जिह्वादिस्थानगतायाः वाग्देवतायाः सेयमोष्ठापिधाना । ओष्ठयोराच्छादकवस्त्रसादृश्यमेव न तु मुख्याच्छादकत्वमित्यभिप्रेत्योपमार्थो नकारः पठितः । कुलीदन्तैर्वज्रवद्घनीभूतैरन्तरालच्छिद्ररहितैर्दन्तैः परिवृता' इति सायणः ।

अनुष्टुभा वाचमस्तौद्वामदेवोऽत्र गौतमः ।
सर्ववाङ्मयसिद्ध्यर्थमिति बह्वृचकुञ्जराः ॥

ओष्ठौ प्राकाराविवापिधानौ यस्याः सा । नकुली । पृषोदरादिः । कुत्सितसंश्लेषरहिता । दन्तैर्द्वात्रिंशत्संख्यैः परिवृता वेष्टिता । पविः अतितीक्ष्णा । सर्वस्यै । ङसो ङे । सर्वस्या वाचः ईशाना । चारु सुन्दरम् । मामिह संसदि वादयेत् । अभिधापयेदित्यर्थः ।

॥ इति वाग्रसः ॥

इति वाग्रसमन्त्रोऽयं वर्णितो वाङ्मयप्रदः ।

इति पञ्चमः खण्डः ।

॥ अथ हास्मा एतत्कृष्णहारितो वाग्ब्राह्मणमिवो-
पोदाहरति ॥

इव एव । वाग्ब्राह्मणं,

वाचः प्राणं बलं रूपं संहितां पात्रमेव च ।
विदधद् ब्राह्मणमदः कृष्णहारीतको मुनिः ॥

गोत्रतो हरितः कृष्णो वर्णतः कर्मधारयः ।
उपोदाहरति ह्यस्मिन् लोके ह्यर्थे तु ङे कृतः ॥

॥ प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरः ॥

प्रजानामीश्वरोऽब्दाख्यः प्रजाः सृष्ट्वा ततः पुनः ।

व्यस्रंसत सुविश्लिष्टसन्धिबन्धात्मकोऽभवत् ॥

अथ,

॥ स च्छन्दोभिरात्मानं समदधात् ॥

स गायत्र्यादिभिर्वेदैर्वा[1] देहं समदधात्प्रभुः ।

॥ यच्छन्दोभिरात्मानं समदधात्तस्मात्संहिता ॥

सन्धानयोगादभवत्संहितेति पदं खलु ।

॥ तस्यै वा एतस्यै संहितायै णकारो बलं षकारः प्राण आत्मा ॥

बलं वीर्यं प्राण आत्मा चेतनश्चेति वै विदुः ।
ह्यसर्थे ह्यत्रयमिदं वाचो ह्यात्मा बलं तथा ॥

॥ स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेद ॥

*राजन्तमध्वराणां §पोषमेव दिवे दिवे ।
इत्यादौ णमृचां[2] षश्च[3] संहितामनुवेत्ति यः ॥

स वीर्यप्राणसहितां संहितां लभते शुभाम् ।

॥ आयुष्यमिति विद्यात् ॥

---

१. 'वैदेहं समधात्प्र' घ. २. 'चां षञ्च' घ. ३. 'षश्च' ख.

---

* ऋक्सं० १. १. ८. § ऋक्सं० १. १. ३.

णषकारबलप्राणध्यानमायुर्विवर्धनम् ।

॥ स यदि विचिकित्से*त्सणकारं ब्रवाणी३ँ अणकारा ३ इति ।

विचारे[1] प्लुतौ पूर्वस्सानुनासिकः ।

॥ सणकारमेव ब्रूयात ॥

तथा,

॥ सषकारं[2] ब्रवाणी३ँ अषकारा[3]ँ३ इति ॥

पूर्ववत्प्लुतौ ।

। सषकारमेव ब्रूयात ॥

णषकारबलप्राणध्यानाध्ययनकृद्भवेत् ।

इत्यर्थः ।

॥ ते यद्वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारा उँपाप्ताविति[4] ह स्माह ह्रस्वो माण्डूकेयः ॥

---

१. ' चारे प्लुतः सानुनासिकः ' घ. २. ' कारां ' ख.
३. ' कारां ३ इति ॥ सषकारामेव ' घ. ४. उदपात्ताचि ' घ.

---

* ' सणकारं ब्रवाणी ३ँ अणकारा ३ँ इत्येतत्सानुनासिकं प्लुतिद्वयं विचारार्थम् ' इति सायणः ।

णषकारध्यानलभ्योऽप्यन्यथा नो भवेत्सदा ।
माण्डूकेयो ह्रस्व आह स्म कथं[1] यत्तु ते वयम् ॥

आनुपूर्व्या संहितायामृचो नित्यमधीमहे ।
यच्च वायुः संहितेति माण्डूकेयेन भाषितम् ॥

स्मर्तव्यं च स्मरामोऽत्र वायुः प्राणबलात्मकः ।
अधीमहेऽध्या[2]यमिति मसो महिङि कः पदे ॥

तथा,

॥ अथ यद्वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयी-
यमध्या[3]यं प्रब्रूमस्तेन नो णकारषकारा उपा[4]प्ताविति ह
स्माह स्थविरः शाकल्यः ॥

शाकल्योऽप्यब्रवीद्धृस्वमाण्डूकेयवदेव हि ।

॥ एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः ॥

यद्वायुःसंहिताज्ञानाद्बलप्राणोपपादनम् ।
एतदेव विजानन्तः कावषेया महर्षयः ॥

ढक् क्षुद्रादेस्तु कवषादुक्तवन्तो वचस्त्विदम् ।

॥ किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे
वाचि हि प्राणं जुहुमः प्राणे[5] वा वाचं[6] यो ह्येव प्रभवः
स एवाप्ययः ॥

---

१. ‘ कथा यत्तु ते ’ घ.　　२. ‘ ध्यानमिति मसो मतिङि कः परे ’ ख.
३. ‘ ध्यार्थी ’ ट.　　४. ‘ पात्ताविं ’ घ.
५ ‘ प्राणो वा वाचयो ’ ख.　　६. ‘ णे वाचं ’ घ.

स संहितारूपो वायुरिति शेषः ।

अधीयानास्तु वागग्नौ प्राणं जुहुम एव हि ।
प्राणाग्नौ तूष्णीमासीना वाचं तु जुहुमो वयम् ॥

कोऽर्थो येषां ते किमर्था यागाधीतिबहिस्तु किम्[1] ।
यत्र वायौ जनिलयौ जगतस्तमुपास्महे ॥

कावषेयमतेनापि वायुदृष्टिर्दृढीकृता ।
इति नानामतेनोक्ता दृष्टयः संहितान्वयाः ॥

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

शब्दब्रह्मविभूतिश्च संहितोपनिषद्विषयम् ।

अथ संहिताज्ञानपात्रमाह—

॥ ता एतास्संहिता नानन्तेवासिने प्रब्रूयात् ॥

गुरोरन्ते समीपे तु कर्मणा मनसा गिरा ।
शुश्रूषुर्यो वसत्येव सोऽन्तेवासीति कथ्यते ॥

ततोऽन्यस्मै तु न ब्रूयादुक्ता एतास्तु संहिताः ।

॥ नासंवत्सरवासिने[2] ॥

ता एता ब्रूयादित्यत्र ।

अन्तेवास्यपि हीनाब्दो नैतासां पात्रतां भजेत् ।

---

1. 'तिम्' ख. 2, 'वत्थसर' घ.

एवमुक्तश्च,

शीलं संवत्सराज्ज्ञेयं शौचं संव्यवहारतः ।
प्रज्ञा संकथनाज्ज्ञेया त्रिभिः पात्रं परीक्षयेत् ॥

इति ।

॥ नाप्रवक्त्रे ॥

एता ब्रूयादित्येव ।

नैता वदेदप्रवक्त्रे ह्यन्तेवास्यब्दवासिने ।

॥ इत्याचार्या आचार्याः ॥

इति बह्वृचसिंहाचार्याः पात्रलक्षणमब्रुवन् ।

द्विरुक्तिर्बोधयत्यत्र ह्यध्यायस्य समापनम् ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां संहितोपनिषदि
तृतीयोऽध्यायः ॥

त्रिष्वेकः षट् च षट् चेति खण्डा ह्यत्र त्रयोदश ।
तृतीयारण्यके तु द्वाविंशतिः पञ्चविंशतिः ॥
त्रयोदशेति त्रिपर्वखण्डाः षष्टिरिति स्थितिः ।

समाप्तं तृतीयारण्यकम् ।

---

१. 'विंशेति' घ.

महाव्रतब्राह्मणं तु त्रिपर्वारण्यकं गतम् ।
महाव्रतस्य सूत्रं तु चतुर्थारण्यकं परम् ॥

मध्येऽधीता महानाम्न्यस्सांहित्यो धर्मयोगतः ।
धर्मश्शान्तिर्द्विवारण्यमेकाशिष्यकतादि च ॥

वैश्वामित्र्यो महानाम्न्य ऐन्द्र्यो वैके प्रजापतेः ।
इति ह्यार्षानुक्रमण्या स्थानमासां तु संहिता ॥

आम्नानान्मध्यतः स्पष्टा सूत्रब्राह्मणयोर्भिदा ।
महानाम्न्यो नव ऋचः पुरीषस्य पदानि च ॥

भूयस्त्वेन महानाम्न्यो ब्राह्मणग्रामवद्भवेत् ।
*'महानाम्नीरग्र' इति व्रताभ्यासाश्च सूच्यते(?) ॥

विश्वामित्र ऋषिस्तासामिन्द्रो वा वा प्रजापतिः ।
विराडनुष्टुबाद्योष्णिगथानुष्टुप्त्रिचद्भवेत् ॥

भुरिगनुष्टुबुष्णिकचाथानुष्टुब्बृहती ततः ।
भुरिगुष्णिकच पङ्क्तिश्च ऋचां छन्दांसि वै क्रमात् ॥

पुरीषेष्वादितः पञ्च गाय(त्र? त्र्यः)स्युः प्रजापतेः ।
आसुर्युष्णिक् तु षष्ठी स्यात्कार्यनुष्टुप् तु सप्तमी ॥

यजुर्गायत्र्यष्टमी तु दैवी तु जगती ततः ।
उपदेशागतं प्रोक्तं सर्वत्रेन्द्रस्य संस्तुतिः ॥

॥ †विदा मघवन्विदा गातुम‡नुशंसिषो दिशः ।

---

* आ० श्रौ० सू० ७. १४. २. † 'विद वेत्सि । अत्र वेदनस्य कर्मकारकस्य कस्यचिद्विशेषस्यानुपपादनात्सामान्याकारेण सर्वं जानासीत्ययमर्थो लभ्यते ' इति सायणः । ‡ 'यजमानस्य समीचीनेन मार्गेण स्वर्गं गन्तुं दिशो मार्गोपयुक्तान्दिग्विशेषाननुशंसिषोऽनुक्रमेण शंसोपदिश । किञ्च पूर्वीणां पूर्वसिद्धानां शचीनां शक्तीनां पते हे पालक पुरु प्रभूतं वसु धनं यस्यासौ पुरुवसुस्तत्संबोधनं हे पुरूवसो शिक्ष यजमानस्य हितोपदेशं कुरु ' इति सायणः ।

शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥

विदाः अवगच्छास्मान् । लोटो लेट् । (स्सित्वा ? सिबा)ण्न गुणो रुत्वे विदाःपदम् । हेमघवन् अन्नबहुल विदाः वेत्सि । लटो लेट् । गातुम् । गमनं जननमरणात्मकम् । अनु पश्चात् । शंसिषः स्तुतिशीलाः । शंसेरिस् । शस् । दिशः प्राच्याद्याः । शि(क्ष ? क्षा) । दीर्घः सांहितः । शचीनां बुद्धीनां कर्मणां वा पते स्वामिन् । पूर्वीणां पुरातनीनाम् । हे पुरूवसो ब(हु)धन इन्द्र अन्नवन् बहुधनबुद्धीनां कर्मणां पते,

गतागतं वेत्सि हि त्वमस्मानप्यवगच्छ वै ।
प्राच्याद्या रक्ष च दिशः सम्यक्त्वं स्तुतिकारिणीः ॥

आभिष्टमभिष्टिभिः प्रचेतन प्रचेतय ।
इन्द्र द्युम्नाय न इष एवा हि शक्रः ॥

अभिष्टिभिः अभ्य(र्थि ? र्थ)नीयाभिः स्तुतिभिः स्तुतः । अभि इष्टिः । शकन्ध्वादि । प्रचेतन प्रकृष्टज्ञान प्रचेतय अवबुध्यस्व हे इन्द्र द्युम्नाय धनाय नः अस्माकम् इषे अन्नाय ए(व ? वा) एवम् । दीर्घः सांहितः । हि खलु शक्रः सर्वत्र शक्तोपि ।

अस्मदन्नधनाद्यर्थमवबुध्यस्व वै प्रभो ।
सर्वशक्तिज्ञानपूर्ण सर्वस्तुत्यभिसंस्तुत ॥

॥ राये वाजाय वज्रिवः शविष्ठ वज्रिन्नृञ्जसे ।
मंहिष्ठ *वज्रिन्नृञ्जस आयाहि पिब मत्स्व ॥ ॥

---

* 'वज्रिन्वज्रयुक्तेन्द्र ऋञ्जसे सर्वथा त्वमनिष्टं परिहरसि' इति सायणः ।

राये धनाय । वाजाय अन्नाय । हे वज्रिवः वज्रयुक्तहस्तवन् ।

वज्रादिने(त्तुब ? मतुब्व)त्वं *'छन्दसीरे'ति (नु ? रु)श्च नः ।

§ शविष्ठ गन्तृतम ।

गत्यर्थाच्छवतेरिष्ठंस्तृ (पो ? चो) लोपोऽस्य चेष्ठनि ।

वज्रिन् वज्रो बलं तद्वन् A ऋञ्जसे गच्छसि यज्ञेषु । B मंहिष्ठ दातृतम ।

दानार्थान्मंहतेरिष्ठंस्तृचो लोपोऽस्य चेष्ठनि ।

वज्रिन् व(ज्रे सना ? ज्रं सेना) तद्वन् । ऋञ्जसे ऋञ्जेर्भुक्त्यर्थात्तुमर्थे से(तृ ?) । भोक्तुं हविः आयाहि । आगत्य च पिब । पीत्वा च मत्स्व । श्यनो लुक् । माद्य हृष्टो भव । वज्रहस्त सैन्यबलयुक्त यज्ञेषु गच्छसि ।

हविर्भोक्तुमिहागच्छ पिब सोमं प्रहृष्य च ।
धनान्नदानमस्मभ्यं कर्तुं गन्तृतमेन्द्र वै ॥

[1] विदा रायः सुवीर्यं भुवो वाजानां पतिर्वशाँ अनु ।

---

१. 'रथस्व' घ.

---

* पा० सू० ८. २. १५. § 'शविष्ठातिशयेन बलवन्' इति सायणः । A 'ऋञ्जसे वर्जयस्यानिष्टं परिहरसीत्यर्थः' इति सायणः । B 'मंहिष्ठ अतिशयेन पूज्य' इति सायण: । ‡ 'हे इन्द्र ! रायो धनस्य सुवीर्यं शोभनसामर्थ्यं विद् वेत्सि जानासि, अतो धनसाराभिज्ञत्वाद्भुवो भूलोकस्य वाजानां तत्रत्यानामन्नानां च पतिः पालकस्त्वं वशाँ अनु वश्यांस्त्वदधीनान्यजमानाननुगृहाण । हे मंहिष्ठातिशयेन पूज्य वज्रिन्वज्रयुक्तेन्द्र यस्त्वं शूराणां मध्ये शविष्ठोऽतिशयेन बलवांस्तादृशस्त्वमृञ्जसेऽनिष्टं वर्जयसि । यद्वाभीष्टं साधयसि । 'ऋञ्जतिः प्रसाधनकर्मा' इति निरुक्तेऽभिधानात्' इति सायणः ।

मंहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥

विदा वेत्सि । रायः धनानि सुवीर्यं सुष्ठु वीर्यञ्च भुवः दातुं प्रभवसि । वाजानामन्नानां पतिः वशाँ अनु इच्छानुगुणम् । मंहिष्ठ दातृतम वज्रिन् ऋञ्जसे गच्छसि । यश्शविष्ठः गन्तृतमः शूराणां मध्ये ।

मध्ये गन्तासि शूराणामन्नस्वामिन्यथेच्छकम् ।
यज्ञे यासि हविर्भोक्तुं दातुं शक्तो धनादिकम् ॥

स त्वमस्मदभिमतं देहीन्द्रेत्येवमन्वयः ।

*यो मंहिष्ठो मघोनां चिकित्वो अभि नो नय ।
इन्द्रो विदे तमु स्तुषे वशी हि शक्रः ॥

यः यत् मंहिष्ठः दातृतमः मघोनामन्नवतां मध्ये हे चिकित्वः ज्ञानवन् अभि नः अस्मान् नय सम्यक् प्रापय । किम् । यत् स्वयमेव इन्द्रः विदे वेत्ति । तिप इट् । तद्धनादिकम् । तम् । ङसेरम् । तस्मात् । उ उप । स्तुषे स्तौमि । इटः स्थासः से । वशी सर्वसम्पादनदक्षः । हि यस्मात् शक्रः शक्तः ।

तस्मादिन्द्रमहं स्तौमि दातृमध्येऽतिदायकः ।
इन्द्रो यस्माद्यद्धनादि स्वयमिन्द्रो हि वेत्ति वै ॥

---

* 'हे चिकित्वोऽस्मत्सेवाभिज्ञेन्द्र यस्त्वं मघोनां धनवतां मध्ये मंहिष्ठोऽतिशयेन पूज्यः तादृशस्त्वं नोऽस्मानभिनय सर्वतो धनं प्रापय । इन्द्रः परमैश्वर्ययुक्तस्त्वं विदे वेत्सि जानासि । अतस्तमु तमपि यजमानं स्तुषे स्तौषि । सम्यगयं विद्वत्तवानिति प्रशंससि । त्वं तु वशी सर्ववस्तुविषयवशीकारवान् । अत एव शक्रः शक्तिमान्हि । तस्मात्तवैतद्यजमानानुग्रहणं युक्तमित्यर्थः' इति सायणः ।

तज्ज्ञानं यत्प्रापय नस्त्वं वशी शक्त एव च ।

तमूतये हवामहे जेतारमपराजितम् ।
स नः पर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ।।

तमिन्द्रम् । *ऊतये समृद्धये । हवामहे आह्वयामः । जेतारं युधि अपराजितम् । सः इन्द्रः । नः अस्मान् । $ पर्षत् रक्षेत् ।

पॄ पालने तिबट् सिच्च गुणश्शश्लुगितश्च षः ।

अति अतिक्रमय्य द्विषः शत्रून् । क्रतुः यज्ञः । †छन्दः वेदः । ऋतं वृष्टिजलम् । बृहत् प्रभूतम् ।

आह्वयामस्समृद्ध्यर्थन्तमिन्द्रं जयशालिनम् ।
अतिक्रमय्य शत्रून्नस्स सम्यक्पालयेदिति ।।

इन्द्रस्य वेदा यज्ञाश्च महद्वृष्टि(र्जे? ज)लन्तथा ।

इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् ।
§स नः पर्षदति द्विषः स नः पर्षदति स्रिधः ।।

इन्द्रं धनस्य सातये लाभाय । हवामहे । जेतारम् अपराजितम् । सः नः पर्षत् अति द्विषः । उक्तार्थम् । सः नः पर्षत् अति अतिक्रमय्य

---

* 'ऊतयेऽस्मद्रक्षार्थम्' इति सायणः । $ 'द्विषः शत्रूनतिपर्षदतिशयेन विनाशयतु' इति सायणः । † 'छन्दो गायत्र्यादिकमस्माभिः प्रयुज्यमानं यदप्यृतं कर्मफलं तत्सर्वं बृहत्समृद्धमिति शेषः' इति सायणः ।
§ 'स चेन्द्रोऽस्माकं शत्रूनतिशयेन विनाशयतु । ये त्वन्ये स्वयं द्वेषं न कुर्वन्ति तथापि स्रिधोऽस्माभिर्द्वेष्यास्तानप्यतिशयेन विनाशयतु । सर्वत्र हि वेदेषु "सोऽस्मान्द्वेष्टि यं च वयं द्विष्मः" [कौषी० २।८] इत्यादौ द्वेष्याणां द्वेष्टॄणाञ्च विनाशः प्रार्थ्यते' इति सायणः ।

स्रिधः अन्तश्शोषकरान् । स्रिधेरन्तःशोषार्थात् क्विप् । शम् ।

धनलाभायाह्वयामस्तमिन्द्रं जयशालिनम् ।
अतिक्रमय्य शत्रूंश्चः शोषकान्पालयेदिति ॥

पूर्वस्य यत्ते अद्रिवः सुम्न आधेहि नो वसो ।
पूर्तिः शविष्ठ शस्यत ईशे हि शक्रः ॥

पूर्वस्य चिरन्तनस्य यत्ते तव हे अद्रिवः पर्वतशातन *सुम्ने सुखे आ साधु धेहि स्थापय नः अस्मान् $हे वसो प्रशस्य पूर्तिः पूर्णता । £हे शविष्ठ गन्तृतम शस्यते स्तूयते । कुत एतत् । ईशे ईशिषे । सिपस्तः । A'लोपस्त आत्मनेपदेषु' हि शक्रः शक्तः ।

सुखे स्थापय नः साधु शक्तो यस्मात्त्वमीशिषे ।
हे प्रशस्य पूर्णता हि यज्ञेषु तव शस्यते ॥

Bनूनं तन्नव्यं Cसन्यसे प्रभो जनस्य वृत्रहन् ।

---

* 'सुम्ने धने' इति सायणः । $ 'हे वसो निवासहेतो' इति सायणः । £ 'हे शविष्ठातिशयेन बलयुक्त पूर्तिस्त्वदीयधनपूरणं शस्यते सर्वैर्यजमानैः प्रशस्यते । प्रशंसाप्रकार एव प्रशस्यते – शक्तः शक्तिमानिन्द्र ईशे हि सर्वस्यास्मद्रक्षणस्येष्टे खलु । सेयं प्रशंसा' इति सायणः । A पा० सू० ७. १. ४१. B हे वृत्रहन्वृत्रघातिन् जनस्य प्रभो सर्वस्य जन्तोः स्वामिन्नव्यं नूतनं वलीपलितादिलक्षणेन पुराणत्वेन वर्जितमिन्द्रं तं त्वां नूनमवश्यं संन्यसे सम्यङ् नितरां प्रक्षिपामि । अस्मिन्कर्मणि हविषो भोक्तृत्वेन स्थापयामि । त्वं चाहञ्चेत्यावामुभावन्येषु परस्परं सम्यक्प्रब्रवावहै । इतरेषु यजमानेष्वहं गत्वा प्रभूतफलप्रदोऽयमिन्द्र इत्येवं प्रब्रवीमि । इतरेषु देवेषु त्वं गत्वा सम्यगनुष्ठातायं यजमान इति प्रब्रूहि । यो यजमानोऽस्ति सोऽयं दक्षिणारूपेण दातव्यासु गोषु शूरो गच्छति । उदारः सन् प्रवर्तते । इत्येवं मदीयं गुणं त्वं प्रब्रूहि । इन्द्रोऽयं सखा सखिवदत्यन्तं स्निग्धः । सुशेवः सुष्ठु सेवितुं शक्यः । अद्धया एतत्सदृशो द्वितीयो देवो नास्तीत्येवमहं ब्रवीमि' इति सायणः । C 'संन्यसे' इति सायणभाष्यानुरोधी आनन्दाश्रममुद्रितपाठः ।

समन्येषु ब्रवावहै शूरो यो गोषु गच्छति सखा सुशेवो
अद्वयाः ॥

नूनं क्षिप्रम् । तत् तत्र । नव्यं स्तुत्यम् । (*अ ? णु) स्तुतौ । ¶'अचो यत्' । हे सन्यसे ।

सनेर्लाभस्य विक्षेप्तः सनेरि(न्त ? ञ)स्यते(स्त चे ? श्च सः) ।

हे प्रभो जनस्य भूतजातस्य । हे वृत्रहन् वृत्रस्य हन्तः । सं सह । अन्येषु वेदहीनेषु सुजनेषु ब्रवावहै सह भाषणं त्वं चाहश्च कुर्व(त ? ः) कीदृशेन त्वया । शूरः यः गोषु । भिसः सुप् । स्तुतिभिः स्तुतः गच्छति ... ...

(दी)र्घश्छान्दसः । अद्वयः निरुपमः ।

दातर्धनादेर्भूतानां प्रभो शूर स्तुतिस्तु(तः ? त) ।
वृत्रहन् वेदहीनेषु तिष्ठत्सु त्वमहन्तथा ॥

कुर्वस्सं(भरण ? भाषणं)श्लाघ्यं क्षिप्रमेवोपमाति(गः ? ग) ।
इत्यृचान्नव(का तश्चिद्य ? कं तच्च य)थाशक्ति प्रवर्णितम् ॥

पुरीषपदसंज्ञा तु नवपद्यथ वर्ण्यते ।
यथाग्निमिन्द्रं विष्णुश्च पूषणं सर्वदेवताः ॥

संबुध्येन्द्रस्य माहात्म्यं पुनरेव प्रवर्ण्यते ।

॥ ‡एवा ह्येवैवा ह्यग्ना ३ इ ॥

---

* धातुपाठे १०३५ ¶ पा० सू० ३. १. ९७.

‡ ' "इण् गतौ" [अदा० ग० प०] इत्यस्माद्धातोराङ्पूर्वान्निष्पन्न एवशब्द आगमनवाची । हेऽग्न एवा ह्येव सर्वथा समागच्छ' द्विरुक्तिः प्लुतिश्चादरार्था । एकारस्य स्थाने प्लुतिरिकारोत्तरा व्याकरणे विहिता' इति सायणः ।

(एव ? वा) । दीर्घः छान्दसः । एवमेवेत्यर्थः । हे अग्ने वयं स्तुवन्तो यथा तत्त्वेन तत् पुनः,

एवमेव युज्यते हि प्लुत ए (तो दधे ? त इदु)त्तरा ।
पूजायामुत्तरात्रापि प्लुत ओत उदच वै ॥

॥ *एवा ह्येवैवाहीन्द्रा[1] ३ ॥

हे इन्द्र त्वद्गुणौघानां सदृशं स्तोतुमक्षमाः ।
अवोचामैवमेवेदं क्षन्तुमर्हसि तत्प्रभो ॥

॥ [2]एवा ह्येवैवाहि विष्णा ३ उ ॥

हे विष्णो त्वत्प्रसादेन स्तुत इन्द्रो यथामति ।

॥ एवा ह्येवैवाहि पूष[3]३न् ॥

पूषँस्तवानुग्रहेण स्तुत इन्द्रो यथामति ।

॥ एवा ह्येवैवाहि देवा[4]३ः ॥

देवा युष्मत्प्रभावेन स्तुत इन्द्रो यथामति ।

॥ §एवा हि शक्रो वशी हि शक्रो वशाँ अनु ॥

---

१. ' न्द्राँ ३ ' च, ' द्रो ३ न्द्रम् । आनन्दाश्रममुद्रितपाठः ।
२. ' एवा मउ उवै ' घ. ३. ' पूषन् ' घ.
४. ' वा: ' घ, ' वा३ः ' च.

---

* ' एतदादिचतुर्णां पदानां ' प्रथमपदवद्व्याख्येयम् ' इति सायणभाष्यम् ।
§ ' शक्रः शक्तिमानिन्द्र एवाद्धि, आगतः खलु । स च शक्रो वशी हि सर्ववस्तुवशीकारवान् खलु । तादृशो देवो वशाँ अनु स्वस्य वश्यान्यजमानाननुगृह्णातु ' इति सायणः ।

अग्निपूषविष्णुदेवाः सर्वे शृणुत मे वचः ।
भक्तेच्छानुगुणं दातुं शक्तो हीन्द्र(ः) सुरास्ततः ॥

॥ *आ यो मन्याय मन्यव उपो मन्याय मन्यवे ॥

... ... यः इन्द्रः मन्याय पू(जा ? ज्या)य मनेर्ण्यत्यन्तबुद्धिः । मन्यवे स्तोत्रकारिणे । उप समीपे । उ पुनः । मन्याय मन्यवे । पूर्ववत् । द्विरुक्तिरादरात् । ददाति तमस्तोष्मेति ।

... ... पूज्यमानेभ्यः समुपेत्य ददाति यः ।
तमिन्द्रं वयमस्तोष्म हेऽग्न्याद्या वः प्रसादतः ॥

॥ उपेहि विश्वध ॥

उप समीपे आ इहि आगच्छ । आङि पररूपम् । विश्वध । धात्र उपसर्गे कः । दातु(र्न ? न्न) इति शेषः ।

अस्मत्समीपमागच्छ सर्वस्यास्येन्द्र धारक ।
काममन्नादि मोक्षान्तं संपादयितुमञ्जसा ॥

॥ विदा मघवन्विदो ३ म् ॥

विदा अवगच्छ । हे मघवन् । हे विद सर्वज्ञ । इगुपधकः । [§]ओम् अतिपरमार्थरूपत्वादवि(सम ? संवा)दित्वादिरूप(म् ?) ।

सर्वज्ञेन्द्राविसंवादिरूपास्मत्स्तुतिमुत्तमाम् ।
श्रुत्वाथान्नादिमोक्षान्तं सर्वं संपादय प्रभो ॥

---

* 'य इन्द्रो मन्याय मन्यवे मन्तव्यमस्माद्धितं मन्तुमा यज्ञे समागच्छति स इन्द्रो मन्याय मन्तव्यमस्माद्धितं मन्यवे मन्तुमुपो अस्मत्समीप एव तिष्ठतु' इति सायणः । § 'ओम् अस्तु श्रेयोऽस्माकमिति शेषः' इति सायणः ।

वर्णिता नवपद्येयं पुरीषपदसंज्ञिका ।
अर्थ इत्थं सकृद्रूपखण्डस्योक्तो यथामति ॥

महानाम्नीसंज्ञमेतत्सूक्तं व्याख्यातमञ्जसा ।

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ
मोक्षप्रदायां सकृदुक्तिखण्डाध्यायः ।

व्याख्याति पर्वत्रिकेण चतुर्थारण्यकेन तु ।
महाव्रतब्राह्मणं यस्तं नमाम्याश्वलायनम् ॥

विशेषधर्मान्वयार्थी सूत्रादस्य पृथक्क्रिया ।
एतावत्सात्र सूत्रात्प्रागेतत्संगतमर्थतः ।
सर्व(श्शा ? शा)न्तिर्वनमहरेकशिष्यकतादि च ॥

सूत्रोक्तं परिभाषादि सर्व(म)त्रोपजीव्यते ।

॥ महाव्रतस्य ॥

अधिकारोऽयमि ... ... दीक्षितसूत्रतः ।
महाव्रतपदश्चाह्नि शस्त्रे साम्नि च वर्तते ॥

एतस्याह्नो न स्तुवीत शंसेदिति च दर्शनात् ।
अत त्वह्नि वक्ष्यमाणकार्यस्यैवात्र संभवात् ॥

॥ पञ्चविंशतिं सामिधेन्यः ॥

(स्यादिति ? स्युरिति) शेषः । सोरम् । * 'समिधामाधाने षेण्यण्' ।

---

* पा० सू० वा० ४. ३. १२०.

ङीष् । *हलस्तद्धितस्य । जस् । यण् ।

तुल्यं प्रातरनूक्तादि सवनीये पशोस्त्विमा(म् ? :) ।

कथम्,

॥ एकविंशतौ प्रागुपोत्तमायाः +समिधाग्निमिति चतस्रः ॥

विषुवति क्रतौ ‡'पृथुपाजा अमर्त्य इति षड् धाय्याः सामिधेनीनाम्' इत्येकविंशतौ सिद्धायामुपान्त्यायाः समिधाग्निमिति चतस्रः । स्युः । अत्र सूत्रद्वयमकृत्वा एकविंशतौ समिधाग्निमिति चतस्रो धाय्या इति लघुत्वायोच्यतामिति चेत्,

सत्यमेवं सूत्रकारो नाकार्षीत् करवाम किम् ।
मास्म चोद्ये(न) बाधिष्ठा न सूत्रं कुर्महे वयम् ॥

स वर्जयेत्पशावत्र विशेषं प्रब्रवीत्यथ ...

॥ वैश्वकर्मण ऋषभ उपालम्भनीय उपांशु ॥

$'सन्तिष्ठत इदमहरग्निष्टोम' इति A'आग्नेयोऽग्निष्टोम' इति प्राप्ता-ग्नेयादनन्तरं विश्वकर्मदेवत्य ऋषभः स्यात् । उपांश्विति । B'सावित्र-सौर्यवैष्णववैश्वकर्मणाश्चैतेषाम्' इति विकल्पोपांशुत्वं मा भूत् ॥

कर्मण्यक्रियत्वपण हेश्वनुमन्त्राणि(?) ।
आवपाहोमतस्तुल्यमार्षेयवरणादिकम् ॥

---

* पा० सू० ६. ४. १५०   + ऋक्सं ८. ४४ १.

‡ आ० श्रौ० ८. ६. ३. (पृथुपाजा ऋक्सं० ३. २७. ५.)

$ ऐ० आ० ४. ३. २.   A आ० श्रौ० ५. ३. ३.

B आ० श्रौ० ३ ८. ६.

A 'मार्जयित्वाध्वर्यं'वित्यादि तुल्यं प्रागाज्यशस्त्रतः ।

॥ आज्यप्रउगे विश्वजितः ॥

ग्राह्ये इति शेषः ।

B 'विश्वजितोऽग्निं नर' इति यदाज्यं तद्भवेदिह ।
C प्रवोदेवीयकस्थाने पञ्चविंशत्यृचन्त्विदम् ॥

D अग्निं नरेत्याज्यमिति वाच्यं विश्वजितोऽत्र किम् ॥

न ह्येतत्प्रउगार्थं स्यात्तत्राप्यैकाहिकं हि तत् ।

सत्यं त्वनुकरोत्येष श्रु(ति ? तिं) बह्वृचकुञ्जरः ।
E निवित्पुरोरुचो नित्या F वायवातृचसप्तकम् ॥

॥ होत्राश्चतुर्विंशात् ॥

ग्राह्या इति शेषः ।

होत्रास्तु होत्र(का ? क)ग्राह्याश्चतुर्विंशतिशस्त्रकाः ।
प्रातर्मध्यन्दिने चैवं शस्त्रषट्कं समीरितम् ॥

तत्र च,

प्रशा(स्त्रा ? स्त्र)च्छावाकयोर्हि न विशेषोऽस्ति शस्त्रयोः ।
चातुर्विंशिकयोस्सोऽस्ति ब्राह्मणाच्छंसिनस्तयोः ॥

इत्याह —

A आ० श्रौ० ५. ३. १३. B आ० श्रौ० ८. ७. १.
C ऋक्सं० ३. १३. १. D ऋक्सं० ७. १. १.
E 'वायुरग्रे गा यज्ञप्रीरिति सप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात्तृचं तृचं शंसेत्' इति, 'वायवायाहि दर्शतेति सप्त तृचाः' इति चाश्वलायनः [आ० श्रौ० ५. १०. ४, ५] F ऋक्सं० १. २. १.

॥ *ईङ्खयन्तीरपस्युव इति च ब्राह्मणाच्छंस्यावपेत प्रातस्सवने ॥

प्राक्पर्यासात्पञ्चर्चस्यावापः ।

॥ £तीव्रस्याभिवयसो अस्य पाहीति माध्यन्दिने ॥

ब्राह्मणाच्छंस्यावपेतेत्येव । ऊर्ध्वमावापात्पञ्चर्चस्यावापः ।

॥ ‡त्रिकद्रुकेषु महिषो यवाशिरमिति स्तोत्रियः ॥

माध्यन्दिन इत्येव ।

इहार्थाद्ब्राह्मणाच्छंसी ङसन्तः (प ? प्रति)गम्यते ।
त्रिकेति स्तोत्रियतृचो ब्राह्मणाच्छंसिनो भवेत् ॥

॥ Aएन्द्र याह्युप नः परावत Bइन्द्राय हि द्यौरसुरो अनम्नत Cप्रोष्वस्मै पुरोरथमित्यतोऽनुरूपः ॥

अत एभ्यः प्रतीके ... ... ।
... ... भवेन्माध्यन्दिनं तथा ॥

होतुर्मरुत्वतीयाख्यं शस्त्रं सम्यगब्रवीत्यथ—

॥ चतुर्विंशान्मरुत्वतीयस्यातानः ॥

ग्राह्यः स्यादिति शेषः ।

---

* ऋक्सं १०. १५३. १. £ ऋक्सं० १०. १६०. १.
‡ ऋक्सं० २. २२. १. A ऋक्सं० १. १३०. १.
B ऋक्सं० १. १३१. १. C ऋक्सं० १०. १३३. १.

शुद्धिपत्रिका

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६	१८	ऋक्सर्वानुक्रमणी (८.७४.२)	ऋक्सर्वानुक्रमणी(८. ७४)
४७	१७	ऋक्सर्वा० ६. १. १७.	ऋक्सर्वा० ६. १७
५८	१४	नोपलब्धममू	नोपलब्धममू
११३	४	(द्योत्रि ? द्यात्रि)	(द्योत्रि ? द्यान्त्यात्रि)
१६३	१८	अतोऽप्यर्कवत् । भेदो	अतोऽप्यर्कवद् भेदो
१७२	७	(म ? य)	(म ? उ)
१८०	३	द्वे रूपभेदमाह–	द्वो । रूपभेदमाह–
१८३	२०	ऋङ्क्सं०	ऋक्सं०
२१५	७	तर्दशकं	तदंशकं
२५७	४	प्राणं देहावाह-	प्राणदेहावाह-
२६३	७	किं नाम । अका	किम् । नाम अका
२६८	३	घोष वा	घोषा वा
२९४	१४	१. 'कर्त' क.	१. 'कर्त' ख.
२९६	१७	'ज्ञातीति' क.	'ज्ञातीति' ख.
२९७	१४	१. 'प्रज्ञा यस्य' क.	१. 'प्रज्ञा यस्य' ख.
३१२	१३	ज्योर्तींष्येवमिमानि	ज्योतींष्येवमिमानि
३१४	,,	यंद्येनं	यद्येनं
३२८	१५	वसिष्ठः	वासिष्ठः
३७६	२०	आ० श्लौ०	आ० श्रौ०